# Shri Shiva Mahapuranam 3 Shatarudra Samhita

# શ્રીશિવમહાપુરાણમ્ ૩ શતરુદ્રસંહિતા

## Document Information

Text title : shivapurANam 3 shatarudrasaMhitA

File name : shivapurANam3shatarudrasaMhitA.itx

Category : shiva, purANa, shivapurANa

Location : doc_purana

Proofread by : Revathy Rajaraman and team members Malati Shekar, Latha Murali, Meenakshi Premanand, Jayalakshmi, Gayathri, Uma Mahesh, Sripriya, Sornavalli

Latest update : January 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2026

*sanskritdocuments.org*

# શ્રીશિવમહાપુરાણમ્ ૩ શતરુદ્રસંહિતા

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥ તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૧. પ્રથમોऽધ્યાયઃ । શિવસ્ય પઞ્ચબ્રહ્માવતારવર્ણનમ્ ।

વન્દે મહાનન્દમનન્તલીલમ્મહેશ્વરં સર્વવિભું મહાન્તમ્ ।
ગૌરીપ્રિયં કાર્તિકવિઘ્નરાજસમુદ્ભવં શઙ્કરમાદિદેવમ્ ॥ ૧॥

શૌનક ઉવાચ ।
વ્યાસશિષ્ય મહાભાગ સૂત જ્ઞાનદયાનિધે ।
વદ શમ્ભ્વવતારાંશ્ચ યૈરકાર્ષીત્સતાં શિવમ્ ॥ ૧॥

સૂત ઉવાચ ।
મુને શૌનક સદ્ભક્ત્યા દત્તચિત્તો જિતેન્દ્રિયઃ ।
અવતારાઞ્છિવસ્યાહં વચ્મિ તે મુનયે શ‍ૃણુ ॥ ૨॥

એતત્પૃષ્ટઃ પુરા નન્દી શિવમૂર્તિસ્સતાં ગતિઃ ।
સનત્કુમારેણ મુને તમુવાચ શિવં સ્મરન્ ॥ ૩॥

નન્દીશ્વર ઉવાચ ।
અસઙ્ખ્યાતા હિ કલ્પેષુ વિભોઃ સર્વેશ્વરસ્ય વૈ ।
અવતારાસ્તથાપીહ વચ્મ્યહં તાન્યથામતિ ॥ ૪॥

એકોનવિંશકઃ કલ્પો વિજ્ઞેયઃ શ્વેતલોહિતઃ ।
સદ્યોજાતાવતારસ્તુ પ્રથમઃ પરિકીર્તિતઃ ॥ ૫॥

તસ્મિંસ્તત્પરમં બ્રહ્મ ધ્યાયતો બ્રહ્મણસ્તથા ।
ઉત્પન્નસ્તુ શિખાયુક્તઃ કુમારઃ શ્વેતલોહિતઃ ॥ ૬॥

તં દૃષ્ટ્વા પુરુષં બ્રહ્મા બ્રહ્મરૂપિણમીશ્વરમ્ ।

જ્ઞાત્વા ધ્યાત્વા સ હૃદયે વવન્દે પ્રયતાઞ્જલિઃ ॥ ૭॥

સદ્યોજાતં શિવં બુદ્ધ્વા જહર્ષ ભુવનેશ્વરઃ ।
મુહુર્મુહુશ્ચ સદ્બુદ્ધ્યા પરં તં સમચિન્તયત્ ॥ ૮॥

તતોઽસ્ય ધ્યાયતઃ શ્વેતાઃ પ્રાદુર્ભૂતા યશસ્વિનઃ ।
કુમારાઃ પરવિજ્ઞાનપરબ્રહ્મસ્વરૂપિણઃ ॥ ૯॥

સુનન્દો નન્દનશ્ચૈવ વિશ્વનન્દોપનન્દનૌ ।
શિષ્યાસ્તસ્ય મહાત્માનો યૈસ્તદ્બ્રહ્મ સમાવૃતમ્ ॥ ૧૦॥

સદ્યોજાતશ્ચ વૈ શમ્ભુર્દદૌ જ્ઞાનં ચ વેધસે ।
સર્ગશક્તિમપિ પ્રીત્યા પ્રસન્નઃ પરમેશ્વરઃ ॥ ૧૧॥

તતો વિંશતિમઃ કલ્પો રક્તો નામ પ્રકીર્તિતઃ ।
બ્રહ્મા યત્ર મહાતેજા રક્તવર્ણમધારયત્ ॥ ૧૨॥

ધ્યાયતઃ પુત્રકામસ્ય પ્રાદુર્ભૂતો વિધેઃ સુતઃ ।
રક્તમાલ્યામ્બરધરો રક્તાક્ષો રક્તભૂષણઃ ॥ ૧૩॥

સ તં દૃષ્ટ્વા મહાત્માનં કુમારં ધ્યાનમાશ્રિતઃ ।
વામદેવં શિવં જ્ઞાત્વા પ્રણનામ કૃતાઞ્જલિઃ ॥ ૧૪॥

તતસ્તસ્ય સુતા હ્યાસંશ્ચત્વારો રક્તવાસસઃ ।
વિરજાશ્ચ વિવાહશ્ચ વિશોકો વિશ્વભાવનઃ ॥ ૧૫॥

વામદેવઃ સ વૈ શમ્ભુર્દદૌ જ્ઞાનં ચ વેધસે ।
સર્ગશક્તિમપિ પ્રીત્યા પ્રસન્નઃ પરમેશ્વરઃ ॥ ૧૬॥

એકવિંશતિમઃ કલ્પઃ પીતવાસા ઇતિ સ્મૃતઃ ।
બ્રહ્મા યત્ર મહાભાગઃ પીતવાસા બભૂવ હ ॥ ૧૭॥

ધ્યાયતઃ પુત્રકામસ્ય વિધેર્જાતઃ કુમારકઃ ।
પીતવસ્ત્રાદિકપ્રૌઢો મહાતેજા મહાભુજઃ ॥ ૧૮॥

તં દૃષ્ટ્વા ધ્યાનસંયુક્તં જ્ઞાત્વા તત્પુરુષં શિવમ્ ।
પ્રણનામ તતો બુદ્ધ્યા ગાયત્રીં શાઙ્કરીં વિધિઃ ॥ ૧૯॥

જપિત્વા તુ મહાદેવીં સર્વલોકનમસ્કૃતામ્ ।
પ્રસન્નસ્તુ મહાદેવો ધ્યાનયુક્તેન ચેતસા ॥ ૨૦॥

તતોઽસ્ય પાર્શ્વતો દિવ્યાઃ પ્રાદુર્ભૂતાઃ કુમારકાઃ ।
પીતવસ્ત્રા હિ સકલા યોગમાર્ગપ્રવર્તકાઃ ॥ ૨૧॥

તતસ્તસ્મિન્ગતે કલ્પે પીતવર્ણે સ્વયમ્ભુવઃ ।
પુનરન્યઃ પ્રવૃત્તસ્તુ કલ્પો નામ્ના શિવસ્તુ સ ॥ ૨૨॥

એકાર્ણવે સંવ્યતીતે દિવ્યવર્ષસહસ્રકે ।
સ્રષ્ટુકામઃ પ્રજા બ્રહ્મા ચિન્તયામાસ દુઃખિતઃ ॥ ૨૩॥

તતોઽપશ્યન્મહાતેજાઃ પ્રાદુર્ભૂતં કુમારકમ્ ।
કૃષ્ણવર્ણં મહાવીર્યં દીપ્યમાનં સ્વતેજસા ॥ ૨૪॥

ધૃતકૃષ્ણામ્બરોષ્ણીષં કૃષ્ણયજ્ઞોપવીતિનમ્ ।
કૃષ્ણેન મૌલિનાયુક્તં કૃષ્ણસ્નાનાનુલેપનમ્ ॥ ૨૫॥

સ તં દૃષ્ટ્વા મહાત્માનમઘોરં ઘોરવિક્રમમ્ ।
વવન્દે દેવદેવેશમદ્ભુતં કૃષ્ણપિઙ્ગલમ્ ॥ ૨૬॥

અઘોરં તુ તતો બ્રહ્મા બ્રહ્મરૂપં વ્યચિન્તયત્ ।
તુષ્ટાવ વાગ્ભિરિષ્ટાભિર્ભક્તવત્સલમવ્યયમ્ ॥ ૨૭॥

અથાસ્ય પાર્શ્વતઃ કૃષ્ણાઃ કૃષ્ણસ્નાનાનુલેપનાઃ ।
ચત્વારસ્તુ મહાત્માનઃ સમ્બભૂવુઃ કુમારકાઃ ॥ ૨૮॥

કૃષ્ણ કૃષ્ણશિખશ્ચૈવ કૃષ્ણાસ્યઃ કૃષ્ણકણ્ઠધૃક્ ।
ઇતિ તેઽવ્યક્તનામાનઃ શિવરૂપાઃ સુતેજસઃ ॥ ૨૯॥

એવમ્ભૂતા મહાત્માનો બ્રહ્મણઃ સૃષ્ટિહેતવે ।
યોગં પ્રવર્તયામાસુર્ઘોરાખ્યં મહદદ્ભુતમ્ ॥ ૩૦॥

અથાન્યો બ્રહ્મણઃ કલ્પઃ પ્રાવર્તત મુનીશ્વરાઃ ।
વિશ્વરૂપ ઇતિ ખ્યાતો નામતઃ પરમાદ્ભુતઃ ॥ ૩૧॥

બ્રહ્મણઃ પુત્રકામસ્ય ધ્યાયતો મનસા શિવમ્ ।
પ્રાદુર્ભૂતા મહાનાદા વિશ્વરૂપા સરસ્વતી ॥ ૩૨॥

તથાવિધઃ સ ભગવાનીશાનઃ પરમેશ્વરઃ ।
શુદ્ધસ્ફટિકસઙ્કાશઃ સર્વાભરણભૂષિતઃ ॥ ૩૩॥

તં દૃષ્ટ્વા પ્રણનામાસૌ બ્રહ્મેશાનમજં વિભુમ્ ।
સર્વગં સર્વદં સર્વં સુરૂપં રૂપવર્જિતમ્ ॥ ૩૪॥

ઈશાનોऽપિ તથાદિશ્ય સન્માર્ગં બ્રહ્મણે વિભુઃ ।
સશક્તિઃ કલ્પયાઞ્ચક્રે સ બાલાંશ્ચતુરઃ શુભાન્ ॥ ૩૫॥

જટી મુણ્ડી શિખણ્ડી ચ અર્ધમુણ્ડશ્ચ જજ્ઞિરે ।
યોગેનાદિશ્ય સદ્ધર્મં કૃત્વા યોગગતિં ગતાઃ ॥ ૩૬॥

એવં સઙ્ક્ષેપતઃ પ્રોક્તઃ સદ્યાદીનાં સમુદ્ભવઃ ।
સનત્કુમાર સર્વજ્ઞ લોકાનાં હિતકામ્યયા ॥ ૩૭॥

અથ તેષાં મહાપ્રાજ્ઞ વ્યવહારં યથાયથમ્ ।
ત્રિલોકહિતકારં હિ સર્વં બ્રહ્માણ્ડસંસ્થિતમ્ ॥ ૩૮॥

ઈશાનઃ પુરુષોऽઘોરો વામસંજ્ઞસ્તથૈવ ચ ।
બ્રહ્મસંજ્ઞા મહેશસ્ય મૂર્તયઃ પઞ્ચ વિશ્રુતાઃ ॥ ૩૯॥

ઈશાનઃ શિવરૂપશ્ચ ગરીયાન્પ્રથમઃ સ્મૃતઃ ।
ભોક્તારં પ્રકૃતેઃ સાક્ષાત્ક્ષેત્રજ્ઞમધિતિષ્ઠતિ ॥ ૪૦॥

શૈવસ્તત્પુરુષાખ્યશ્ચ સ્વરૂપો હિ દ્વિતીયકઃ ।
ગુણાશ્રયાત્મકં ભોગ્યં સર્વજ્ઞમધિતિષ્ઠતિ ॥ ૪૧॥

ધર્માય સ્વાઙ્ગસંયુક્તં બુદ્ધિતત્ત્વં પિનાકિનઃ ।
અઘોરાખ્યસ્વરૂપો યસ્તિષ્ઠત્યન્તસ્તૃતીયકઃ ॥ ૪૨॥

વામદેવાહ્વયો રૂપશ્ચતુર્થઃ શઙ્કરસ્ય હિ ।
અહઙ્કૃતેરધિષ્ઠાનો બહુકાર્યકરઃ સદા ॥ ૪૩॥

ઈશાનાહ્વસ્વરૂપો હિ શઙ્કરસ્યેશ્વરઃ સદા ।
શ્રોત્રસ્ય વચસશ્ચાપિ વિભોર્વ્યોમ્નસ્તથૈવ ચ ॥ ૪૪॥

ત્વક્પાણિસ્પર્શવાયૂનામીશ્વરં રૂપમૈશ્વરમ્ ।
પુરુષાખ્યં વિચારજ્ઞા મતિમન્તઃ પ્રચક્ષતે ॥ ૪૫॥

વપુષશ્ચ રસસ્યાપિ રૂપસ્યાગ્નેસ્તથૈવ ચ ।
અઘોરાખ્યમધિષ્ઠાનં રૂપં પ્રાહુર્મનીષિણઃ ॥ ૪૬॥

રશનાયાશ્ચ પાયોશ્ચ રસસ્યાપાં તથૈવ ચ ।
ઈશ્વરં વામદેવાખ્યં સ્વરૂપં શાઙ્કરં સ્મૃતમ્ ॥ ૪૭॥

ઘ્રાણસ્ય ચૈવોપસ્થસ્ય ગન્ધસ્ય ચ ભુવસ્તથા ।

સદ્યોજાતાહ્વયં રૂપમીશ્વરં શાઙ્કરં વિદુઃ ॥ ૪૮॥

ઇમે સ્વરૂપાઃ શમ્ભોર્હિ વન્દનીયાઃ પ્રયત્નતઃ ।
શ્રેયોઽર્થિભિર્નરૈર્નિત્યં શ્રેયસામેકહેતવઃ ॥ ૪૯॥

યઃ પઠેચ્છૃણુયાદ્વાપિ સદ્યાદીનાં સમુદ્ભવમ્ ।
સ ભુક્ત્વા સકલાન્કામાન્પ્રયાતિ પરમાં ગતિમ્ ॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં શિવસ્ય પઞ્ચબ્રહ્માવતારવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૩.૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૨. દ્વિતીયોઽધ્યાયઃ । શિવાષ્ટમૂર્ત્તિવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
શૃણુ તાત મહેશસ્યાવતારાન્પરમાન્પ્રભો ।
સર્વકાર્યકરાઁલ્લોકે સર્વસ્ય સુખદાં મુને ॥ ૧॥

તસ્ય શમ્ભોઃ પરેશસ્ય મૂર્ત્યષ્ટકમયં જગત્ ।
તસ્મિન્વ્યાપ્ય સ્થિતં વિશ્વં સૂત્રે મણિગણા ઇવ ॥ ૨॥

શર્વો ભવસ્તથા રુદ્ર ઉગ્રો ભીમઃ પશોઃ પતિઃ ।
ઈશાનશ્ચ મહાદેવો મૂર્તયશ્ચાષ્ટ વિશ્રુતાઃ ॥ ૩॥

ભૂમ્યમ્ભોઽગ્નિમરુદ્વ્યોમક્ષેત્રજ્ઞાર્કનિશાકરાઃ ।
અધિષ્ઠિતાશ્ચ શર્વાદ્યૈરષ્ટરૂપૈઃ શિવસ્ય હિ ॥ ૪॥

ધત્તે ચરાચરં વિશ્વં રૂપં વિશ્વમ્ભરાત્મકમ્ ।
શઙ્કરસ્ય મહેશસ્ય શાસ્ત્રસ્યૈવેતિ નિશ્ચયઃ ॥ ૫॥

સઞ્જીવનં સમસ્તસ્ય જગતઃ સલિલાત્મકમ્ ।
ભવ ઇત્યુચ્યતે રૂપં ભવસ્ય પરમાત્મનઃ ॥ ૬॥

બહિરન્તર્જગદ્વિશ્વં બિભર્તિ સ્પન્દતે સ્વયમ્ ।
ઉગ્ર ઇત્યુચ્યતે સદ્ભી રૂપમુગ્રસ્ય સત્પ્રભોઃ ॥ ૭॥

સર્વાવકાશદં સર્વવ્યાપકં ગગનાત્મકમ્ ।
રૂપં ભીમસ્ય ભીમાખ્યં ભૂપવૃન્દસ્વ ભેદકમ્ ॥ ૮॥

સર્વાત્મનામધિષ્ઠાનં સર્વક્ષેત્રનિવાસકમ્ ।
રૂપં પશુપતેર્જ્ઞેયં પશુપાશનિકૃન્તનમ્ ॥ ૯॥

સન્દીપયઞ્જગત્સર્વં દિવાકરસમાહ્વયમ્ ।
ઈશાનાખ્યં મહેશસ્ય રૂપં દિવિ વિસર્પતિ ॥ ૧૦॥

આપ્યાયયતિ યો વિશ્વમમૃતાંશુર્નિશાકરઃ ।
મહાદેવસ્ય તદ્રૂપં મહાદેવસ્ય ચાહ્વયમ્ ॥ ૧૧॥

આત્મા તસ્યાષ્ટમં રૂપં શિવસ્ય પરમાત્મનઃ ।
વ્યાપિકેતરમૂર્તીનાં વિશ્વં તસ્માચ્છિવાત્મકમ્ ॥ ૧૨॥

શાખાઃ પુષ્યન્તિ વૃક્ષસ્ય વૃક્ષમૂલસ્ય સેચનાત્ ।
તદ્વદસ્ય વપુર્વિશ્વં પુષ્યતે ચ શિવાર્ચનાત્ ॥ ૧૩॥

યથેહ પુત્રપૌત્રાદેઃ પ્રીત્યા પ્રીતો ભવેત્પિતા ।
તથા વિશ્વસ્ય સમ્પ્રીત્યા પ્રીતો ભવતિ શઙ્કરઃ ॥ ૧૪॥

ક્રિયતે યસ્ય કસ્યાપિ દેહિનો યદિ નિગ્રહઃ ।
અષ્ટમૂર્તેરનિષ્ટં તત્કૃતમેવ ન સંશયઃ ॥ ૧૫॥

અષ્ટમૂર્ત્યાત્મના વિશ્વમધિષ્ઠાયાસ્થિતં શિવમ્ ।
ભજસ્વ સર્વભાવેન રુદ્રં પરમકારણમ્ ॥ ૧૬॥

ઇતિ પ્રોક્તાઃ સ્વરૂપાસ્તે વિધિપુત્રાષ્ટવિશ્રુતાઃ ।
સર્વોપકારનિરતાઃ સેવ્યાઃ શ્રેયોઽર્થિભિર્નરૈઃ ॥ ૧૭॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં શિવાષ્ટમૂર્ત્તિવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૩.૨॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૩. તૃતીયોઽધ્યાયઃ । શિવસ્યાર્દ્ધનારીશ્વરાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।

શ‍ૃણુ તાત મહાપ્રાજ્ઞ વિધિકામપ્રપૂરકમ્ ।
અર્દ્ધનારીનરાખ્યં હિ શિવરૂપમનુત્તમમ્ ॥ ૧॥

યદા સૃષ્ટાઃ પ્રજાઃ સર્વાઃ ન વ્યવર્દ્ધન્ત વેધસા ।
તદા ચિન્તાકુલોઽભૂત્સ તેન દુઃખેન દુખિતઃ ॥ ૨॥

નભોવાણી તદાભૂદ્વૈ સૃષ્ટિં મિથુનજાં કુરુ ।
તચ્છ્રુત્વા મૈથુનીં સૃષ્ટિં બ્રહ્મા કર્તુમમન્યત ॥ ૩॥

નારીણાં કુલમીશાનાન્નિર્ગતં ન પુરા યતઃ ।
તતો મૈથુનજાં સૃષ્ટિં કર્તું શેકે ન પદ્મભૂઃ ॥ ૪॥

પ્રભાવેણ વિના શમ્ભોર્ન જાયેરન્નિમાઃ પ્રજાઃ ।
એવં સઞ્ચિન્તયન્બ્રહ્મા તપઃ કર્ત્તું પ્રચક્રમે ॥ ૫॥

શિવયા પરયા શક્ત્યા સંયુક્તં પરમેશ્વરમ્ ।
સઞ્ચિન્ત્ય હૃદયે પ્રીત્યા તેપે સ પરમં તપઃ ॥ ૬॥

તીવ્રેણ તપસા તસ્ય સંયુક્તસ્ય સ્વયમ્ભુવઃ ।
અચિરેણૈવ કાલેન તુતોષ સ શિવો દ્રુતમ્ ॥ ૭॥

તતઃ પૂર્ણચિદીશસ્ય મૂર્તિમાવિશ્ય કામદામ્ ।
અર્દ્ધનારીનરો ભૂત્વા તતો બ્રહ્માન્તિકં હરઃ ॥ ૮॥

તં દૃષ્ટ્વા શઙ્કરં દેવં શક્ત્યા પરમયાન્વિતમ્ ।
પ્રણમ્ય દણ્ડવદ્બ્રહ્મા સ તુષ્ટાવ કૃતાઞ્જલિઃ ॥ ૯॥

અથ દેવો મહાદેવો વાચા મેઘગભીરયા ।
સમ્ભવાય સુસમ્પ્રીતો વિશ્વકર્તા મહેશ્વરઃ ॥ ૧૦॥

ઈશ્વર ઉવાચ ।

વત્સ વત્સ મહાભાગ મમ પુત્ર પિતામહ ।
જ્ઞાતવાનસ્મિ સર્વં તત્તત્ત્વતસ્તે મનોરથમ્ ॥ ૧૧॥

પ્રજાનામેવ વૃદ્ધ્યર્થં તપસ્તપ્તં ત્વયાધુના ।
તપસા તેન તુષ્ટોઽસ્મિ દદામિ ચ તવેપ્સિતમ્ ॥ ૧૨॥

ઇત્યુક્ત્વા પરમોદારં સ્વભાવમધુરં વચઃ ।

પૃથક્ચ્યકાર વપુષો ભાગાદ્દેવીં શિવાં શિવઃ ॥ ૧૩॥

તાં દૃષ્ટ્વા પરમાં શક્તિં પૃથગ્ભૂતાં શિવાગતામ્ ।
પ્રણિપત્ય વિનીતાત્મા પ્રાર્થયામાસ તાં વિધિઃ ॥ ૧૪॥

બ્રહ્મોવાચ ।
દેવદેવેન સૃષ્ટોઽહમાદૌ ત્વત્પતિના શિવે ।
પ્રજાઃ સર્વા નિયુક્તાશ્ચ શમ્ભુના પરમાત્મના ॥ ૧૫॥

મનસા નિર્મિતાઃ સર્વે શિવે દેવાદયો મયા ।
ન વૃદ્ધિમુપગચ્છન્તિ સૃજ્યમાનાઃ પુનઃપુનઃ ॥ ૧૬॥

મિથુનપ્રભવામેવ કૃત્વા સૃષ્ટિમતઃ પરમ્ ।
સંવર્દ્ધયિતુમિચ્છામિ સર્વા એવ મમ પ્રજાઃ ॥ ૧૭॥

ન નિર્ગતં પુરા ત્વત્તો નારીણાં કુલમવ્યયમ્ ।
તેન નારીકુલં સ્રષ્ટું મમ શક્તિર્ન વિદ્યતે ॥ ૧૮॥

સર્વાસામેવ શક્તીનાં ત્વત્તઃ ખલુ સમુદ્ભવઃ ।
તસ્માત્ત્વાં પરમાં શક્તિં પ્રાર્થયામ્યખિલેશ્વરીમ્ ॥ ૧૯॥

શિવે નારીકુલં સ્રષ્ટું શક્તિં દેહિ નમોઽસ્તુ તે ।
ચરાચરજગદ્વૃદ્ધિહેતોર્માતઃ શિવપ્રિયે ॥ ૨૦॥

અન્યં ત્વત્તઃ પ્રાર્થયામિ વરં ચ વરદેશ્વરિ ।
દેહિ મે તં કૃપાં કૃત્વા જગન્માતર્નમોઽસ્તુ તે ॥ ૨૧॥

ચરાચરવિવૃદ્ધ્યર્થમીશેનૈકેન સર્વગે ।
દક્ષસ્ય મમ પુત્રસ્ય પુત્રી ભવ ભવામ્બિકે ॥ ૨૨॥

એવં સંયાચિતા દેવી બ્રહ્મણા પરમેશ્વરી ।
તથાસ્ત્વિતિ વચઃ પ્રોચ્ય તચ્છક્તિં વિધયે દદૌ ॥ ૨૩॥

તસ્માદ્ધિ સા શિવા દેવી શિવશક્તિર્જગન્મયી ।
શક્તિમેકાં ભ્રુવોર્મધ્યાત્સસર્જાત્મસમપ્રભામ્ ॥ ૨૪॥

તામાહ પ્રહસન્પ્રેક્ષ્ય શક્તિં દેવવરો હરઃ ।
કૃપાસિન્ધુર્મહેશાનો લીલાકારી ભવામ્બિકામ્ ॥ ૨૫॥

શિવ ઉવાચ ।
તપસારાધિતા દેવિ બ્રહ્મણા પરમેષ્ઠિના ।

પ્રસન્ના ભવ સુપ્રીત્યા કુરુ તસ્યાખિલેપ્સિતમ્ ॥ ૨૬॥

તામાજ્ઞાં પરમેશસ્ય શિરસા પ્રતિગૃહ્ય સા ।
બ્રહ્મણો વચનાદ્દેવી દક્ષસ્ય દુહિતાઽભવત્ ॥ ૨૭॥

દત્ત્વૈવમતુલાં શક્તિં બ્રહ્મણે સા શિવા મુને ।'
વિવેશ દેહં શમ્ભોર્હિ શમ્ભુશ્ચાન્તર્દધે પ્રભુઃ ॥ ૨૮॥

તદાપ્રભૃતિ લોકેઽસ્મિન્સ્ત્રિયા ભાગઃ પ્રકલ્પિતઃ ।
આનન્દં પ્રાપ સ વિધિઃ સૃષ્ટિર્જાતા ચ મૈથુની ॥ ૨૯॥

એતત્તે કથિતં તાત શિવરૂપં મહોત્તમમ્ ।
અર્દ્ધનારીનરાર્દ્ધં હિ મહામઙ્ગલદં સતામ્ ॥ ૩૦॥

એતદાખ્યાનમનઘં યઃ પઠેચ્છૃણુયાદપિ ।
સ ભુક્ત્વા સકલાન્ભોગાન્પ્રયાતિ પરમાં ગતિમ્ ॥ ૩૧॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં રુદ્રસંહિતાયાં શિવસ્યાર્દ્ધનારીશ્વરાવતારવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૩.૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૪. ચતુર્થોઽધ્યાયઃ । ઋષભચરિત્રવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ ચરિતં શાઙ્કરં મુદા ।
રુદ્રેણ કથિતં પ્રીત્યા બ્રહ્મણે સુખદં સદા ॥ ૧॥

શિવ ઉવાચ ।
સપ્તમે ચૈવ વારાહે કલ્પે મન્વન્તરાભિધે ।
કલ્પેશ્વરોઽથ ભગવાન્સર્વલોકપ્રકાશનઃ ॥ ૨॥

મનોર્વૈવસ્વતસ્યૈવ તે પ્રપુત્રો ભવિષ્યતિ ।
તદા ચતુર્યુગાશ્ચૈવ તસ્મિન્મન્વન્તરે વિધે ॥ ૩॥

અનુગ્રહાર્થં લોકાનાં બ્રાહ્મણાનાં હિતાય ચ ।
ઉત્પત્સ્યામિ વિધે બ્રહ્મન્દ્વાપરાખ્યયુગાન્તિકે ॥ ૪॥

યુગપ્રવૃત્ત્યા ચ તદા તસ્મિંશ્ચ પ્રથમે યુગે ।
દ્વાપરે પ્રથમે બ્રહ્મન્યદા વ્યાસઃ સ્વયમ્પ્રભુઃ ॥ ૫॥

તદાહં બ્રાહ્મણાર્થાય કલૌ તસ્મિન્યુગાન્તિકે ।
ભવિષ્યામિ શિવાયુક્તઃ શ્વેતો નામ મહામુનિઃ ॥ ૬॥

હિમવચ્છિખરે રમ્યે છાગલે પર્વતોત્તમે ।
તદા શિષ્યાઃ શિખાયુક્તા ભવિષ્યન્તિ વિધે મમ ॥ ૭॥

શ્વેતઃ શ્વેતશિખશ્ચૈવ શ્વેતાશ્વઃ શ્વેતલોહિતઃ ।
ચત્વારો ધ્યાનયોગાત્તે ગમિષ્યન્તિ પુરં મમ ॥ ૮॥

તતો ભક્તા ભવિષ્યન્તિ જ્ઞાત્વા માં તત્ત્વતોઽવ્યયમ્ ।
જન્મમૃત્યુજરાહીનાઃ પરબ્રહ્મસમાધયઃ ॥ ૯॥

દ્રષ્ટું શક્યો નરૈર્નાહમૃતે ધ્યાનાત્પિતામહ ।
દાનધર્માદિભિર્વત્સ સાધનૈઃ કર્મહેતુભિઃ ॥ ૧૦॥

દ્વિતીયે દ્વાપરે વ્યાસઃ સત્યો નામ પ્રજાપતિઃ ।
યદા તદા ભવિષ્યામિ સુતારો નામતઃ કલૌ ॥ ૧૧॥

તત્રાપિ મે ભવિષ્યન્તિ શિષ્યા વેદવિદો દ્વિજાઃ ।
દુન્દુભિઃ શતરૂપશ્ચ હૃષીકઃ કેતુમાંસ્તથા ॥ ૧૨॥

ચત્વારો ધ્યાનયોગાત્તે ગમિષ્યન્તિ પુરં મમ ।
તતો મુક્તા ભવિષ્યન્તિ જ્ઞાત્વા માં તત્ત્વતોઽવ્યયમ્ ॥ ૧૩॥

તૃતીયે દ્વાપરે ચૈવ યદા વ્યાસસ્તુ ભાર્ગવઃ ।
તદાપ્યહં ભવિષ્યામિ દમનસ્તુ યુગાન્તિકે ॥ ૧૪॥

તત્રાપિ ચ ભવિષ્યન્તિ ચત્વારો મમ પુત્રકાઃ ।
વિશોકશ્ચ વિશેષશ્ચ વિપાપઃ પાપનાશનઃ ॥ ૧૫॥

શિષ્યૈઃ સાહાયં વ્યાસસ્ય કરિષ્યે ચતુરાનન ।
નિવૃત્તિમાર્ગં સુદૃઢં વર્ત્તયિષ્યે કલાવિહ ॥ ૧૬॥

ચતુર્થે દ્વાપરે ચૈવ યદા વ્યાસોઽઙ્ગિરા સ્મૃતઃ ।
તદાપ્યહં ભવિષ્યામિ સુહોત્રો નામ નામતઃ ॥ ૧૭॥

તત્રાપિ મમ તે પુત્રાશ્ચત્વારો યોગસાધકાઃ ।
ભવિષ્યન્તિ મહાત્માનસ્તન્નામાનિ બ્રુવે વિધે ॥ ૧૮॥

સુમુખો દુર્મુખશ્ચૈવ દુર્દમો દુરતિક્રમઃ ।
શિષ્યૈઃ સાહાયં વ્યાસસ્ય કરિષ્યેઽહં તદા વિધે ॥ ૧૯॥

પઞ્ચમે દ્વાપરે ચૈવ વ્યાસસ્તુ સવિતા સ્મૃતઃ ।
તદા યોગી ભવિષ્યામિ કઙ્કો નામ મહાતપાઃ ॥ ૨૦॥

તત્રાપિ મમ તે પુત્રાશ્ચત્વારો યોગસાધકાઃ ।
ભવિષ્યન્તિ મહાત્માનસ્તન્નામાનિ શ‍ૃણુષ્વ મે ॥ ૨૧॥

સનકઃ સનાતનશ્ચૈવ પ્રભુર્યશ્ચ સનન્દનઃ ।
વિભુઃ સનત્કુમારશ્ચ નિર્મલો નિરહઙ્કૃતિઃ ॥ ૨૨॥

તત્રાપિ કઙ્કનામાહં સાહાય્યં સવિતુર્વિધે ।
વ્યાસસ્ય હિ કરિષ્યામિ નિવૃત્તિપથવર્દ્ધકઃ ॥ ૨૩॥

પરિવર્ત્તે પુનઃ ષષ્ઠે દ્વાપરે લોકકારકઃ ।
કર્તા વેદવિભાગસ્ય મૃત્યુર્વ્યાસો ભવિષ્યતિ ॥ ૨૪॥

તદાઽપ્યહં ભવિષ્યામિ લોકાક્ષિર્નામ નામતઃ ।
વ્યાસસ્ય સુસહાયાર્થં નિવૃત્તિપથવર્દ્ધનઃ ॥ ૨૫॥

તત્રાપિ શિષ્યાશ્ચત્વારો ભવિષ્યન્તિ દૃઢવ્રતાઃ ।
સુધામા વિરજાશ્ચૈવ સઞ્જયો વિજયસ્તથા ॥ ૨૬॥

સપ્તમે પરિવર્ત્તે તુ યદા વ્યાસઃ શતક્રતુઃ ।
તદાપ્યહં ભવિષ્યામિ જૈગીષવ્યો વિભુર્વિધે ॥ ૨૭॥

યોગં સન્દ્રઢયિષ્યામિ મહાયોગવિચક્ષણઃ ।
કાશ્યાં ગુહાન્તરે સંસ્થો દિવ્યદેશે કુશાસ્તરિઃ ॥ ૨૮॥

સાહાય્યં ચ કરિષ્યામિ વ્યાસસ્ય હિ શતક્રતોઃ ।
ઉદ્ધરિષ્યામિ ભક્તાંશ્ચ સંસારભયતો વિધે ॥ ૨૯॥

તત્રાપિ મમ ચત્વારો ભવિષ્યન્તિ સુતા યુગે ।
સારસ્વતશ્ચ યોગીશો મેઘવાહઃ સુવાહનઃ ॥ ૩૦॥

અષ્ટમે પરિવર્ત્તે હિ વસિષ્ઠો મુનિસત્તમઃ ।
કર્ત્તા વેદવિભાગસ્ય વેદવ્યાસો ભવિષ્યતિ ॥ ૩૧॥

તત્રાપ્યહં ભવિષ્યામિ નામતો દધિવાહનઃ ।

વ્યાસસ્ય હિ કરિષ્યામિ સાહાય્યં યોગવિત્તમ ॥ ૩૨॥

કપિલશ્ચાસુરિઃ પઞ્ચશિખઃ શાલ્વલપૂર્વકઃ ।
ચત્વારો યોગિનઃ પુત્રા ભવિષ્યન્તિ સમા મમ ॥ ૩૩॥

નવમે પરિવર્ત્તે તુ તસ્મિન્નેવ યુગે વિધે ।
ભવિષ્યતિ મુનિશ્રેષ્ઠો વ્યાસઃ સારસ્વતાહ્વયઃ ॥ ૩૪॥

વ્યાસસ્ય ધ્યાયતસ્તસ્ય નિવૃત્તિપથવૃદ્ધયે ।
તદાપ્યહં ભવિષ્યામિ ઋષભો નામતઃ સ્મૃતઃ ॥ ૩૫॥

પરાશરશ્ચ ગર્ગશ્ચ ભાર્ગવો ગિરિશસ્તથા ।
ચત્વારસ્તત્ર શિષ્યા મે ભવિષ્યન્તિ સુયોગિનઃ ॥ ૩૬॥

તૈઃ સાકં દ્રઢયિષ્યામિ યોગમાર્ગં પ્રજાપતે ।
કરિષ્યામિ સહાયં વૈ વેદવ્યાસસ્ય સન્મુને ॥ ૩૭॥

તેન રૂપેણ ભક્તાનાં બહૂનાં દુઃખિનાં વિધે ।
ઉદ્ધારં ભવતોઽહં વૈ કરિષ્યામિ દયાકરઃ ॥ ૩૮॥

સોઽવતારો વિધે મે હિ ઋષભાખ્યઃ સુયોગકૃત્ ।
સારસ્વતવ્યાસમનઃકર્ત્તા નાનોતિકારકઃ ॥ ૩૯॥

અવતારેણ મે યેન ભદ્રાયુર્નૃપબાલકઃ ।
જીવિતો હિ મૃતઃ ક્ષ્વેડદોષતો જનકોજ્ઝિતઃ ॥ ૪૦॥

પ્રાપ્તેઽથ ષોડશે વર્ષે તસ્ય રાજશિશોઃ પુનઃ ।
યયૌ તદ્વેશ્મ સહસા ઋષભઃ સ મદાત્મકઃ ॥ ૪૧॥

પૂજિતસ્તેન સ મુનિઃ સદ્રૂપશ્ચ કૃપાનિધિઃ ।
ઉપાદિદેશ તદ્ધર્માન્ રાજયોગાન્પ્રજાપતે ॥ ૪૨॥

તતઃ સ કવચં દિવ્યં શઙ્ખં ખડ્ગં ચ ભાસ્વરમ્ ।
દદૌ તસ્મૈ પ્રસન્નાત્મા સર્વશત્રુવિનાશનમ્ ॥ ૪૩॥

તદઙ્ગ ભસ્મનામૃશ્ય કૃપયા દીનવત્સલઃ ।
સ દ્વાદશસહસ્રસ્ય ગજાનાં ચ બલં દદૌ ॥ ૪૪॥

ઇતિ ભદ્રાયુષં સમ્યગનુશ્વાસ્ય સમાતૃકમ્ ।
યયૌ સ્વૈરગતિસ્તાભ્યાં પૂજિતસ્ત્વૃષભઃ પ્રભુઃ ॥ ૪૫॥

ભદ્રાયુરપિ રાજર્ષિર્જિત્વા રિપુગણાન્વિધે ।
રાજ્યં ચકાર ધર્મેણ વિવાહ્ય કીર્ત્તિમાલિનીમ્ ॥ ૪૬॥

ઇત્થમ્પ્રભાવં ઋષભોઽવતારઃ શઙ્કરસ્ય મે ।
સતાં ગતિર્દીનબન્ધુર્નવમઃ કથિતસ્તવ ॥ ૪૭॥

ઋષભસ્ય ચરિત્રં હિ પરમં પાવનં મહત્ ।
સ્વર્ગ્યં યશસ્યમાયુષ્યં શ્રોતવ્યં ચ પ્રયત્નતઃ ॥ ૪૮॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયામૃષભચરિત્રવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૩.૪॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૫. પઞ્ચમોઽધ્યાયઃ । એકોનવિંશતિશિવાવતારવર્ણનમ્ ।

શિવ ઉવાચ ।
દશમે દ્વાપરે વ્યાસસ્ત્રિધામા નામતો મુનિઃ ।
હિમવચ્છિખરે રમ્યે ભૃગુતુઙ્ગે નગોત્તમે ॥ ૧॥

તત્રાપિ મમ પુત્રાશ્ચ ભૃગ્વાદ્યાઃ શ્રુતિસમ્મિતાઃ ।
બલબન્ધુર્નરામિત્રઃ કેતુશૃઙ્ગસ્તપોધનઃ ॥ ૨॥

એકાદશે દ્વાપરે તુ વ્યાસશ્ચ ત્રિવૃતો યદા ।
ગઙ્ગાદ્વારે કલૌ નામ્ના તપોઽહં ભવિતા તદા ॥ ૩॥

લમ્બોદરશ્ચ લમ્બાક્ષઃ કેશલમ્બઃ પ્રલમ્બકઃ ।
તત્રાપિ પુત્રાશ્ચત્વારો ભવિષ્યન્તિ દૃઢવ્રતાઃ ॥ ૪॥

દ્વાદશે પરિવર્ત્તે તુ શતતેજાશ્ચ વેદકૃત્ ।
તત્રાપ્યહં ભવિષ્યામિ દ્વાપરાન્તે કલાવિહ ॥ ૫॥

હેમકઞ્ચુકમાસાદ્ય નામ્ના હ્યત્રિઃ પરિપ્લુતઃ ।
વ્યાસસ્યૈવ સહાયાર્થં નિવૃત્તિપથરોપણઃ ॥ ૬॥

સર્વજ્ઞઃ સમબુદ્ધિશ્ચ સાધ્યઃ શર્વઃ સુયોગિનઃ ।
તત્રેતિ પુત્રાશ્ચત્વારો ભવિષ્યન્તિ મહામુને ॥ ૭॥

ત્રયોદશે યુગે તસ્મિન્ધર્મો નારાયણઃ સદા ।
વ્યાસસ્તદાહં ભવિતા બલિર્નામ મહામુનિઃ ॥ ૮॥

વાલખિલ્યાશ્રમે ગન્ધમાદને પર્વતોત્તમે ।
સુધામા કાશ્યપશ્ચૈવ વસિષ્ઠો વિરજાઃ શુભાઃ ॥ ૯॥

યદા વ્યાસસ્તુ રક્ષાખ્યઃ પર્યાયે તુ ચતુર્દશે ।
વંશ આઙ્ગિરસે તત્ર ભવિતાહં ચ ગૌતમઃ ॥ ૧૦॥

તત્રાપિ મમ તે પુત્રા ભવિષ્યન્તિ કલૌ તદા ।
અત્રિર્દવશદશ્ચૈવ શ્રવણોઽથ શ્રવિષ્કટઃ ॥ ૧૧॥

વ્યાસઃ પઞ્ચદશે ત્રય્યારુણિર્વૈ દ્વાપરે યદા ।
તદાઽહં ભવિતા વેદશિરા વેદશિરસ્તથા ॥ ૧૨॥

મહાવીર્યં તદસ્ત્રં ચ વેદશીર્ષશ્ચ પર્વતઃ ।
હિમવત્પૃષ્ઠમાસાદ્ય સરસ્વત્યાસ્તથોત્તરે ॥ ૧૩॥

તત્રાપિ મમ ચત્વારો ભવિષ્યન્તિ સુતા દૃઢાઃ ।
કુણિશ્ચ કુણિબાહુશ્ચ કુશરીરઃ કુનેત્રકઃ ॥ ૧૪॥

વ્યાસો યુગે ષોડશે તુ યદા દેવો ભવિષ્યતિ ।
તદા યોગપ્રદાનાય ગોકર્ણો ભવિતા હ્યહમ્ ॥ ૧૫॥

તત્રૈવ ચ સુપુણ્યં ચ ગોકર્ણં નામ તદ્વનમ્ ।
તત્રાપિ યોગિનઃ પુત્ર ભવિષ્યન્ત્યમ્બુસમ્મિતાઃ ॥ ૧૬॥

કાશ્યપોઽપ્યુશનાશ્ચૈવ ચ્યવનોઽથ બૃહસ્પતિઃ ।
તેઽપિ તેનૈવ માર્ગેણ ગમિષ્યન્તિ શિવાલયમ્ ॥ ૧૭॥

પરિવર્ત્તે સપ્તદશે વ્યાસો દેવકૃતઞ્જયઃ ।
ગુહાવાસીતિ નામ્નાહં હિમવચ્છિખરે શુભે ॥ ૧૮॥

મહાલયે મહોત્તુઙ્ગે શિવક્ષેત્રં હિમાલયમ્ ।
ઉતથ્યો વામદેવશ્ચ મહાયોગો મહાબલઃ ॥ ૧૯॥

પરિવર્ત્તેઽષ્ટાદશે તુ યદા વ્યાસ ઋતઞ્જયઃ ।
શિખણ્ડીનામતોઽહં તદ્ધિમવચ્છિખરે શુભે ॥ ૨૦॥

સિદ્ધક્ષેત્રે મહાપુણ્યે શિખણ્ડી નામ પર્વતઃ ।
શિખણ્ડિનો વનં વાપિ યત્ર સિદ્ધનિષેવિતમ્ ॥ ૨૧॥

વાચઃશ્રવા રુચીકશ્ચ શ્યાવાસ્યશ્ચ યતીશ્વરઃ ।
એતે પુત્રા ભવિષ્યન્તિ તત્રાપિ ચ તપોધનાઃ ॥ ૨૨॥

એકોનવિંશે વ્યાસસ્તુ ભરદ્વાજો મહામુનિઃ ।
તદાપ્યહં ભવિષ્યામિ જટી માલી ચ નામતઃ ॥ ૨૩॥

હિમવચ્છિખરે તત્ર પુત્રા મેઽમ્બુધિસંહિતાઃ ।
હિરણ્યનામા કૌશલ્યો લોકાક્ષી પ્રધિમિસ્તથા ॥ ૨૪॥

પરિવર્ત્તે વિંશતિમે ભવિતા વ્યાસ ગૌતમઃ ।
તત્રાટ્ટહાસનામાઽહમટ્ટહાસપ્રિયા નરાઃ ॥ ૨૫॥

તત્રૈવ હિમવત્પૃષ્ઠે અટ્ટહાસો મહાગિરિઃ ।
દેવમાનુષયક્ષેન્દ્રસિદ્ધચારણસેવિતઃ ॥ ૨૬॥

તત્રાપિ મમ તે પુત્રા ભવિષ્યન્તિ સુયોગિનઃ ।
સુમન્તુર્બર્બરિર્વિદ્વાન્ કબન્ધઃ કુશિકન્ધરઃ ॥ ૨૭॥

એકવિંશે યુગે તસ્મિન્ વ્યાસો વાચઃ શ્રવા યદા ।
તદાહં દારુકો નામ તસ્માદ્દારુવનં શુભમ્ ॥ ૨૮॥

તત્રાપિ મમ તે પુત્રા ભવિષ્યન્તિ સુયોગિનઃ ।
પ્લક્ષો દાર્ભાયણિશ્ચૈવ કેતુમાન્ ગૌતમસ્તથા ॥ ૨૯॥

દ્વાવિંશે પરિવર્તે તુ વ્યાસઃ શુષ્માયણો યદા ।
તદાપ્યહં ભવિષ્યામિ વારાણસ્યાં મહામુનિઃ ॥ ૩૦॥

નામ્ના વૈ લાઙ્ગલી ભીમો યત્ર દેવાઃ સવાસવાઃ ।
દ્રક્ષ્યન્તિ માં કલૌ તસ્મિન્ભવં ચૈવ હલાયુધમ્ ॥ ૩૧॥

તત્રાપિ મમ તે પુત્રા ભવિષ્યન્તિ સુધાર્મિકાઃ ।
ભલ્લવી મધુપિઙ્ગશ્ચ શ્વેતકેતુસ્તથૈવ ચ ॥ ૩૨॥

પરિવર્ત્તે ત્રયોવિંશે તૃણબિન્દુર્યદા મુનિઃ ।
શ્વેતો નામ તદાઽહં વૈ ગિરૌ કાલઞ્જરે શુભે ॥ ૩૩॥

તત્રાપિ મમ તે પુત્રા ભવિષ્યન્તિ તપસ્વિનઃ ।
ઉશિકો બૃહદશ્વશ્ચ દેવલઃ કવિરેવ ચ ॥ ૩૪॥

પરિવર્ત્તે ચતુર્વિંશે વ્યાસો યક્ષો યદા વિભુઃ ।

શૂલી નામ મહાયોગી તદ્યુગે નૈમિષે તદા ॥ ૩૫॥

તત્રાપિ મમ તે શિષ્યા ભવિષ્યન્તિ તપસ્વિનઃ ।
શાલિહોત્રોઽગ્નિવેશશ્ચ યુવનાશ્વઃ શરદ્વસુઃ ॥ ૩૬॥

પઞ્ચવિંશે યદા વ્યાસઃ શક્તિર્નામ્ના ભવિષ્યતિ ।
તદાપ્યહં મહાયોગી દણ્ડી મુણ્ડીશ્વરઃ પ્રભુઃ ॥ ૩૭॥

તત્રાપિ મમ તે શિષ્યા ભવિષ્યન્તિ તપસ્વિનઃ ।
છગલઃ કુણ્ડકર્ણશ્ચ કુમ્ભાણ્ડશ્ચ પ્રવાહકઃ ॥ ૩૮॥

વ્યાસઃ પરાશરો યર્હિ ષડ્વિંશે ભવિતાપ્યહમ્ ।
પુરં ભદ્રવટં પ્રાપ્ય સહિષ્ણુર્નામ નામતઃ ॥ ૩૯॥

તત્રાપિ મમ તે શિષ્યા ભવિષ્યન્તિ તપસ્વિનઃ ।
ઉલૂકો વિદ્યુતશ્ચૈવ શમ્બૂકો હ્યાશ્વલાયનઃ ॥ ૪૦॥

સપ્તવિંશે યદા વ્યાસો જાતૂકર્ણ્યો ભવિષ્યતિ ।
પ્રભાસતીર્થમાશ્રિત્ય સોમશર્મા તદાપ્યહમ્ ॥ ૪૧॥

તત્રાપિ મમ તે શિષ્યા ભવિષ્યન્તિ તપસ્વિનઃ ।
અક્ષપાદઃ કુમારશ્ચોલૂકો વત્સસ્તથૈવ ચ ॥ ૪૨॥

અષ્ટાવિંશે દ્વાપરે તુ પરાશરસુતો હરિઃ ।
યદા ભવિષ્યામિ વ્યાસો નામ્ના દ્વૈપાયનઃ પ્રમુઃ ॥ ૪૩॥

તદા ષષ્ઠેન ચાંશેન કૃષ્ણઃ પુરુષસત્તમઃ ।
વસુદેવસુતઃ શ્રેષ્ઠો વાસુદેવો ભવિષ્યતિ ॥ ૪૪॥

તદાપ્યહં ભવિષ્યામિ યોગાત્મા યોગમાયયા ।
લોકવિસ્માપનાર્થાય બ્રહ્મચારિશરીરકઃ ॥ ૪૫॥

શ્મશાને મૃતમુત્સૃજ્ય દૃષ્ટ્વા કાયમનામયમ્ ।
બ્રાહ્મણાનાં હિતાર્થાય પ્રવિષ્ટો યોગમાયયા ॥ ૪૬॥

દિવ્યાં મેરુગુહાં પુણ્યાં ત્વયા સાર્ધં ચ વિષ્ણુના ।
ભવિષ્યામિ તદા બ્રહ્મન્ લકુલી નામ નામતઃ ॥ ૪૭॥

કાયાવતાર ઇત્યેવં સિદ્ધક્ષેત્રં પરં તદા ।
ભવિષ્યતિ સુવિખ્યાતં યાવદ્ ભૂમિર્ધરિષ્યતિ ॥ ૪૮॥

તત્રાપિ મમ તે શિષ્યા ભવિષ્યન્તિ તપસ્વિનઃ ।
કુશિકશ્ચૈવ ગર્ગશ્ચ મિત્રઃ કૌરુષ્ય એવ ચ ॥ ૪૯॥

યોગિનો બ્રાહ્મણા વેદપારગા ઊર્દ્ધ્વરેતસઃ ।
પ્રાપ્ય માહેશ્વરં યોગં ગમિષ્યન્તિ શિવં પુરમ્ ॥ ૫૦॥

વૈવસ્વતેઽન્તરે સમ્યક્ પ્રોક્તા હિ પરમાત્મના ।
યોગેશ્વરાવતારાશ્ચ સર્વાવર્તેષુ સુવ્રતાઃ ॥ ૫૧॥

વ્યાસાશ્ચૈવાષ્ટવિંશત્કા દ્વાપરે દ્વાપરે વિભો ।
યોગેશ્વરાવતારાશ્ચ પ્રારમ્ભે ચ કલૌ કલૌ ॥ ૫૨॥

યોગેશ્વરાવતારાણાં યોગમાર્ગપ્રવર્દ્ધકાઃ ।
મહાશૈવાશ્ચ ચત્વારઃ શિષ્યાઃ પ્રત્યેકમવ્યયાઃ ॥ ૫૩॥

એતે પાશુપતાઃ શિષ્યા ભસ્મોદ્ધૂલિતવિગ્રહાઃ ।
રુદ્રાક્ષમાલાભરણાસ્ત્રિપુણ્ડ્રાઙ્કિતમસ્તકાઃ ॥ ૫૪॥

શિષ્યા ધર્મરતાઃ સર્વે વેદવેદાઙ્ગપારગાઃ ।
લિઙ્ગાર્ચનરતા નિત્યં બાહ્યાભ્યન્તરતઃ સ્થિતાઃ ॥ ૫૫॥

ભક્ત્યા મયિ ચ યોગેન ધ્યાનનિષ્ઠા જિતેન્દ્રિયાઃ ।
સઙ્ખ્યયા દ્વાદશાધિક્યશતં ચ ગણિતા બુધૈઃ ॥ ૫૬॥

ઇત્યેતદ્વૈ મયા પ્રોક્તમવતારેષુ લક્ષણમ્ ।
મન્વાદિકૃષ્ણપર્યન્તમષ્ટાવિંશદ્યુગક્રમાત્ ॥ ૫૭॥

તત્ર શ્રુતિસમૂહાનાં વિધાનં બ્રહ્મલક્ષણમ્ ।
ભવિષ્યતિ તદા કલ્પે કૃષ્ણદ્વૈપાયનો યદા ॥ ૫૮॥

ઇત્યેવમુક્ત્વા બ્રહ્માણમનુગૃહ્ય મહેશ્વરઃ ।
પુનઃ સમ્પ્રેક્ષ્ય દેવેશસ્તત્રૈવાન્તરધીયત ॥ ૫૯॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં શિવાવતારોપાખ્યાને એકોનવિંશતિશિવાવતારવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૩.૫॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૬. ષષ્ઠોઽધ્યાયઃ । નન્દિકેશાવતારવર્ણનમ્ ।

અથ નન્દીશ્વરાવતારમાહ ।
સનત્કુમાર ઉવાચ ।
ભવાન્કથમનુપ્રાપ્તો મહાદેવાંશજઃ શિવમ્ ।
શ્રોતુમિચ્છામિ તત્સર્વં વક્તુમર્હસિ મે પ્રભો ॥ ૧॥

નન્દીશ્વર ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ સાવધાનતયા શ‍ૃણુ ।
યથાઽહં ચ શિવં પ્રાપ્તો મહાદેવાંશજો મુને ॥ ૨॥

પ્રજાકામઃ શિલાદોઽભૂદુક્તઃ પિતૃભિરાદરાત્ ।
તદુદ્ધર્તુમના ભક્ત્યા સમુદ્ધારમભીપ્સુભિઃ ॥ ૩॥

અધોદૃષ્ટિઃ સુધર્માત્મા શિલાદો નામ વીર્યવાન્ ।
તસ્યાસીન્મુનિકૈર્વૃત્તિઃ શિવલોકે ચ સોઽગમત્ ॥ ૪॥

શક્રમુદ્દિશ્ય સ મુનિસ્તપસ્તેપે સુદુઃસહમ્ ।
નિશ્ચલાત્મા શિલાદાખ્યો બહુકાલં દૃઢવ્રતઃ ॥ ૫॥

તપતસ્તસ્ય તપસા સન્તુષ્ટોઽભૂચ્છતક્રતુઃ ।
જગામ ચ વરં દાતું સર્વદેવપ્રભુસ્તદા ॥ ૬॥

શિલાદમાહ સુપ્રીત્યા શક્રસ્તુષ્ટોઽસ્મિ તેઽનઘ ।
તેન ત્વં મુનિશાર્દૂલ વરયસ્વ વરાનિતિ ॥ ૭॥

તતઃ પ્રણમ્ય દેવેશં સ્તુત્વા સ્તુતિભિરાદરાત્ ।
શિલાદો મુનિશાર્દૂલસ્તમાહ સુકૃતાઞ્જલિઃ ॥ ૮॥

શિલાદ ઉવાચ ।
શતક્રતો સુરેશાન સન્તુષ્ટો યદિ મે પ્રભો ।
અયોનિજં મૃત્યુહીનં પુત્રમિચ્છામિ સુવ્રતમ્ ॥ ૯॥

શક્ર ઉવાચ ।
પુત્રં દાસ્યામિ પુત્રાર્થિન્યોનિજં મૃત્યુસંયુતમ્ ।
અન્યથા તે ન દાસ્યામિ મૃત્યુહીના ન સન્તિ વૈ ॥ ૧૦॥

ન દાસ્યામિ સુતં તેઽહં મૃત્યુહીનમયોનિજમ્ ।

હરિર્વિધિશ્ચ ભગવાન્કિમુતાન્યો મહામુને ॥ ૧૧॥

તાવપિ ત્રિપુરાર્યઙ્ગસમ્ભવૌ મરણાન્વિતૌ ।
તયોરપ્યાયુષાં માનં કથિતં નિગમે પૃથક્ ॥ ૧૨॥

તસ્માદયોનિજે પુત્રે મૃત્યુહીને પ્રયત્નતઃ ।
પરિત્યજાશાં વિપ્રેન્દ્ર ગૃહાણાત્મક્ષમં સુતમ્ ॥ ૧૩॥

કિન્તુ દેવેશ્વરો રુદ્રઃ પ્રસીદતિ મહેશ્વરઃ ।
સુદુર્લભો મૃત્યુહીનસ્તવ પુત્રો હ્યયોનિજઃ ॥ ૧૪॥

અહં ચ વિષ્ણુર્ભગવાન્ દ્રુહિણશ્ચ મહામુને ।
અયોનિજં મૃત્યુહીનં પુત્રં દાતું ન શક્નુમઃ ॥ ૧૫॥

આરાધય મહાદેવં તત્પુત્રવિનિકામ્યયા ।
સર્વેશ્વરો મહાશક્તઃ સ તે પુત્રં પ્રદાસ્યતિ ॥ ૧૬॥

નન્દીશ્વર ઉવાચ ।
એવં વ્યાહૃત્ય વિપ્રેન્દ્રમનુગૃહ્ય ચ તં ઘૃણી ।
દેવૈર્વૃતઃ સુરેશાનઃ સ્વલોકં સમગાન્મુને ॥ ૧૭॥

ગતે તસ્મિંશ્ચ વરદે સહસ્રાક્ષે શિલાશનઃ ।
આરાધયન્મહાદેવં તપસાઽતોષયદ્ભવમ્ ॥ ૧૮॥

અથ તસ્યૈવમનિશં તત્પરસ્ય દ્વિજસ્ત વૈ ।
દિવ્યં વર્ષસહસ્રં તુ ગતં ક્ષણમિવાદ્ભુતમ્ ॥ ૧૯॥

વલ્મીકેન વૃતાઙ્ગશ્ચ લક્ષકોટગણૈર્મુનિઃ ।
વજ્રસૂચીમુખૈશ્ચાન્યૈ રક્તભુગ્ભિશ્ચ સર્વતઃ ॥ ૨૦॥

નિર્માંસરુધિરત્વગ્વૈ બિલે તસ્મિન્નવસ્થિતઃ ।
અસ્થિશેષોઽભવત્પશ્ચાચ્છિલાદો મુનિસત્તમઃ ॥ ૨૧॥

તુષ્ટઃ પ્રભુસ્તદા તસ્મૈ દર્શયામાસ સ્વાં તનુમ્ ।
દિવ્યાં દિવ્યગુણૈર્યુક્તામલભ્યાં વામબુદ્ધિભિઃ ॥ ૨૨॥

દિવ્યવર્ષસહસ્રેણ તપ્યમાનાય શૂલધૃક્ ।
સર્વદેવાધિપસ્તસ્મૈ વરદોઽસ્મીત્યભાષત ॥ ૨૩॥

મહાસમાધિસંલીનઃ સ શિલાદો મહામુનિઃ ।
નાશ ૃણોત્તદ્ગિરં શમ્ભોર્ભક્ત્યધીનતરસ્ય વૈ ॥ ૨૪॥

યદા સ્પૃષ્ટો મુનિસ્તેન કરેણ ત્રિપુરારિણા ।
તદૈવ મુનિશાર્દૂલ ઉત્સસર્જ તપઃક્રમમ્ ॥ ૨૫॥

અથોન્મીલ્ય મુનિર્નેત્રે સોમં શમ્ભું વિલોકયન્ ।
દ્રુતં પ્રણમ્ય સમુદા પાદયોર્ન્યપતન્મુને ॥ ૨૬॥

હર્ષગદ્ગદયા વાચા નતસ્કન્ધઃ કૃતાઞ્જલિઃ ।
પ્રસન્નાત્મા શિલાદઃ સ તુષ્ટાવ પરમેશ્વરમ્ ॥ ૨૭॥

તતઃ પ્રસન્નો ભગવાન્દેવદેવસ્ત્રિલોચનઃ ।
વરદોઽસ્મીતિ તં પ્રાહ શિલાદં મુનિપુઙ્ગવમ્ ॥ ૨૮॥

તપસાનેન કિં કાર્યં ભવતે હિ મહામતે ।
દદામિ પુત્રં સર્વજ્ઞં સર્વશાસ્ત્રાર્થપારગમ્ ॥ ૨૯॥

તતઃ પ્રણમ્ય દેવેશં તચ્છ્રુત્વા ચ શિલાશનઃ ।
હર્ષગદ્ગદયા વાચોવાચ સોમવિભૂષણમ્ ॥ ૩૦॥

શિલાદ ઉવાચ ।
મહેશ યદિ તુષ્ટોઽસિ યદિ વા વરદશ્ચ મે ।
ઇચ્છામિ ત્વત્સમં પુત્રં મૃત્યુહીનમયોનિજમ્ ॥ ૩૧॥

નન્દીશ્વર ઉવાચ ।
એવમુક્તસ્તતો દેવસ્ત્ર્યમ્બકસ્તેન શઙ્કરઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મા શિલાદં મુનિસત્તમમ્ ॥ ૩૨॥

॥ શિવ ઉવાચ ।
પૂર્વમારાધિતો વિપ્ર બ્રહ્મણાઽહં તપોધન ।
તપસા ચાવતારાર્થં મુનિભિશ્ચ સુરોત્તમૈઃ ॥ ૩૩॥

તવ પુત્રો ભવિષ્યામિ નન્દી નામ્ના ત્વયોનિજઃ ।
પિતા ભવિષ્યસિ મમ પિતુર્વૈ જગતાં મુને ॥ ૩૪॥

નન્દીશ્વર ઉવાચ ।
એવમુક્ત્વા મુનિં પ્રેક્ષ્ય પ્રણિપત્યાસ્થિતં ઘૃણી ।
સોમસ્તૂર્ણં તમાદિશ્ય તત્રૈવાન્તર્દધે હરઃ ॥ ૩૫॥

ગતે તસ્મિન્મહાદેવે સ શિલાદો મહામુનિઃ ।

સ્વમાશ્રમમુપાગમ્ય ઋષિભ્યોઽકથયત્તતઃ ॥ ૩૬॥

કિયતા ચૈવ કાલેન તદાસૌ જનકઃ સ મે ।
યજ્ઞાઙ્ગણં ચકર્ષાશુ યજ્ઞાર્થં યજ્ઞવિત્તમઃ ॥ ૩૭॥

તતઃ ક્ષણાદહં શમ્ભોસ્તનુજસ્તસ્ય ચાજ્ઞયા ।
સ જાતઃ પૂર્વમેવાહં યુગાન્તાગ્નિસમપ્રભઃ ॥ ૩૮॥

અવર્ષંસ્તદા પુષ્કરાવર્તકાદ્યા
જગુઃ ખેચરાઃ કિન્નરાઃ સિદ્ધસાધ્યાઃ ।
શિલાદાત્મજત્વં ગતે મય્યૃષીન્દ્રાઃ
સમન્તાચ્ચ વૃષ્ટિં વ્યધુઃ કૌસુમીં તે ॥ ૩૯॥

અથ બ્રહ્માદયો દેવા દેવપત્ન્યશ્ચ સર્વશઃ ।
તત્રાજગ્મુશ્ચ સુપ્રીત્યા હરિશ્ચૈવ શિવોઽમ્બિકા ॥ ૪૦॥

તદોત્સવો મહાનાસીન્નનૃતુશ્ચાપ્સરોગણાઃ ।
આદૃત્ય માં તથાલિઙ્ગ્ય તુષ્ટુવુર્હર્ષિતાશ્ચ તે ॥ ૪૧॥

સુપ્રશસ્ય શિલાદં તં સ્તુત્વા ચ સુસ્તવૈઃ શિવૌ ।
સર્વે જગ્મુશ્ચ ધામાનિ શિવાવપ્યખિલેશ્વરૌ ॥ ૪૨॥

શિલાદોઽપિ ચ માં દૃષ્ટ્વા કાલસૂર્યાનલપ્રભમ્ ।
ત્ર્યક્ષં ચતુર્ભુજં બાલં જટામુકુટધારિણમ્ ॥ ૪૩॥

ત્રિશૂલાદ્યાયુધં દીપ્તં સર્વથા રુદ્રરૂપિણમ્ ।
મહાનન્દભરઃ પ્રીત્યા પ્રણમ્યં પ્રણનામ ચ ॥ ૪૪॥

શિલાદ ઉવાચ ।
ત્વયાહં નન્દિતો યસ્માન્નન્દી નામ્ના સુરેશ્વર ।
તસ્માત્ત્વાં દેવમાનન્દં નમામિ જગદીશ્વરમ્ ॥ ૪૫॥

નન્દીશ્વર ઉવાચ ।
મયા સહ પિતા હૃષ્ટઃ સુપ્રણમ્ય મહેશ્વરમ્ ।
ઉટજં સ્વં જગામાશુ નિધિં લબ્ધ્વેવ નિર્ધનઃ ॥ ૪૬॥

યદા ગતોઽહમુટજં શિલાદસ્ય મહામુને ।
તદાહં તાદૃશં રૂપં ત્યક્ત્વા માનુષ્યમાસ્થિતઃ ॥ ૪૭॥

માનુષ્યમાસ્થિતં દૃષ્ટ્વા પિતા મે લોકપૂજિતઃ ।

વિલલાપાતિદુઃખાર્ત્તઃ સ્વજનૈશ્ચ સમાવૃતઃ ॥ ૪૮॥

જાતકર્માદિકાન્યેવ સર્વાણ્યપિ ચકાર મે ।
શાલઙ્કાયનપુત્રો વૈ શિલાદઃ પુત્રવત્સલઃ ॥ ૪૯॥

વેદાનધ્યાપયામાસ સાઙ્ગોપાઙ્ગાનશેષતઃ ।
શાસ્ત્રાણ્યન્યાન્યપિ તથા પઞ્ચવર્ષે પિતા ચ મામ્ ॥ ૫૦॥

સમ્પૂર્ણે સપ્તમે વર્ષે મિત્રાવરુણસંજ્ઞકૌ ।
મુની તસ્યાશ્રમં પ્રાપ્તૌ દ્રષ્ટું માં ચાજ્ઞયા વિભોઃ ॥ ૫૧॥

સત્કૃતૌ મુનિના તેન સૂપવિષ્ટૌ મહામુની ।
ઊચતુશ્ચ મહાત્માનૌ માં નિરીક્ષ્ય મુહુર્મુહુઃ ॥ ૫૨॥

મિત્રાવરુણાવૂચતુઃ ।
તાત નન્દી તવાલ્પાયુઃ સર્વશાસ્ત્રાર્થપારગઃ ।
ન દૃષ્ટમેવ ચાપશ્યં હ્યાયુર્વર્ષાદતઃ પરમ્ ॥ ૫૩॥

વિપ્રયોરિત્યુક્તવતોઃ શિલાદઃ પુત્રવત્સલઃ ।
તમાલિઙ્ગ્ય ચ દુઃખાર્તો રુરોદાતીવ વિસ્વરમ્ ॥ ૫૪॥

મૃતવત્પતિતં દૃષ્ટ્વા પિતરં ચ પિતામહમ્ ।
પ્રત્યવોચત્પ્રસન્નાત્મા સ્મૃત્વા શિવપદામ્બુજમ્ ॥ ૫૫॥

કેન ત્વં તાત દુઃખેન વેપમાનશ્ચ રોદિષિ ।
દુઃખં તે કુત ઉત્પન્નં જ્ઞાતુમિચ્છામિ તત્ત્વતઃ ॥ ૫૬॥

પિતોવાચ ।
તવાલ્પમૃત્યુદુઃખેન દુઃખિતોઽતીવ પુત્રક ।
કો મે દુઃખં હરતુ વૈ શરણં તં પ્રયામિ હિ ॥ ૫૭॥

પુત્ર ઉવાચ ।
દેવો વા દાનવો વાપિ યમઃ કાલોઽથવાપિ હિ ।
ઋધ્યેયુર્યદ્યપિ હ્યેતે મામન્યેઽપિ જનાસ્તથા ॥ ૫૮॥

અથાપિ ચાલ્પમૃત્યુર્મે ન ભવિષ્યતિ મા તુદઃ ।
સત્યં બ્રવીમિ જનક શપથં તે કરોમ્યહમ્ ॥ ૫૯॥

પિતોવાચ ।
કિં તપઃ કિં પરિજ્ઞાનં કો યોગશ્ચ પ્રભુશ્ચ તે ।

યેન ત્વં દારુણં દુઃખં વઞ્ચયિષ્યસિ પુત્ર મે ॥ ૬૦॥

॥ પુત્ર ઉવાચ ।
ન તાત તપસા મૃત્યું વઞ્ચયિષ્યે ન વિદ્યયા ।
મહાદેવસ્ય ભજનાન્મૃત્યું જેષ્યામિ નાન્યથા ॥ ૬૧॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વાહં પિતુઃ પાદૌ પ્રણમ્ય શિરસા મુને ।
પ્રદક્ષિણીકૃત્ય ચ તમગચ્છં વનમુત્તમમ્ ॥ ૬૨॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં નન્દિકેશાવતારવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૩.૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૭. સપ્તમોઽધ્યાયઃ । નન્દિકેશ્વરાવતારાભિષેક વિવાહવર્ણનમ્ ।

॥ નન્દિકેશ્વર ઉવાચ ।
તત્ર ગત્વા મુનેઽહં વૈ સ્થિત્વૈકાન્તસ્થલે સુધીઃ ।
અતપં તપ ઉગ્રં સન્મુનીનામપિ દુષ્કરમ્ ॥ ૧॥

હૃત્પુણ્ડરીકસુષિરે ધ્યાત્વા દેવં ત્રિયમ્બકમ્ ।
ત્ર્યક્ષં દશભુજં શાન્તં પઞ્ચવક્ત્રં સદાશિવમ્ ॥ ૨॥

રુદ્રજાપ્યમકાર્ષં વૈ પરમધ્યાનમાસ્થિતઃ ।
સરિતશ્ચોત્તરે પુણ્યે હ્યેકચિત્તઃ સમાહિતઃ ॥ ૩॥

તસ્મિઞ્જાપ્યેઽથ સમ્પ્રીતઃ સ્થિતં માં પરમેશ્વરઃ ।
તુષ્ટોઽબ્રવીન્મહાદેવઃ સોમઃ સોમાર્દ્ધભૂષણઃ ॥ ૪॥

શિવ ઉવાચ ।
શૈલાદે વરદોઽહં તે તપસાનેન તોષિતઃ ।
સાધુ તપ્તં ત્વયા ધીમન્ બ્રૂહિ યત્તે મનોગતમ્ ॥ ૫॥

સ એવમુક્તો દેવેન શિરસા પાદયોર્નતઃ ।
અસ્તવં પરમેશાનં જરાશોકવિનાશનમ્ ॥ ૬॥

અથ માં નન્દિનં શમ્ભુર્ભક્ત્યા પરામયા યુતમ્ ।
અશ્રુપૂર્ણેક્ષણં સમ્યક્ પાદયોઃ શિરસા નતમ્ ॥ ૭॥

ઉત્થાપ્ય પરમેશાનઃ પસ્પર્શ પરમાર્તિહા ।
કરાભ્યાં સમ્મુખાભ્યાં તુ સઙ્ગૃહ્ય વૃષભધ્વજઃ ॥ ૮॥

નિરીક્ષ્ય ગણપાંશ્ચૈવ દેવીં હિમવતઃ સુતામ્ ।
ઉવાચ માં કૃપાદૃષ્ટ્યા સમીક્ષ્ય જગતાં પતિઃ ॥ ૯॥

વત્સ નન્દિન્ મહાપ્રાજ્ઞ મૃત્યોર્ભીતિઃ કુતસ્તવ ।
મયૈવ પ્રેષિતૌ વિપ્રૌ મત્સમસ્ત્વં ન સંશયઃ ॥ ૧૦॥

અમરો જરયા ત્યક્તોઽદુઃખી ગણપતિઃ સદા ।
અવ્યયશ્ચાક્ષયશ્ચેષ્ટઃ સપિતા સસુહૃજ્જનઃ ॥ ૧૧॥

મદ્બલઃ પાર્શ્વગો નિત્યં મમેષ્ટો ભવિતાનિશમ્ ।
ન જરા જન્મ મૃત્યુર્વૈ મત્પ્રસાદાદ્ભવિષ્યતિ ॥ ૧૨॥

નન્દીશ્વર ઉવાચ ।
એવમુક્ત્વા શિરોમાલાં કુશેશયમયીં નિજામ્ ।
સમુન્મુચ્ય બબન્ધાશુ મમ કણ્ઠે કૃપાનિધિઃ ॥ ૧૩॥

તયાહં માલયા વિપ્ર શુભયા કણ્ઠસક્તયા ।
ત્ર્યક્ષો દશભુજશ્ચાસં દ્વિતીય ઇવ શઙ્કરઃ ॥ ૧૪॥

તત એવ સમાદાય હસ્તેન પરમેશ્વરઃ ।
ઉવાચ બ્રૂહિ કિં તેઽદ્ય દદામિ વરમુત્તમમ્ ॥ ૧૫॥

તતો જટાશ્રિતં વારિ ગૃહીત્વા હારનિર્મલમ્ ।
ઉક્ત્વા નદી ભવેતીહ વિસસર્જ વૃષધ્વજઃ ॥ ૧૬॥

તતઃ પઞ્ચમિતા નદ્યઃ પ્રાવર્તન્ત શુભાવહાઃ ।
સુતોયાશ્ચ મહાવેગા દિવ્યરૂપા ચ સુન્દરીઃ ॥ ૧૭॥

જટોદકા ત્રિસ્રોતાશ્ચ વૃષધ્વનિરિતીવ હિ ।
સ્વર્ણોદકા જમ્બુનદી પઞ્ચ નદ્યઃ પ્રકીર્તિતાઃ ॥ ૧૮॥

એતત્પઞ્ચનદં નામ શિવપૃષ્ઠતમં શુભમ્ ।
જપેશ્વરસમીપે તુ પવિત્રં પરમં મુને ॥ ૧૯॥

યઃ પઞ્ચનદમાસાદ્ય સ્નાત્વા જપ્વેશ્વરેશ્વરમ્ ।

પૂજયેચ્છિવસાયુજ્યં પ્રયાત્યેવ ન સંશયઃ ॥ ૨૦॥

અથ શમ્ભુરુવાચોમામભિષિઞ્ચામિ નન્દિનમ્ ।
ગણેન્દ્રં વ્યાહરિષ્યામિ કિં વા ત્વં મન્યસેઽવ્યયે ॥ ૨૧॥

ઉમોવાચ ।
દાતુમર્હસિ દેવેશ નન્દિને પરમેશ્વર ।
મહાપ્રિયતમો નાથ શૈલાદિસ્તનયો મમ ॥ ૨૨॥

નન્દીશ્વર ઉવાચ ।
તતઃ સ શઙ્કરઃ સ્વીયાન્સસ્માર ગણપાન્વરાન્ ।
સ્વતન્ત્રઃ પરમેશાનઃ સર્વદો ભક્તવત્સલઃ ॥ ૨૩॥

સ્મરણાદેવ રુદ્રસ્ય સમ્પ્રાપ્તાશ્ચ ગણેશ્વરાઃ ।
અસઙ્ખ્યાતા મહામોદાઃ શઙ્કરાકૃતયોઽખિલાઃ ॥ ૨૪॥

તે ગણેશાઃ શિવં દેવીં પ્રણમ્યાહુઃ શુભં વચઃ ।
તે પ્રણમ્ય કરૌ બદ્ધ્વા નતસ્કન્ધા મહાબલાઃ ॥ ૨૫॥

ગણેશા ઊચુઃ ।
કિમર્થં ચ સ્મૃતા દેવ હ્યાજ્ઞાપય મહાપ્રભો ।
કિઙ્કરાન્નઃ સમાયાતાંસ્ત્રિપુરાર્દન કામદ ॥ ૨૬॥

કિં સાગરાન્ શોષયામો યમં વા સહ કિઙ્કરૈઃ ।
હન્મો મૃત્યું મહામૃત્યું વિશેષં વૃદ્ધપદ્મજમ્ ॥ ૨૭॥

બદ્ધ્વેન્દ્રં સહ દેવૈશ્ચ વિષ્ણું વા પાર્ષદૈઃ સહ ।
આનયામઃ સુસઙ્ક્રુદ્ધાન્દૈત્યાન્વા દાનવૈઃ સહ ॥ ૨૮॥

કસ્યાદ્ય વ્યસનં ઘોરં કરિષ્યામસ્તવાજ્ઞયા ।
કસ્ય વાદ્યોત્સવો દેવ સર્વકામસમૃદ્ધયે ॥ ૨૯॥

નન્દીશ્વર ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષાં ગણાનાં વીરવાદિનામ્ ।
ઉવાચ તાન્સ પ્રશંસ્ય ગણેશાન્પરમેશ્વરઃ ॥ ૩૦॥

શિવ ઉવાચ ।
નન્દીશ્વરોઽયં પુત્રો મે સર્વેષામીશ્વરેશ્વરઃ ।
પ્રિયો ગણાગ્રણીઃ સર્વૈઃ ક્રિયતાં વચનં મમ ॥ ૩૧॥

સર્વે પ્રીત્યાભિષિઞ્ચધ્વં મદ્ગણાનાં ગતિં પતિમ્ ।
અદ્યપ્રભૃતિ યુષ્માકમયં નન્દીશ્વરઃ પ્રભુઃ ॥ ૩૨॥

નન્દીશ્વર ઉવાચ ।
એવમુક્તાઃ શઙ્કરેણ ગણપાઃ સર્વ એવ તે ।
એવમસ્ત્વિતિ સમ્પ્રોચ્ય સમ્ભારાનાહરઁસ્તતઃ ॥ ૩૩॥

તતો દેવાશ્ચ સેન્દ્રાશ્ચ નારાયણમુખાસ્તથા ।
મુનયઃ સર્વતો લોકા આજગ્મુર્મુદિતાનનાઃ ॥ ૩૪॥

પિતામહોઽપિ ભગવન્નિયોગાચ્છઙ્કરસ્ય વૈ ।
ચકાર નન્દિનઃ સર્વમભિષેકં સમાહિતઃ ॥ ૩૫॥

તતો વિષ્ણુસ્તતઃ શક્રો લોકપાલાસ્તથૈવ ચ ।
ઋષયસ્તુષ્ટુવુશ્ચૈવ પિતામહપુરોગમાઃ ॥ ૩૬॥

સ્તુતિમત્સુ તતસ્તેષુ વિષ્ણુઃ સર્વજગત્પતિઃ ।
શિરસ્યઞ્જલિમાધાય તુષ્ટાવ ચ સમાહિતઃ ॥ ૩૭॥

પ્રાઞ્જલિઃ પ્રણતો ભૂત્વા જયશબ્દં ચકાર ચ ।
તતો ગણાધિપાઃ સર્વ તતો દેવાસ્તતોઽસુરાઃ ॥ ૩૮॥

એવં સ્તુતશ્ચાભિષિક્તો દેવૈઃ સબ્રહ્મકૈસ્તદા ।
નન્દીશ્વરોહં વિપ્રેન્દ્ર નિયોગાત્પ રમેશિતુઃ ॥ ૩૯॥

ઉદ્વાહશ્ચ કૃતસ્તત્ર નિયોગાત્પરમેષ્ઠિનઃ ।
મહોત્સવયુતઃ પ્રીત્યા વિષ્ણુબ્રહ્માદિભિર્મમ ॥ ૪૦॥

મરુતાં ચ સુતા દેવી સુયશાસ્તુ મનોહરા ।
પત્ની સા મેઽભવદ્દિવ્યા મનોનયનનન્દિની ॥ ૪૧॥

લબ્ધં શશિપ્રભં છત્રં તયા તત્ર વિભૂષિતમ્ ।
ચામરૈશ્ચામરાસક્તહસ્તાગ્રૈઃ સ્ત્રીગણૈર્યુતમ્ ॥ ૪૨॥

સિંહાસનં ચ પરમં તયા ચાધિષ્ઠિતં મયા ।
અલઙ્કૃતો મહાલક્ષ્મ્યા મુકુટાદ્યૈઃ સુભૂષણૈઃ ॥ ૪૩॥

લબ્ધો હારશ્ચ પરમો દેવ્યાઃ કણ્ઠગતસ્તથા ।
વૃષેન્દ્રશ્ચ શિતો નાગસ્સિંહઃ સિંહધ્વજસ્તથા ॥ ૪૪॥

રથશ્ચ હેમહારશ્ચ ચન્દ્રબિમ્બસમઃ શુભઃ ।

અન્યાન્યપિ ચ વસ્તૂનિ લબ્ધાનિ હિ મયા મુને ॥ ૪૫॥

એવં કૃતવિવાહોઽહં તયા પત્ન્યા મહામુને ।
પાદૌ વવન્દે શમ્ભોશ્ચ શિવાયા બ્રહ્મણો હરેઃ ॥ ૪૬॥

તથાવિધં ત્રિલોકેશઃ સપત્નીકં ચ માં પ્રભુઃ ।
પ્રોવાચ પરયા પ્રીત્યા સ શિવો ભક્તવત્સલઃ ॥ ૪૭॥

ઈશ્વર ઉવાચ ।
શ ृણુ સત્પુત્ર તાતસ્ત્વં સુયશેયં તવ પ્રિયા ।
દદામિ તે વરં પ્રીત્યા યત્તે મનસિ વાઞ્છિતમ્ ॥ ૪૮॥

સદાઽહં તવ નન્દીશ સન્તુષ્ટોઽસ્મિ ગણેશ્વર ।
દેવ્યા ચ સહિતો વત્સ શ ृણુ મે પરમં વચઃ ॥ ૪૯॥

સદેષ્ટશ્ચ વિશિષ્ટશ્ચ પરમૈશ્વર્યસંયુતઃ ।
મહાયોગી મહેષ્વાસઃ સપિતા સપિતામહઃ ॥ ૫૦॥

અજેયઃ સર્વજેતા ચ સદા પૂજ્યો મહાબલઃ ।
અહં યત્ર ભવાંસ્તત્ર યત્ર ત્વં તત્ર ચાપ્યહમ્ ॥ ૫૧॥

અયં ચ તે પિતા પુત્ર પરમૈશ્વર્યસંયુતઃ ।
ભવિષ્યતિ ગણાધ્યક્ષો મમ ભક્તો મહાબલઃ ॥ ૫૨॥

પિતામહોઽપિ તે વત્સ તથાસ્તુ નિયમા ઇમે ।
મત્સમીપં ગમિષ્યન્તિ મયા દત્તવરાસ્તથા ॥ ૫૩॥

નન્દીશ્વર ઉવાચ ।
તતો દેવી મહાભાગા નન્દિનં વરદાબ્રવીત્ ।
વરં બ્રૂહીતિ માં પુત્ર સર્વાન્કામાન્યથેપ્સિતાન્ ॥ ૫૪॥

તચ્છ્રુત્વા વચનં દેવ્યાઃ પ્રાવોચત્સાઞ્જલિસ્તદા ।
ભક્તિર્ભવતુ મે દેવિ પાદયોસ્તે સદા વરા ॥ ૫૫॥

શ્રુત્વા મમ વચો દેવી હ્યેવમસ્ત્વિતિ સાબ્રવીત્ ।
સુયશાં તાં ચ સુપ્રીત્યા નન્દિપ્રિયતમાં શિવામ્ ॥ ૫૬॥

દેવ્યુવાચ ।
વત્સે વરં યથેષ્ટં હિ ત્રિનેત્રા જન્મવર્જિતા ।
પુત્રપૌત્રૈસ્તુ ભક્તિર્મે તથા ચ ભર્તુરેવ હિ ॥ ૫૭॥

નન્દ્યુવાચ ।
તદા બ્રહ્મા ચ વિષ્ણુશ્ચ સર્વે દેવગણાશ્ચ વૈ ।
તાભ્યાં વરાન્દદુઃ પ્રીત્યા સુપ્રસન્નાઃ શિવાજ્ઞયા ॥ ૫૮॥

સાન્વયં માં ગૃહીત્વેશસ્તતઃ સમ્બન્ધિબાન્ધવૈઃ ।
આરુહ્ય વૃષમીશાનો ગતો દેવ્યા નિજં ગૃહમ્ ॥ ૫૯॥

વિષ્ણ્વાદયઃ સુરાઃ સર્વે પ્રશંસન્તો હ્યમી તદા ।
સ્વધામાનિ યયુઃ પ્રીત્યા સંસ્તુવન્તઃ શિવં શિવમ્ ॥ ૬૦॥

ઇતિ તે કથિતો વત્સ સ્વાવતારો મહામુને ।
સદાનન્દકરઃ પુંસાં શિવભક્તિપ્રવર્દ્ધનઃ ॥ ૬૧॥

ય ઇદં નન્દિનો જન્મ વરદાનં તથા મમ ।
અભિષેકં વિવાહં ચ શ‍ૃણુયાચ્છ્રાવયેત્તથા ॥ ૬૨॥

પઠેદ્વા પાઠયેદ્વાપિ શ્રદ્ધાવાન્ભક્તિસંયુતઃ ।
ઇહ સર્વસુખં ભુક્ત્વા પરત્ર લભતે ગતિમ્ ॥ ૬૩॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં નન્દિકેશ્વરાવતારાભિષેક વિવાહવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૩.૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૮. અષ્ટમોઽધ્યાયઃ । ભૈરવાવતારવર્ણનમ્ ।

અથ ભૈરવાવતારમાહ ।
નન્દીશ્વર ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ શ‍ૃણુ ત્વં ભૈરવીં કથામ્ ।
યસ્યાઃ શ્રવણમાત્રેણ શૈવી ભક્તિર્દૃઢા ભવેત્ ॥ ૧॥

ભૈરવઃ પૂર્ણરૂપો હિ શઙ્કરસ્ય પરાત્મનઃ ।
મૂઢાસ્તં વૈ ન જાનન્તિ મોહિતાઃ શિવમાયયા ॥ ૨॥

સનત્કુમાર નો વેત્તિ મહિમાનં મહેશિતુઃ ।

ચતુર્ભુજોઽપિ વિષ્ણુર્વૈ ચતુર્વક્ત્રોઽપિ વૈ વિધિઃ ॥ ૩॥

ચિત્રમત્ર ન કિઞ્ચિદ્વૈ દુર્જ્ઞેયા ખલુ શામ્ભવી ।
તયા સમ્મોહિતાઃ સર્વે નાર્ચયન્ત્યપિ તં પરમ્ ॥ ૪॥

વેદયેદ્યદિ વાત્માનં સ એવ પરમેશ્વરઃ ।
તદા વિદન્તિ તે સર્વે સ્વેચ્છયા ન હિ કેઽપિ તમ્ ॥ ૫॥

સર્વગોઽપિ મહેશાનો નેક્ષ્યતે મૂઢબુદ્ધિભિઃ ।
દેવવદ્ બુધ્યતે લોકે યોઽતીતો મનસાં ગિરામ્ ॥ ૬॥

અત્રેતિહાસં વક્ષ્યેઽહં પરમર્ષે પુરાતનમ્ ।
શ‍ૃણુ તં શ્રદ્ધયા તાત પરમં જ્ઞાનકારણમ્ ॥ ૭॥

મેરુશ‍ૃઙ્ગેઽદ્ભુતે રમ્યે સ્થિતં બ્રહ્માણમીશ્વરમ્ ।
જગ્મુર્દેવર્ષયઃ સર્વે સુતત્ત્વં જ્ઞાતુમિચ્છયા ॥ ૮॥

તત્રાગત્ય વિધિં નત્વા પપ્રચ્છુસ્તે મહાદરાત્ ।
કૃતાઞ્જલિપુટાઃ સર્વે નતસ્કન્ધા મુનીશ્વરાઃ ॥ ૯॥

દેવર્ષય ઊચુઃ ।
દેવદેવ પ્રજાનાથ સૃષ્ટિકૃલ્લોકનાયક ।
તત્ત્વતો વદ ચાસ્મભ્યં કિમેકં તત્ત્વમવ્યયમ્ ॥ ૧૦॥

નન્દીશ્વર ઉવાચ ।
સ માયયા મહેશસ્ય મોહિતઃ પદ્મસમ્ભવઃ ।
અવિજ્ઞાય પરં ભાવં સમ્ભાવં પ્રત્યુવાચ હ ॥ ૧૧॥

બ્રહ્મોવાચ ।
હે સુરા ઋષયઃ સર્વે સુમત્યા શ‍ૃણુતાદરાત્ ।
વચ્મ્યહં પરમં તત્ત્વમવ્યયં વૈ યથાર્થતઃ ॥ ૧૨॥

જગદ્યોનિરહં ધાતા સ્વયમ્ભૂરજ ઈશ્વરઃ ।
અનાદિભાગહં બ્રહ્મ હ્યેક આત્મા નિરઞ્જનઃ ॥ ૧૩॥

પ્રવર્તકો હિ જગતામહમેવ નિવર્ત્તકઃ ।
સંવર્તકો મદધિકો નાન્યઃ કશ્ચિત્સુરોત્તમાઃ ॥ ૧૪॥

નન્દીશ્વર ઉવાચ ।
તસ્યૈવં વદતો ધાતુર્વિષ્ણુસ્તત્ર સ્થિતો મુને ।

પ્રોવાચ પ્રહસન્વાક્યં સઙ્ક્રુદ્ધો મોહિતોઽજયા ॥ ૧૫॥

ન ચૈતદુચિતા બ્રહ્મન્યોગયુક્તસ્ય મૂર્ખતા ।
અવિજ્ઞાય પરં તત્ત્વં વૃથૈતત્તે નિગદ્યતે ॥ ૧૬॥

કર્તાઽહં સર્વલોકાનાં પરમાત્મા પરઃ પુમાન્ ।
યજ્ઞો નારાયણો દેવો માયાધીશઃ પરાગતિઃ ॥ ૧૭॥

મમાજ્ઞયા ત્વયા બ્રહ્મન્ સૃષ્ટિરેષા વિધીયતે ।
જગતાં જીવનં નૈવ મામનાદૃત્ય ચેશ્વરમ્ ॥ ૧૮॥

એવં વિપ્રકૃતૌ મોહાત્પરસ્પરજયૈષિણૌ ।
પ્રોચતુર્નિગમાંશ્ચાત્ર પ્રમાણે સર્વથા તનૌ ॥ ૧૯॥

પ્રષ્ટવ્યાસ્તે વિશેષેણ સ્થિતા મૂર્તિધરાશ્ચ તે ।
પપ્રચ્છતુઃ પ્રમાણજ્ઞાનિત્યુક્ત્વા ચતુરોઽપિ તાન્ ॥ ૨૦॥

વિધિવિષ્ણૂ ઊચતુઃ ।
વેદાઃ પ્રમાણં સર્વત્ર પ્રતિષ્ઠાં પરમામિતાઃ ।
યૂયં વદત વિશ્રબ્ધં કિમેકં તત્ત્વમવ્યયમ્ ॥ ૨૧॥

નન્દીશ્વર ઉવાચ ।
ઇત્યાકર્ણ્ય તયોર્વાચં પુનસ્તે હિ ઋગાદયઃ ।
અવદંસ્તત્ત્વતઃ સર્વે પરેશં સંસ્મરતો પ્રભુમ્ ॥ ૨૨॥

યદિ માન્યા વયં દેવૌ સૃષ્ટિસ્થિતિકરૌ વિભૂ ।
તદા પ્રમાણં વક્ષ્યામો ભવત્સન્દેહભેદકમ્ ॥ ૨૩॥

નન્દીશ્વર ઉવાચ ।
શ્રુત્યુક્તવિધિમાકર્ણ્ય પ્રોચતુસ્તૌ સુરૌ શ્રુતીઃ ।
યુષ્મદુક્તં પ્રમાણં નૌ કિં તત્ત્વં સમ્યગુચ્યતામ્ ॥ ૨૪॥

ઋગ્વેદ ઉવાચ ।
યદન્તઃ સ્થાનિ ભૂતાનિ યતઃ સર્વં પ્રવર્ત્તતે ।
યદાહુઃ પરમં તત્ત્વં સ રુદ્રસ્ત્વેક એવ હિ ॥ ૨૫॥

યજુર્વેદ ઉવાચ ।
યો યજ્ઞૈરખિલૈરીશો યોગેન ચ સમિજ્યતે ।
યેન પ્રમાણં ખલુ નઃ સ એકઃ સર્વદૃક્ શિવઃ ॥ ૨૬॥

સામવેદ ઉવાચ ।
યેનેદં ભ્રમ્યતે વિશ્વં યોગિભિર્યો વિચિન્ત્યતે ।
યદ્ભાસા ભાસતે વિશ્વં સ એકસ્ત્ર્યમ્બકઃ પરઃ ॥ ૨૭॥

અથર્વણવેદ ઉવાચ ।
યં પ્રપશ્યન્તિ દેવેશં ભક્ત્યનુગ્રહિણો જનાઃ ।
તમાહુરેકં કૈવલ્યં શઙ્કરં દુઃખતઃ પરમ્ ॥ ૨૮॥

નન્દીશ્વર ઉવાચ ।
શ્રુત્યુક્તમિદમાકર્ણ્યાતીવ માયાવિમોહિતૌ ।
સ્મિત્વાહતુર્વિધિહરી નિગમાંસ્તાન્વિચેતનૌ ॥ ૨૯॥

વિધિહરી ઊચતુઃ ।
હે વેદાઃ કિમિદં યૂયં ભાષન્તે ગતચેતનાઃ ।
કિં જાતં વોઽદ્ય સર્વં હિ નષ્ટં સુવયુનં પરમ્ ॥ ૩૦॥

કથં પ્રમથનાથોઽસૌ રમમાણો નિરન્તરમ્ ।
દિગમ્બરઃ પીતવર્ણો શિવયા ધૂલિધૂસરઃ ॥ ૩૧॥

વિરૂપવેષો જટિલો વૃષગો વ્યાલભૂષણઃ ।
પરં બ્રહ્મત્વમાપન્નઃ ક્વ ચ તત્સઙ્ગવર્જિતમ્ ॥ ૩૨॥

ઇત્યુદીરિતમાકર્ણ્ય પ્રણવઃ સર્વગસ્તયોઃ ।
અમૂર્તો મૂર્તિમાન્પ્રીત્યા જૃમ્ભમાણ ઉવાચ તૌ ॥ ૩૩॥

પ્રણવ ઉવાચ ।
ન હીશો ભગવાન્ શક્ત્યા હ્યાત્મનો વ્યતિરિક્તયા ।
કદાચિદ્રમતે રુદ્રો લીલારૂપધરો હરઃ ॥ ૩૪॥

અસૌ હિ પરમેશાનઃ સ્વયઞ્જ્યોતિઃ સનાતનઃ ।
આનન્દરૂપા તસ્યૈષા શક્તિર્નાગન્તુકી શિવા ॥ ૩૫॥

નન્દીશ્વર ઉવાચ ।
ઇત્યેવમુક્તોઽપિ તદા વિધેર્વિષ્ણોશ્ચ વૈ તદા ।
નાજ્ઞાનમગમન્નાશં શ્રીકણ્ઠસ્યૈવ માયયા ॥ ૩૬॥

પ્રાદુરાસીત્તતો જ્યોતિરુભયોરન્તરે મહત્ ।
પૂરયન્નિજયા ભાસા દ્યાવાભૂમ્યોર્યદન્તરમ્ ॥ ૩૭॥

જ્યોતિર્મણ્ડલમધ્યસ્થો દદૃશે પુરુષાકૃતિઃ ।
વિધિક્રતુભ્યાં તત્રૈવ મહાદ્ભુતતનુર્મુને ॥ ૩૮॥

પ્રજજ્વાલાથ કોપેન બ્રહ્મણઃ પઞ્ચમં શિરઃ ।
આવયોરન્તરે કોઽસૌ બિભૃયાત્પુરુષાકૃતિમ્ ॥ ૩૯॥

વિધિઃ સમ્ભાવયેદ્યાવત્તાવત્સ ત્રિવિલોચનઃ ।
દૃષ્ટઃ ક્ષણેન ચ મહાપુરુષો નીલલોહિતઃ ॥ ૪૦॥

ત્રિશૂલપાણિર્ભાલાક્ષો નાગોડુપવિભૂષણઃ ।
હિરણ્યગર્ભસ્તં દૃષ્ટ્વા વિહસન્પ્રાહ મોહિતઃ ॥ ૪૧૬॥

બ્રહ્મોવાચ ।
નીલલોહિત જાને ત્વાં મા ભૈષીશ્ચન્દ્રશેખર ।
ભાલસ્થલાન્મમ પુરા રુદ્રઃ પ્રાદુરભૂદ્ભવાન્ ॥ ૪૨॥

રોદનાદ્ રુદ્રનામાપિ યોજિતોઽસિ મયા પુરા ।
મામેવ શરણં યાહિ પુત્ર રક્ષાં કરોમિ તે ॥ ૪૩॥

॥ નન્દીશ્વર ઉવાચ ।
અથેશ્વરઃ પદ્મયોનેઃ શ્રુત્વા ગર્વવતીં ગિરમ્ ।
ચુકોપાતીવ ચ તદા કુર્વન્નિવ લયમ્મુને ॥ ૪૪॥

સ કોપતઃ સમુત્પાદ્ય પુરુષં ભૈરવં ક્વચિત્ ।
પ્રજ્વલન્તં સુમહસા પ્રીત્યા ચ પરમેશ્વરઃ ॥ ૪૫॥

ઈશ્વર ઉવાચ ।
પ્રાક્ ચ પઙ્કજજન્માસૌ શાસ્યસ્તે કાલભૈરવ ।
કાલવદ્રાજસે સાક્ષાત્કાલરાજસ્તતો ભવાન્ ॥ ૪૬॥

વિશ્વં ભર્ત્તું સમર્થોઽસિ ભીષણાદ્ભૈરવઃ સ્મૃતઃ ।
ત્વત્તો ભેષ્યતિ કાલોઽપિ તતસ્ત્વં કાલભૈરવઃ ॥ ૪૭॥

આમર્દયિષ્યતિ ભવાન્રુષ્ટો દુષ્ટાત્મનો યતઃ ।
આમર્દક ઇતિ ખ્યાતિં તતઃ સર્વત્ર યાસ્યસિ ॥ ૪૮॥

યતઃ પાપાનિ ભક્તાનાં ભક્ષયિષ્યસિ તત્ક્ષણાત્ ।
પાપભક્ષણ ઇત્યેવ તવ નામ ભવિષ્યતિ ॥ ૪૯॥

યા મે મુક્તિપુરી કાશી સર્વાભ્યોઽપિ ગરીયસી ।

આધિપત્યં ચ તસ્યાસ્તે કાલરાજ સદૈવ હિ ॥ ૫૦॥

તત્ર યે પાતકિનરાસ્તેષાં શાસ્તા ત્વમેવ હિ ।
શુભાશુભં ચ તત્કર્મ ચિત્રગુપ્તો લિખિષ્યતિ ॥ ૫૧॥

નન્દીશ્વર ઉવાચ ।
એતાન્વરાન્પ્રગૃહ્યાથ તત્ક્ષણાત્કાલભૈરવઃ ।
વામાઙ્ગુલિનખાગ્રેણ ચકર્ત ચ વિધેશ્શિરઃ ॥ ૫૨॥

યદઙ્ગમપરાધ્નોતિ કાર્યં તસ્યૈવ શાસનમ્ ।
અતો યેન કૃતા નિન્દા તચ્છિન્નં પઞ્ચમં શિરઃ ॥ ૫૩॥

અથ છિન્નં વિધિશિરો દૃષ્ટ્વા ભીતતરો હરિઃ ।
શાતરુદ્રિયમન્ત્રૈશ્ચ ભક્ત્યા તુષ્ટાવ શઙ્કરમ્ ॥ ૫૪॥

ભીતો હિરણ્યગર્ભોઽપિ જજાપ શતરુદ્રિયમ્ ।
ઇત્થં તૌ ગતગર્વૌ હિ સઞ્જાતૌ તત્ક્ષણાન્મુને ॥ ૫૫॥

પરબ્રહ્મ શિવઃ સાક્ષાત્સચ્ચિદાનન્દલક્ષણઃ ।
પરમાત્મા ગુણાતીત ઇતિ જ્ઞાનમવાપતુઃ ॥ ૫૬॥

સનત્કુમાર સર્વજ્ઞ શૃણુ મે પરમં શુભમ્ ।
યાવદ્ગર્વો ભવેત્તાવજ્જ્ઞાનગુપ્તિર્વિશેષતઃ ॥ ૫૭॥

ત્યક્ત્વાભિમાનં પુરુષો જાનાતિ પરમેશ્વરમ્ ।
ગર્વિણં હન્તિ વિશ્વેશો જાતો ગર્વાપહારકઃ ॥ ૫૮॥

અથ વિષ્ણુવિધી જ્ઞાત્વા વિગર્વૌ પરમેશ્વરઃ ।
પ્રસન્નોઽભૂન્મહાદેવોઽકરોત્તાવભયૌ પ્રભુઃ ॥ ૫૯॥

આશ્વાસ્ય તૌ મહાદેવઃ પ્રીતઃ પ્રણતવત્સલઃ ।
પ્રાહ સ્વાં મૂર્તિમપરાં ભૈરવન્તં કપર્દિનમ્ ॥ ૬૦॥

મહાદેવ ઉવાચ ।
ત્વયા માન્યો વિષ્ણુરસૌ તથા શતધૃતિઃ સ્વયમ્ ।
કપાલં વૈધસં વાપિ નીલલોહિત ધારય ॥ ૬૧॥

બ્રહ્મહત્યાપનોદાય વ્રતં લોકાય દર્શય ।
ચર ત્વં સતતં ભિક્ષાં કપાલવ્રતમાશ્રિતઃ ॥ ૬૨॥

ઇત્યુક્ત્વા પશ્યતસ્તસ્ય તેજોરૂપઃ શિવોઽબ્રવીત્ ।

ઉત્પાદ્ય ચૈકાં કન્યાં તુ બ્રહ્મહત્યાભિવિશ્રુતામ્ ॥ ૬૩॥

યાવદ્વારાણસીં દિવ્યાં પુરીમેષાં ગમિષ્યતિ ।
તાવત્ત્વં ભીષણં કાલમનુગચ્છોગ્રરૂપિણમ્ ॥ ૬૪॥

સર્વત્ર તે પ્રવેશોઽસ્તિ ત્યક્ત્વા વારાણસીં પુરીમ્ ।
વારાણસીં યદા ગચ્છેત્તન્મુક્તો ભવ તત્ક્ષણાત્ ॥ ૬૫॥

નન્દીશ્વર ઉવાચ ।
નિયોજ્ય તામિતિ તદા બ્રહ્મહત્યાં ચ તાં પ્રભુઃ ।
મહાદ્ભુતશ્ચ સ શિવોઽપ્યન્તર્ધાનમગાત્તતઃ ॥ ૬૬॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં ભૈરવાવતારવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૩.૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૯. નવમોઽધ્યાયઃ । ભૈરવાવતારલીલાવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ ભૈરવીમપરાં કથામ્ ।
શ઼ૃણુ પ્રીત્યા મહાદોષસંહર્ત્રીં ભક્તિવર્દ્ધિનીમ્ ॥ ૧॥

તત્સાન્નિધ્યં ભૈરવોઽપિ કાલોઽભૂત્કાલકાલનઃ ।
સ દેવદેવવાક્યેન બિભ્રત્કાપાલિકં વ્રતમ્ ॥ ૨॥

કપાલપાણિર્વિશ્વાત્મા ચચાર ભુવનત્રયમ્ ।
નાત્યાક્ષીચ્ચાપિ તં દેવં બ્રહ્મહત્યાપિ દારુણા ॥ ૩॥

પ્રતિતીર્થં ભ્રમન્ નાપિ વિમુક્તો બ્રહ્મહત્યયા ।
અતઃ કામારિમહિમા સર્વોઽપિ હ્યવગમ્યતામ્ ॥ ૪॥

પ્રમથૈઃ સેવ્યમાનોઽપિ હ્યેકદા વિહરન્હરઃ ।
કાપાલિકો યયૌ સ્વૈરી નારાયણનિકેતનમ્ ॥ ૫॥

અથાયાન્તં મહાકાલં ત્રિનેત્રં સર્પકુણ્ડલમ્ ।
મહાદેવાંશસમ્ભૂતં પૂર્ણાકારં ચ ભૈરવમ્ ॥ ૬॥

પપાત દણ્ડવદ્ભૂમૌ તં દૃષ્ટ્વા ગરુડધ્વજઃ ।
દેવાશ્ચ મુનયશ્ચૈવ દેવનાર્ય્યઃ સમન્તતઃ ॥ ૭॥

અથ વિષ્ણુઃ પ્રણમ્યૈનં પ્રયાતઃ કમલાપતિઃ ।
શિરસ્યઞ્જલિમાધાય તુષ્ટાવ વિવિધૈઃ સ્તવૈઃ ॥ ૮॥

સાનન્દોઽથ હરિઃ પ્રાહ પ્રસન્નાત્મા મહામુને ।
ક્ષીરોદમથનોદ્ભૂતાં પદ્માં પદ્માલયાં મુદા ॥ ૯॥

વિષ્ણુરુવાચ ।
પ્રિયે પશ્યાબ્જનયને ધન્યાસિ સુભગેઽનઘે ।
ધન્યોઽહં દેવિ સુશ્રોણિ યત્પશ્યાવો જગત્પતિમ્ ॥ ૧૦॥

અયં ધાતા વિધાતા ચ લોકાનાં પ્રભુરીશ્વરઃ ।
અનાદિઃ શરણઃ શાન્તઃ પુરઃ ષડ્વિંશસમ્મિતઃ ॥ ૧૧॥

સર્વજ્ઞઃ સર્વયોગીશઃ સર્વભૂતૈકનાયકઃ ।
સર્વભૂતાન્તરાત્માઽયં સર્વેષાં સર્વદઃ સદા ॥ ૧૨॥

યે વિનિદ્રા વિનિઃશ્વાસાઃ શાન્તાઃ ધ્યાનપરાયણાઃ ।
ધિયા પશ્યન્તિ હૃદયે સોઽયં પદ્મે સમીક્ષતામ્ ॥ ૧૩॥

યં વિદુર્વેદતત્ત્વજ્ઞા યોગિનો યતમાનસાઃ ।
અરૂપો રૂપવાન્ભૂત્વા સોઽયમાયાતિ સર્વગઃ ॥ ૧૪॥

અહો વિચિત્રં દેવસ્ય ચેષ્ટિતં પરમેષ્ઠિનઃ ।
યસ્યાખ્યાં બ્રુવતો નિત્યં ન દેહઃ સોઽપિ દેહભૃત્ ॥ ૧૫॥

તં દૃષ્ટ્વા ન પુનર્જન્મ લભ્યતે માનવૈર્ભુવિ ।
સોઽયમાયાતિ ભગવાંસ્ત્ર્યમ્બકઃ શશિભૂષણઃ ॥ ૧૬॥

પુણ્ડરીકદલાયામે ધન્યે મેઽદ્ય વિલોચને ।
યદ્ દૃશ્યતે મહાદેવો હ્યાભ્યાં લક્ષ્મિ મહેશ્વરઃ ॥ ૧૭॥

ધિગ્ધિક્પદં તુ દેવાનાં પરં દૃષ્ટ્વા ન શઙ્કરમ્ ।
લભ્યતે યત્ર નિર્વાણં સર્વદુઃખાન્તકૃત્તુ યત્ ॥ ૧૮॥

દેવત્વાદશુભં કિઞ્ચિદ્દેવલોકે ન વિદ્યતે ।
દૃષ્ટ્વાપિ સર્વે દેવેશં યન્મુક્તિં ન લભામહે ॥ ૧૯॥

નન્દીશ્વર ઉવાચ ।

એવમુક્ત્વા હૃષીકેશઃ સમ્પ્રહૃષ્ટતનૂરુહઃ ।
પ્રણિપત્ય મહાદેવમિદમાહ વૃષધ્વજમ્ ॥ ૨૦॥

વિષ્ણુરુવાચ ।
કિમિદં દેવદેવેન સર્વજ્ઞેન ત્વયા વિભો ।
ક્રિયતે જગતાં ધાત્રા સર્વપાપહરાવ્યય ॥ ૨૧॥

ક્રીડેયં તવ દેવેશ ત્રિલોચન મહામતે ।
કિં કારણં વિરૂપાક્ષ ચેષ્ટિતં તે સ્મરાર્દન ॥ ૨૨॥

કિમર્થં ભગવચ્છમ્ભો ભિક્ષાં ચરસિ શક્તિપ ।
સંશયો મે જગન્નાથ એષ ત્રૈલોક્યરાજ્યદ ॥ ૨૩॥

નન્દીશ્વર ઉવાચ ।
એવમુક્તસ્તતઃ શમ્ભુર્વિષ્ણુના ભૈરવો હરઃ ।
પ્રત્યુવાચાદ્ભુતોતિઃ સ વિષ્ણું હિ વિહસન્પ્રભુઃ ॥ ૨૪॥

ભૈરવ ઉવાચ ।
બ્રહ્મણસ્તુ શિરશ્છિન્નમઙ્ગુલ્યાગ્રનખેન હ ।
તદઘં પ્રતિહન્તું હિ ચરામ્યેતદ્ વ્રતં શુભમ્ ॥ ૨૫॥

નન્દીશ્વર ઉવાચ ।
એવમુક્તો મહેશેન ભૈરવેણ રમાપતિઃ ।
સ્મૃત્વા કિઞ્ચિન્નતશિરાઃ પુનરેવમજિજ્ઞપત્ ॥ ૨૬॥

વિષ્ણુરુવાચ ।
યથેચ્છસિ તથા ક્રીડ સર્વવિઘ્નાપનોદક ।
માયયા માં મહાદેવ નાચ્છાદયિતુમર્હસિ ॥ ૨૭॥

નાભીકમલકોશાત્તુ કોટિશઃ કમલાસનાઃ ।
કલ્પે કલ્પે પુરા હ્યાન્સસ્ત્વન્નિયોગબલાદ્વિભો ॥ ૨૮॥

ત્યજ માયામિમાં દેવ દુસ્તરામકૃતાત્મભિઃ ।
બ્રહ્માદયો મહાદેવ માયયા તવ મોહિતાઃ ॥ ૨૯॥

યથાવદનુગચ્છામિ ચેષ્ટિતં તે શિવાપતે ।
તવૈવાનુગ્રહાચ્છમ્ભો સર્વેશ્વર સતાઙ્ગતે ॥ ૩૦॥

સંહારકાલે સમ્પ્રાપ્તે સદેવાન્નિખિલાન્મુનીન્ ।

લોકાન્વર્ણાશ્રમવતો હરિષ્યસિ યદા હર ॥ ૩૧॥

તદા કૃતે મહાદેવ પાપં બ્રહ્મવધાદિકમ્ ।
પારતન્ત્ર્યં ન તે શમ્ભો સ્વૈરં ક્રીડત્યતો ભવાન્ ॥ ૩૨॥

અતીત બ્રહ્મણાં હ્યસ્થ્નાં સ્રક્કણ્ઠે તવ ભાસતે ।
તથાપ્યનુગતા શમ્ભો બ્રહ્મહત્યા તવાનઘ ॥ ૩૩॥

કૃત્વાપિ સુમહત્પાપં યસ્ત્વાં સ્મરતિ માનવઃ ।
આધારં જગતામીશ તસ્ય પાપં વિલીયતે ॥ ૩૪॥

યથા તમો ન તિષ્ઠેત સન્નિધાવંશુમાલિનઃ ।
તથૈવ તવ યો ભક્તઃ પાપં તસ્ય વ્રજેત્ક્ષયમ્ ॥ ૩૫॥

યશ્ચિન્તયતિ પુણ્યાત્મા તવ પાદામ્બુજદ્વયમ્ ।
બ્રહ્મહત્યાકૃતમપિ પાપં તસ્ય વ્રજેત્ક્ષયમ્ ॥ ૩૬॥

તવ નામાનુરક્તા વાગ્યસ્ય પુંસો જગત્પતે ।
અપ્યદ્રિકૂટતુલિતં નૈનસ્તમનુબાધતે ॥ ૩૭॥

પરમાત્મન્પરં ધામ સ્વેચ્છાભિધૃતવિગ્રહ ।
કુતૂહલં તવેશેદં કૃપણાધીનતેશ્વર ॥ ૩૮॥

અદ્ય ધન્યોઽસ્મિ દેવેશ યન્ન પશ્યન્તિ યોગિનઃ ।
પશ્યામિ તં જગન્મૂર્ત્તિં પરમેશ્વરમવ્યયમ્ ॥ ૩૯॥

અદ્ય મે પરમો લાભસ્ત્વદ્ય મે મઙ્ગલં પરમ્ ।
તં દૃષ્ટ્વામૃતતૃપ્તસ્ય તૃણં સ્વર્ગાપવર્ગકમ્ ॥ ૪૦॥

ઇત્થં વદતિ ગોવિન્દે વિમલા પદ્મયા તયા ।
મનોરથવતી નામ ભિક્ષા પાત્રે સમર્પિતા ॥ ૪૧॥

ભિક્ષાટનાય દેવોઽપિ નિરગાત્પરયા મુદા ।
અન્યત્રાપિ મહાદેવો ભૈરવશ્ચાત્તવિગ્રહઃ ॥ ૪૨॥

દૃષ્ટ્વાનુયાયિનીં તાં તુ સમાહૂય જનાર્દનઃ ।
સમ્પ્રાર્થયદ્ બ્રહ્મહત્યાં વિમુઞ્ચ ત્વં ત્રિશૂલિનમ્ ॥ ૪૩॥

બ્રહ્મહત્યોવાચ ।
અનેનાપિ મિષેણાહં સંસેવ્યામું વૃષધ્વજમ્ ।
આત્માનં પાવયિષ્યામિ ત્વપુનર્ભવદર્શનમ્ ॥ ૪૪॥

નન્દીશ્વર ઉવાચ ।
સા તત્યાજ ન તત્પાર્શ્વં વ્યાહૃતાપિ મુરારિણા ।
તમૂચેઽથ હરિં શમ્ભુઃ સ્મેરાસ્યો ભૈરવો વચઃ ॥ ૪૫॥

ભૈરવ ઉવાચ ।
ત્વદ્વાક્પીયૂષપાનેન તૃપ્તોઽસ્મિ બહુમાનદ ।
સ્વભાવોઽયં હિ સાધૂનાં યત્ત્વં વદસિ માપતે ॥ ૪૬॥

વરં વૃણીષ્વ ગોવિન્દ વરદોઽસ્મિ તવાનઘ ।
અગ્રણીર્મમ ભક્તાનાં ત્વં હરે નિર્વિકારવાન્ ॥ ૪૭॥

નો માદ્યન્તિ તથા ભૈક્ષ્યૈર્ભિક્ષવોઽપ્યતિસંસ્કૃતૈઃ ।
યથા માનસુધાપાનૈર્નનુ ભિક્ષાટનજ્વરાઃ ॥ ૪૮॥

નન્દીશ્વર ઉવાચ ।
ઇત્યાકર્ણ્ય વચઃ શમ્ભોર્ભૈરવસ્ય પરાત્મનઃ ।
સુપ્રસન્નતરો ભૂત્વા સમવોચન્મહેશ્વરમ્ ॥ ૪૯॥

વિષ્ણુરુવાચ ।
એષ એવ વરઃ શ્લાઘ્યો યદહં દેવતાધિપમ્ ।
પશ્યામિ ત્વાન્દેવદેવ મનોવાણીપથાતિગમ્ ॥ ૫૦॥

અદભ્રેયં સુધાદૃષ્ટિરનયા મે મહોત્સવઃ ।
અયત્નનિધિલાભોઽયં વીક્ષણં હર તે સતામ્ ॥ ૫૧॥

અવિયોગોઽસ્તુ મે દેવ ત્વદઙ્ઘ્રિયુગલેન વૈ ।
એષ એવ વરઃ શમ્ભો નાન્યં કશ્ચિદ્ વૃણે વરમ્ ॥ ૫૨॥

શ્રીભૈરવ ઉવાચ ।
એવં ભવતુ તે તાત યત્ત્વયોક્તં મહામતે ।
સર્વેષામપિ દેવાનાં વરદસ્ત્વં ભવિષ્યસિ ॥ ૫૩॥

નન્દીશ્વર ઉવાચ ।
અનુગૃહ્યેતિ દૈત્યારિં કેન્દ્રાદ્રિભુવને ચરન્ ।
ભેજેઽવિમુક્તનગરીં નામ્ના વારાણસીં પુરીમ્ ॥ ૫૪॥

ક્ષેત્રે પ્રવિષ્ટમાત્રેઽથ ભૈરવે ભીષણાકૃતૌ ।
હાહેત્યુક્ત્વા બ્રહ્મહત્યા પાતાલં ચાવિશત્તદા ॥ ૫૫॥

કપાલં બ્રાહ્મણઃ સદ્યો ભૈરવસ્ય કરામ્બુજાત્ ।
પપાત ભુવિ તત્તીર્થમભૂત્કાપાલમોચનમ્ ॥ ૫૬॥

કપાલં બ્રહ્મણો રુદ્રઃ સર્વેષામેવ પશ્યતામ્ ।
હસ્તાત્પતન્તમાલોક્ય નનર્ત પરયા મુદા ॥ ૫૭॥

વિધેઃ કપાલં નામુઞ્ચત્કરમત્યન્તદુસ્સહમ્ ।
પરસ્ય ભ્રમતઃ ક્વાપિ તત્કાશ્યાં ક્ષણતોઽપતત્ ॥ ૫૮॥

શૂલિનો બ્રહ્મણો હત્યા નાપૈતિ સ્મ ચ યા ક્વચિત્ ।
સા કાશ્યાં ક્ષણતો નષ્ટા તસ્માત્સેવ્યા હિ કાશિકા ॥ ૫૯॥

કપાલમોચનં કાશ્યાં યઃ સ્મરેત્તીર્થમુત્તમમ્ ।
ઇહાન્યત્રાપિ યત્પાપં ક્ષિપ્રં તસ્ય પ્રણશ્યતિ ॥ ૬૦॥

આગત્ય તીર્થપ્રવરે સ્નાનં કૃત્વા વિધાનતઃ ।
તર્પયિત્વા પિતૄન્દેવાન્મુચ્યતે બ્રહ્મહત્યયા ॥ ૬૧॥

કપાલમોચનં તીર્થં પુરસ્કૃત્વા તુ ભૈરવઃ ।
તત્રૈવ તસ્થૌ ભક્તાનાં ભક્ષયન્નઘસન્તતિમ્ ॥ ૬૨॥

કૃષ્ણાષ્ટમ્યાં તુ માર્ગસ્ય માસસ્ય પરમેશ્વરઃ ।
આવિર્બભૂવ સલ્લીલો ભૈરવાત્મા સતાં પ્રિયઃ ॥ ૬૩॥

માર્ગશીર્ષાસિતાષ્ટમ્યાં કાલભૈરવસન્નિધૌ ।
ઉપોષ્ય જાગરં કુર્વન્મહાપાપૈઃ પ્રમુચ્યતે ॥ ૬૪॥

અન્યત્રાપિ નરો ભક્ત્યા તદ્ વ્રતં યઃ કરિષ્યતિ ।
સજાગરં મહાપાપૈર્મુક્તો યાસ્યતિ સદ્ગતિમ્ ॥ ૬૫॥

અનેકજન્મનિયુતૈર્યત્કૃતં જન્તુભિસ્ત્વઘમ્ ।
તત્સર્વં વિલયં યાતિ કાલભૈરવદર્શનાત્ ॥ ૬૬॥

કાલભૈરવભક્તાનાં પાતકાનિ કરોતિ યઃ ।
સ મૂઢો દુઃખિતો ભૂત્વા પુનર્દુર્ગતિમાપ્નુયાત્ ॥ ૬૭॥

વિશ્વેશ્વરેઽપિ યે ભક્તા નો ભક્તાઃ કાલભૈરવે ।
તે લભન્તે મહાદુઃખં કાશ્યાં ચૈવ વિશેષતઃ ॥ ૬૮॥

વારાણસ્યામુષિત્વા યો ભૈરવં ન ભજેન્નરઃ ।

તસ્ય પાપાનિ વર્દ્ધન્તે શુક્લપક્ષે યથા શશી ॥ ૬૯॥

કાલરાજં ન યઃ કાશ્યાં પ્રતિભૂતાષ્ટમીકુજમ્ ।
ભજેત્તસ્ય ક્ષયં પુણ્યં કૃષ્ણપક્ષે યથા શશી ॥ ૭૦॥

શ્રુત્વાખ્યાનમિદં પુણ્યં બ્રહ્મહત્યાપનોદકમ્ ।
ભૈરવોત્પત્તિસંજ્ઞં ચ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૭૧॥

બન્ધનાગારસંસ્થોઽપિ પ્રાપ્તોઽપિ વિપદં પરામ્ ।
પ્રાદુર્ભાવં ભૈરવસ્ય શ્રુત્વા મુચ્યેત સઙ્કટાત્ ॥ ૭૨॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં ભૈરવાવતારલીલાવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૩.૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૧૦. દશમોઽધ્યાયઃ । નૃસિંહચરિતવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
વિધ્વંસી દક્ષયજ્ઞસ્ય વીરભદ્રાહ્વયઃ પ્રભોઃ ।
અવતારશ્ચ વિજ્ઞેયઃ શિવસ્ય પરમાત્મનઃ ॥ ૧॥

સતીચરિત્રે કથિતં ચરિતં તસ્ય કૃત્સ્નશઃ ।
શ્રુતં ત્વયાપિ બહુધા નાતઃ પ્રોક્તં સુવિસ્તરાત્ ॥ ૨॥

અતઃ પરં મુનિશ્રેષ્ઠ ભવત્સ્નેહાદ્ બ્રવીમિ તત્ ।
શાર્દૂલાખ્યાવતારં ચ શઙ્કરસ્ય પ્રભોઃ શ ૃણુ ॥ ૩॥

સદાશિવેન દેવાનાં હિતાર્થં રૂપમદ્ભુતમ્ ।
શારભં ચ ધૃતં દિવ્યં જ્વલજ્જ્વાલાસમપ્રભમ્ ॥ ૪॥

શિવાવતારા અમિતાઃ સદ્ભક્તહિતકારકાઃ ।
સઙ્ખ્યા ન શક્યતે કર્તું તેષાં ચ મુનિસત્તમાઃ ॥ ૫॥

આકાશસ્ય ચ તારાણાં રેણુકાનાં ક્ષિતેસ્તથા ।
આસારાણાં ચ વૃદ્ધેન બહુકલ્પૈઃ કદાપિ હિ ॥ ૬॥

સઙ્ખ્યા વિશક્યતે કર્તું સુપ્રાજ્ઞૈર્બહુજન્મભિઃ ।

ન વૈ શિવાવતારાણાં સત્યં જાનીહિ મદ્વચઃ ॥ ૭॥

તથાપિ ચ યથાબુદ્ધ્યા કથયામિ યથાશ્રુતમ્ ।
ચરિત્રં શારભં દિવ્યં પરમૈશ્વર્યસૂચકમ્ ॥ ૮॥

જયશ્ચ વિજયશ્ચૈવ ભવદ્ભિઃ શાપિતૌ યદા ।
તદા દિતિસુતૌ દ્વૌ તાવભૂતાં કશ્યપાન્મુને ॥ ૯॥

હિરણ્યકશિપુશ્ચાદ્યો હિરણ્યાક્ષોઽનુજો બલી ।
દેવર્ષિપાર્ષદૌ જાતૌ તૌ દ્વાવપિ દિતેઃ સુતૌ ॥ ૧૦॥

પૃથ્વ્યુદ્ધારે વિધાત્રા વ પ્રાર્થિતો હિ પુરા પ્રભુઃ ।
હિરણ્યાક્ષં જઘાનાસૌ વિષ્ણુર્વારાહરૂપધૃક્ ॥ ૧૧॥

તં શ્રુત્વા ભ્રાતરં વીરં નિહતં પ્રાણસન્નિભમ્ ।
ચુકોપ હરયેઽતીવ હિરણ્યકશિપુર્મુને ॥ ૧૨॥

વર્ષાણામયુતં તસ્વા બ્રહ્મણો વરમાપ સઃ ।
ન કશ્ચિન્મારયેન્માં વૈ ત્વત્સૃષ્ટાવિતિ તુષ્ટતઃ ॥ ૧૩॥

શોણિતાખ્યપુરં ગત્વા દેવાનાહૂય સર્વતઃ ।
ત્રિલોકીં સ્વવશે કૃત્વા ચક્રે રાજ્યમકણ્ટકમ્ ॥ ૧૪॥

દેવર્ષિકદનં ચક્રે સર્વધર્મવિલોપકઃ ।
દ્વિજપીડાકરઃ પાપી હિરણ્યકશિપુર્મુને ॥ ૧૫॥

પ્રહ્લાદેન સ્વપુત્રેણ હરિભક્તેન દૈત્યરાટ્ ।
યદા વિદ્વેષમકરોદ્ધરિર્વૈરી વિશેષતઃ ॥ ૧૬॥

સભાસ્તમ્ભાત્તદા વિષ્ણુરભૂદાવિર્દ્રુતં મને ।
સન્ધ્યાયાં ક્રોધમાપન્નો નૃસિંહવપુષા તતઃ ॥ ૧૭॥

સર્વથા મુનિશાર્દૂલ કરાલં નૃહરેર્વપુઃ ।
પ્રજજ્વાલાતિભયદં ત્રાસયન્દૈત્યસત્તમાન્ ॥ ૧૮॥

નૃસિંહેન તદા દૈત્યા નિહતાશ્ચૈવ તત્ક્ષણમ્ ।
હિરણ્યકશિપુશ્ચાથ યુદ્ધં ચક્રે સુદારુણમ્ ॥ ૧૯॥

મહાયુદ્ધં તયોરાસીન્મુહૂર્તં મુનિસત્તમાઃ ।
વિકરાલં ચ ભયદં સર્વેષાં રોમહર્ષણમ્ ॥ ૨૦॥

સાયં ચકર્ષ દેવેશો દેહલ્યાં દૈત્યપુઙ્ગવમ્ ।
વ્યોમ્નિ દેવેષુ પશ્યત્સુ નૃસિંહશ્ચ રમેશ્વરઃ ॥ ૨૧॥

અથોત્સઙ્ગે ચ તં કૃત્વા નખૈસ્તદુદરં દ્રુતમ્ ।
વિદાર્ય મારયામાસ પશ્યતાં ત્રિદિવૌકસામ્ ॥ ૨૨॥

હતે હિરણ્યકશિપૌ નૃસિંહેનૈવ વિષ્ણુના ।
જગત્સ્વાસ્થ્યં તદા લેભે ન વૈ દેવા વિશેષતઃ ॥ ૨૩॥

દેવદુન્દુભયો નેદુઃ પ્રહ્લાદો વિસ્મયં ગતઃ ।
લક્ષ્મીશ્ચ વિસ્મયં પ્રાપ્તા રૂપં દૃષ્ટ્વાઽદ્ભુતં હરેઃ ॥ ૨૪॥

હતો યદ્યપિ દૈત્યેન્દ્રસ્તથાપિ ન પરં સુખમ્ ।
યયુર્દેવા નૃસિંહસ્ય જ્વાલા સા ન નિવર્તિતા ॥ ૨૫॥

તયા ચ વ્યાકુલં જાતં સર્વં ચૈવ જગત્પુનઃ ।
દેવાશ્ચ દુઃખમાપન્નાઃ કિં ભવિષ્યતિ વા પુનઃ ॥ ૨૬॥

ઇત્યેવં ચ વદન્તસ્તે ભયાદ્ દૂરમુપસ્થિતાઃ ।
નૃસિંહક્રોધજજ્વાલાવ્યાકુલાઃ પદ્મભૂમુખાઃ ॥ ૨૭॥

પ્રહ્રાદં પ્રેષયામાસુસ્તચ્છાન્ત્યૈ નિકટં હરેઃ ।
સર્વાન્મિલિત્વા પ્રહ્લાદઃ પ્રાર્થિતો ગતવાંસ્તદા ॥ ૨૮॥

ઉરસાઽઽલિઙ્ગયામાસ તં નૃસિંહઃ કૃપાનિધિઃ ।
હૃદયં શીતલં જાતં રુઙ્જ્વાલા ન નિવર્ત્તિતા ॥ ૨૯॥

તથાપિ ન નિવૃતા રુઙ્જ્વાલા નરહરેર્યદા ।
દુઃખં પ્રાપ્તાસ્તતો દેવાઃ શઙ્કર શરણં યયુઃ ॥ ૩૦॥

તત્ર ગત્વા સુરાઃ સર્વે બ્રહ્માદ્યા મુનયસ્તથા ।
શઙ્કરં સ્તવયામાસુર્લોકાનાં સુખહેતવે ॥ ૩૧॥

દેવા ઊચુઃ ।
દેવદેવ મહાદેવ શરણાગતવત્સલ ।
પાહિ નઃ શરણાપન્નાન્સર્વાન્દેવાઞ્જગન્તિ ચ ॥ ૩૨॥

નમસ્તેઽસ્તુ નમસ્તેઽસ્તુ નમસ્તેઽસ્તુ સદાશિવ ।
પૂર્વં દુઃખં યદા જાતં તદા તે રક્ષિતા વયમ્ ॥ ૩૩॥

સમુદ્રો મથિતશ્ચૈવ રત્નાનાં ચ વિભાગશઃ ।

કૃતે દેવૈસ્તદા શમ્ભો ગૃહીતં ગરલં ત્વયા ॥ ૩૪॥

રક્ષિતાઃ સ્મ તદા નાથ નીલકણ્ઠ ઇતિ શ્રુતઃ ।
વિષં પાસ્યસિ નો ચેત્ત્વં ભસ્મીભૂતાસ્તદાખિલાઃ ॥ ૩૫॥

પ્રસિદ્ધં ચ યદા યસ્ય દુઃખં ચ જાયતે પ્રભો ।
તદા ત્વન્નામમાત્રેણ સર્વં દુઃખં વિલીયતે ॥ ૩૬॥

ઇદાનીં નૃહરિજ્વાલાપીડિતાન્નઃ સદાશિવ ।
તાં ત્વં શમયિતું દેવ શક્તોઽસીતિ સુનિશ્ચિતમ્ ॥ ૩૭॥

નન્દીશ્વર ઉવાચ ।
ઇતિ સ્તુતસ્તદા દેવૈઃ શઙ્કરો ભક્તવત્સલઃ ।
પ્રત્યુવાચ પ્રસન્નાત્માઽભયં દત્ત્વા પરં પ્રભુઃ ॥ ૩૮॥

શઙ્કર ઉવાચ ।
સ્વસ્થાનં ગચ્છત સુરાઃ સર્વે બ્રહ્માદયોઽભયાઃ ।
શમયિષ્યામિ યદ્દુઃખં સર્વથા હિ વ્રતં મમ ॥ ૩૯॥

ગતો મચ્છરણં યસ્તુ તસ્ય દુઃખં ક્ષયં ગતમ્ ।
મત્પ્રિયઃ શરણાપન્નઃ પ્રાણેભ્યોઽપિ ન સંશયઃ ॥ ૪૦॥

નન્દીશ્વર ઉવાચ ।
ઇતિ શ્રુત્વા તદા દેવા હ્યાનન્દમ્પરમં ગતાઃ ।
યથાગતં તથા જગ્મુઃ સ્મરન્તઃ શઙ્કરં મુદા ॥ ૪૧॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં શાર્દૂલાવતારે નૃસિંહચરિતવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૩.૧૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૧૧. એકાદશોઽધ્યાયઃ । શરભાવતારવર્ણનમ્ ૧ ।

નન્દીશ્વર ઉવાચ ।
એવમભ્યર્થિતો દેવૈર્મતિં ચક્રે કૃપાલયઃ ।

મહાતેજો નૃસિંહાખ્યં સંહર્તું પરમેશ્વરઃ ॥ ૧॥

તદૂર્ધ્વં સ્મૃતવાન્ રુદ્રો વીરભદ્રં મહાબલમ્ ।
આત્મનો ભૈરવં રૂપં પ્રાહ પ્રલયકારકમ્ ॥ ૨॥

આજગામ તતઃ સદ્યો ગણાનામગ્રણીર્હસન્ ।
સાટ્ટહાસૈર્ગણવરૈરુત્પતદ્ભિરિતસ્તતઃ ॥ ૩॥

નૃસિંહરૂપૈરત્યુગ્રૈઃ કોટિભિઃ પરિવારિતઃ ।
માદ્યદ્ભિરભિતો વીરૈર્નૃત્યદ્ભિશ્ચ મુદાન્વિતૈઃ ॥ ૪॥

ક્રીડદ્ભિશ્ચ મહાવીરૈર્બ્રહ્માદ્યૈઃ કન્દુકૈરિવ ।
અદૃષ્ટપૂર્વૈરન્યૈશ્ચ વેષ્ટિતો વીરવન્દિતઃ ॥ ૫॥

કલ્પાન્તજ્વલનજ્વાલો વિલસલ્લોચનત્રયઃ ।
અશસ્ત્રો હિ જટાજૂટી જ્વલદ્ બાલેન્દુમણ્ડિતઃ ॥ ૬॥

બાલેન્દુવલયાકારતીક્ષ્ણદંષ્ટ્રાઙ્કુરદ્વયઃ ।
આખણ્ડલધનુઃખણ્ડસન્નિભભ્રૂલતાન્વિતઃ ॥ ૭॥

મહાપ્રચણ્ડહુઙ્કારબધિરીકૃતદિઙ્મુખઃ ।
નીલમેઘાઞ્જનશ્યામો ભીષણઃ શ્મશ્રુલોઽદ્ભુતઃ ॥ ૮॥

વાદ્યખણ્ડમખણ્ડાભ્યાં ભ્રામયંસ્ત્રિશિખં મુહુઃ ।
વીરભદ્રોઽપિ ભગવાન્વીરશક્તિવિજૃમ્ભિતઃ ॥ ૯॥

સ્વયં વિજ્ઞાપયામાસ કિમત્ર સ્મૃતિકારણમ્ ।
આજ્ઞાપય જગત્સ્વામિન્ પ્રસાદઃ ક્રિયતાં મયિ ॥ ૧૦॥

નન્દીશ્વર ઉવાચ ।
ઇત્યાકર્ણ્ય મહેશાનો વીરભદ્રોક્તમાદરાત્ ।
વિલોક્ય વચનં પ્રીત્યા પ્રોવાચ ખલદણ્ડધૃક્ ॥ ૧૧॥

શઙ્કર ઉવાચ ।
અકાલે ભયમુત્પન્નં દેવાનામપિ ભૈરવમ્ ।
જ્વલિતઃ સ નૃસિંહાગ્નિઃ શમયૈનં દુરાસદમ્ ॥ ૧૨॥

સાન્ત્વયન્ બોધયાદૌ તં તેન કિન્નોપશામ્યતિ ।
તતો મત્પરમં ભાવં ભૈરવં સમ્પ્રદર્શય ॥ ૧૩॥

સૂક્ષ્મં સંહૃત્ય સૂક્ષ્મેણ સ્થૂલં સ્થૂલેન તેજસા ।

વશમાનય વન્હિં ત્વં વીરભદ્ર મમાજ્ઞયા ॥ ૧૪॥

નન્દીશ્વર ઉવાચ ।
ઇત્યાદિષ્ટો ગણાધ્યક્ષો પ્રશાન્તં વપુરાસ્થિતઃ ।
જગામ રંહસા તત્ર યત્રાસ્તે નરકેસરી ॥ ૧૫॥

તતઃ સમ્બોધયામાસ વીરભદ્રો હરો હરિમ્ ।
ઉવાચ વાક્યમીશાનઃ પિતાપુત્રમિવૌરસમ્ ॥ ૧૬॥

વીરભદ્ર ઉવાચ ।
જગત્સુખાય ભગવન્નવતીર્ણોઽસિ માધવ ।
સ્થિત્યર્થં ત્વં પ્રયુક્તોઽસિ પરેશઃ પરમેષ્ઠિના ॥ ૧૭॥

જન્તુચક્રં ભગવતા પ્રચ્છન્નં મત્સ્યરૂપિણા ।
પુચ્છેનૈવ સમાબધ્ય ભ્રમન્નેકાર્ણવે પુરા ॥ ૧૮॥

બિભર્ષિ કૂર્મરૂપેણ વારાહેણોદ્ધૃતા મહી ।
અનેન હરિરૂપેણ હિરણ્યકશિપુર્હતઃ ॥ ૧૯॥

વામનેન બલિર્બદ્ધસ્ત્વયા વિક્રમતા પુનઃ ।
ત્વમેવ સર્વભૂતાનાં પ્રભવઃ પ્રભુરવ્યયઃ ॥ ૨૦॥

યદા યદા હિ લોકસ્ય દુઃખં કિઞ્ચિત્પ્રજાયતે ।
તદા તદાવતીર્ણસ્ત્વં કરિષ્યસિ નિરામયમ્ ॥ ૨૧॥

નાધિકસ્ત્વત્સમોઽપ્યસ્તિ હરે શિવપરાયણઃ ।
ત્વયા વેદાશ્ચ ધર્માશ્ચ શુભમાર્ગે પ્રતિષ્ઠિતાઃ ॥ ૨૨॥

યદર્થમવતારોઽયં નિહતઃ સ હિ દાનવઃ ।
હિરણ્યકશિપુશ્ચૈવ પ્રહ્લાદોઽપિ સુરક્ષિતઃ ॥ ૨૩॥

અતીવ ઘોરં ભગવન્નરસિંહવપુસ્તવ ।
ઉપસંહર વિશ્વાત્મંસ્ત્વમેવ મમ સન્નિધૌ ॥ ૨૪॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તો વીરભદ્રેણ નૃસિંહઃ શાન્તયા ગિરા ।
તતોઽધિકં મહાઘોરં કોપં ચક્રે મહામદઃ ॥ ૨૫॥

ઉવાચ ચ મહાઘોરં કઠિનં વચનં તદા ।
વીરભદ્રં મહાવીરં દંષ્ટ્રાભિર્ભીષયન્મુને ॥ ૨૬॥

નૃસિંહ ઉવાચ ।
આગતોઽસિ યતસ્તત્ર ગચ્છ ત્વં મા હિતં વદ ।
ઇદાનીં સંહરિષ્યામિ જગદેતચ્ચરાચરમ્ ॥ ૨૭॥

સંહર્તુર્ન હિ સંહારઃ સ્વતો વા પરતોઽપિ વા ।
શાસિનં મમ સર્વત્ર શાસ્તા કોઽપિ ન વિદ્યતે ॥ ૨૮॥

મત્પ્રસાદેન સકલમભયં હિ પ્રવર્તતે ।
અહં હિ સર્વશક્તીનાં પ્રવર્તકનિવર્તકઃ ॥ ૨૯॥

યદ્યદ્વિભૂતિમત્સત્ત્વં શ્રીમદૂર્જિતમેવ વા ।
તત્તદ્વિદ્ધિ ગણાધ્યક્ષ મમ તેજોવિજૃમ્ભિતમ્ ॥ ૩૦॥

દેવતાઃ પરમાર્થજ્ઞાં મામેવ પરમં વિદુઃ ।
મદંશાઃ શક્તિસમ્પન્ના બ્રહ્મશક્રાદયઃ સુરાઃ ॥ ૩૧॥

મન્નાભિકમલાજ્જાતઃ પુરા બ્રહ્મા જગત્કરઃ ।
સર્વાધિકઃ સ્વતન્ત્રશ્ચ કર્તા હર્તાખિલેશ્વરઃ ॥ ૩૨॥

ઇદં તુ મત્પરં તેજઃ કિં પુનઃ શ્રોતુમિચ્છસિ ।
અતો માં શરણં પ્રાપ્ય ગચ્છ ત્વં વિગતજ્વરઃ ॥ ૩૩॥

અવેહિ પરમં ભાવમિદમ્ભૂતં ગણેશ્વર ।
મામકં સકલં વિશ્વં સદેવાસુરમાનુષમ્ ॥ ૩૪॥

કાલોઽસ્મ્યહં લોકવિનાશહેતુ-
ર્લોકાન્સમાહર્તુમહં પ્રવૃત્તઃ ।
મૃત્યોર્મૃત્યું વિદ્ધિ માં વીરભદ્ર
જીવન્ત્યેતે મત્પ્રસાદેન દેવાઃ ॥ ૩૫॥

નન્દીશ્વર ઉવાચ ।
સાહઙ્કારં વચઃ શ્રુત્વા હરેરમિતવિક્રમઃ ।
વિહસ્યોવાચ સાવજ્ઞં તતો વિસ્ફુરિતાધરઃ ॥ ૩૬॥

વીરભદ્ર ઉવાચ ।
કિન્ન જાનાસિ વિશ્વેશં સંહર્તારં પિનાકિનમ્ ।
અસદ્વાદો વિવાદશ્ચ વિનાશસ્ત્વયિ કેવલઃ ॥ ૩૭॥

તવાન્યોન્યાવતારાણિ કાનિ શેષાણિ સામ્પ્રતમ્ ।

કૃતાનિ યેન કેનૈવ કથાશેષો ભવિષ્યતિ ॥ ૩૮॥

દોષં તં વદ યેન ત્વમવસ્થામીદૃશીં ગતઃ ।
તેન સંહારદક્ષેણ દક્ષિણાશેષમેષ્યસિ ॥ ૩૯॥

પ્રકૃતિસ્ત્વં પુમાન્રુદ્રસ્ત્વયિ વીર્યં સમાહિતમ્ ।
ત્વન્નાભિપઙ્કજાજ્જાતઃ પઞ્ચવક્ત્રઃ પિતામહઃ ॥ ૪૦॥

જગત્ત્રયીસર્જનાર્થં શઙ્કરં નીલલોહિતમ્ ।
લલાટેઽચિન્તયત્સોઽયં તપસ્યુગ્રે ચ સંસ્થિતઃ ॥ ૪૧॥

તલ્લલાટાદભૂચ્છમ્ભુઃ સૃષ્ટ્યર્થે તેન ભૂષણમ્ ।
અતોઽહં દેવદેવસ્ય તસ્ય ભૈરવરૂપિણઃ ॥ ૪૨॥

ત્વત્સંહારે નિયુક્તોઽસ્મિ વિનયેન બલેન ચ ।
દેવદેવેન રુદ્રેણ સકલપ્રભુણા હરે ॥ ૪૩॥

એકં રક્ષો વિદાર્યૈવ તચ્છક્તિકલયા યુતઃ ।
અહઙ્કારાવલેપેન ગર્જસિ ત્વમતન્દ્રિતઃ ॥ ૪૪॥

ઉપકારો હિ સાધૂનાં સુખાય કિલ સમ્મતઃ ।
ઉપકારો હ્યસાધૂનામપકારાય કેવલમ્ ॥ ૪૫॥

યન્નૃસિંહ મહેશાનં પુનર્ભૂતં તુ મન્યસે ।
તર્હ્યજ્ઞાની મહાગર્વી વિકારી સર્વથા ભવાન્ ॥ ૪૬॥

ન ત્વં સ્રષ્ટા ન સંહર્તા ભર્તાપિ ન નૃસિંહક ।
પરતન્ત્રો વિમૂઢાત્મા ન સ્વતન્ત્રો હિ કુત્રચિત્ ॥ ૪૭॥

કુલાલચક્રવચ્છક્ત્યા પ્રેરિતોઽસિ પિનાકિના ।
નાનાવતારકર્તા ત્વં તદધીનઃ સદા હરે ॥ ૪૮॥

અદ્યાપિ તવ નિક્ષિપ્તં કપાલં કૂર્મરૂપિણઃ ।
હરહારલતામધ્યે દગ્ધં કશ્ચિન્ન બધ્યતે ॥ ૪૯॥

વિસ્મૃતિઃ કિં તદંશેન દંષ્ટ્રોત્પાતનપીડિતમ્ ।
વારાહવિગ્રહસ્તેઽદ્ય યાક્રોશન્તારકારિણા ॥ ૫૦॥

દગ્ધોઽસિ પશ્ય શૂલાગ્રૈર્વિષ્વક્સેનચ્છલાદ્ભવાન્ ।
દક્ષયજ્ઞે શિરશ્છિન્નં મયા તેજઃસ્વરૂપિણા ॥ ૫૧॥

અદ્યાપિ તવ પુત્રસ્ય બ્રહ્મણઃ પઞ્ચમં શિરઃ ।
છિન્નં ન સજ્જિતં ભૂયો હરે તદ્વિસ્મૃતં ત્વયા ॥ ૫૨॥

નિર્જિતસ્ત્વં દધીચેન સઙ્ગ્રામે સમરુદ્ગણઃ ।
કણ્ડૂયમાને શિરસિ કથં તદ્વિસ્મૃતં ત્વયા ॥ ૫૩॥

ચક્રં વિક્રમતો યસ્ય ચક્રપાણે તવ પ્રિયમ્ ।
કુતઃ પ્રાપ્તં કૃતં કેન ત્વયા તદપિ વિસ્મૃતમ્ ॥ ૫૪॥

યે મયા સકલા લોકા ગૃહીતાસ્ત્વં પયોનિધૌ ।
નિદ્રાપરવશઃ શેષે સ કથં સાત્ત્વિકો ભવાન્ ॥ ૫૫॥

ત્વદાદિસ્તમ્બપર્યન્તં રુદ્રશક્તિવિજૃમ્ભિતમ્ ।
શક્તિમાનભિતસ્ત્વં ચ હ્યનલાત્ત્વં વિમોહિતઃ ॥ ૫૬॥

તત્તેજસો હિ માહાત્મ્યં પુમાન્દ્રષ્ટું ન હિ ક્ષમઃ ।
અસ્થૂલા યે પ્રપશ્યન્તિ તદ્વિષ્ણોઃ પરમં પદમ્ ॥ ૫૭॥

દ્યાવાપૃથિવ્યા ઇન્દ્રાગ્નેર્યમસ્ય વરુણસ્ય ચ ।
ધ્વાન્તોદરે શશાઙ્કે ચ જનિત્વા પરમેશ્વરઃ ॥ ૫૮॥

કાલોઽસિ ત્વં મહાકાલઃ કાલકાલો મહેશ્વરઃ ।
અતસ્ત્વમુગ્રકલયા મૃત્યોર્મૃત્યુર્ભવિષ્યસિ ॥ ૫૯॥

સ્થિરોઽદ્ય ત્વક્ષરો વીરો વીરો વિશ્વાવકઃ પ્રભુઃ ।
ઉપહન્તા જ્વરં ભીમો મૃગઃ પક્ષી હિરણમયઃ ॥ ૬૦॥

શાસ્તા શેષસ્ય જગતસ્તત્ત્વં નૈવ ચતુર્મુખઃ ।
નાન્યે ચ કેવલં શમ્ભુઃ સર્વશાસ્તા ન સંશયઃ ॥ ૬૧॥

ઇત્થં સર્વં સમાલોક્ય સંહારાત્માનમાત્મના ।
ન વિનષ્ટં ત્વમાત્માનં કુરુ હે નૃહરેઽબુધ ॥ ૬૨॥

નો ચેદિદાનીં ક્રોધસ્ય મહાભૈરવરૂપિણઃ ।
વજ્રાશનિરિવ સ્થાણૌ ત્વયિ મૃત્યુઃ પતિષ્યતિ ॥ ૬૩॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા વીરભદ્રોઽપિ વિરરામાકુતોભયઃ ।
દૃષ્ટ્વા નૃસિંહાભિપ્રાયં ક્રોધમૂર્ત્તિશ્શિવસ્ય સઃ ॥ ૬૪॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં શરભાવતારવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૩.૧૧॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૧૨. દ્વાદશોઽધ્યાયઃ । શરભાવતારવર્ણનમ્ ૨ ।

સનત્કુમાર ઉવાચ ।
નન્દીશ્વર મહાપ્રાજ્ઞ વિજ્ઞાતં તદનન્તરમ્ ।
મમોપરિ કૃપાં કૃત્વા પ્રીત્યા ત્વં તદ્વદાધુના ॥ ૧॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તો વીરભદ્રેણ નૃસિંહઃ ક્રોધવિહ્વલઃ ।
નિનદન્નનુવેગેન તં ગ્રહીતું પ્રચક્રમે ॥ ૨॥

અત્રાન્તરે મહાઘોરં પ્રત્યક્ષભયકારણમ્ ।
ગગનવ્યાપિ દુર્ધર્ષં શૈવતેજઃ સમુદ્ભવમ્ ॥ ૩॥

વીરભદ્રસ્ય તદ્રૂમદૃશ્યં તુ તતઃ ક્ષણાત્ ।
તદ્વૈ હિરણ્મયં સૌમ્યં ન સૌરં નાગ્નિસમ્ભવમ્ ॥ ૪॥

ન તડિચ્ચન્દ્રસદૃશમનૌપમ્યં મહેશ્વરમ્ ।
તદા તેજાંસિ સર્વાણિ તસ્મિંલ્લીનાનિ શઙ્કરે ॥ ૫॥

ન તદ્વ્યોમં મહત્તેજો વ્યક્તાન્તશ્ચાભવત્તતઃ ।
રુદ્રસાધારણં ચૈવ ચિહ્નિતં વિકૃતાકૃતિ ॥ ૬॥

તતસ્સંહારરૂપેણ સુવ્યક્તં પરમેશ્વરઃ ।
પશ્યતાં સર્વદેવાનાં જયશબ્દાદિમઙ્ગલૈઃ ॥ ૭॥

સહસ્રબાહુર્જટિલશ્ચન્દ્રાર્દ્ધકૃતશેખરઃ ।
સમૃદ્ધોગ્રશરીરેણ પક્ષાભ્યાં ચઞ્ચુના દ્વિજઃ ॥ ૮॥

અતિતીક્ષ્ણો મહાદંષ્ટ્રો વજ્રતુલ્યનખાયુધઃ ।
કણ્ઠે કાલો મહાબાહુશ્ચતુષ્પાદ્વહ્નિસન્નિભઃ ॥ ૯॥

યુગાન્તોદ્યતજીમૂતભીમગમ્ભીરનિઃસ્વનઃ ।

મહાકુપિતકૃત્યાગ્નિવ્યાવૃત્તનયનત્રયઃ ॥ ૧૦॥

સ્પષ્ટદંષ્ટ્રાધરોષ્ઠશ્ચ હુઙ્કારૈઃ સંયુતો હરઃ ।
ઈદૃગ્વિધસ્વરૂપશ્ચ હ્યુગ્ર આવિર્બભૂવ હ ॥ ૧૧॥

હરિસ્તદ્દર્શનાદેવ વિનષ્ટબલવિક્રમઃ ।
બિભ્રદ્ધામસહસ્રાંશોરધઃ ખદ્યોતવિભ્રમમ્ ॥ ૧૨॥

અથ વિભ્રમ્ય પક્ષાભ્યાં નાભિપાદાન્વિદારયન્ ।
પાદાન્બબન્ધ પુચ્છેન બાહુભ્યાં બાહુમણ્ડલમ્ ॥ ૧૩॥

ભિન્દન્નુરસિ બાહુભ્યાં નિજગ્રાહ હરો હરિમ્ ।
તતો જગામ ગગનં દેવૈસ્સહ મહર્ષિભિઃ ॥ ૧૪॥

સહસૈવાભયાદ્વિષ્ણું સ હિ શ્યેન ઇવોરગમ્ ।
ઉત્ક્ષિપ્યોત્ક્ષિપ્ય સઙ્ગૃહ્ય નિપાત્ય ચ નિપાત્ય ચ ॥ ૧૫॥

ઉડ્ડીયોડ્ડીય ભગવાન્પક્ષઘાતવિમોહિતમ્ ।
હરીં હરસ્તં વૃષભં વિવેશાનન્ત ઈશ્વરઃ ॥ ૧૬॥

અનુયાન્તં સુરાઃ સર્વે નમોવાક્યેન તુષ્ટુવુઃ ।
પ્રણેમુઃ સાદરં પ્રીત્યા બ્રહ્માદ્યાશ્ચ મુનીશ્વરાઃ ॥ ૧૭॥

નીયમાનઃ પરવશો દીનવક્ત્રઃ કૃતાઞ્જલિઃ ।
તુષ્ટાવ પરમેશાનં હરિસ્તં લલિતાક્ષરૈઃ ॥ ૧૮॥

નામ્નામષ્ટશતેનૈવ સ્તુત્વા તં મૃડમેવ ચ ।
પુનશ્ચ પ્રાર્થયામાસ નૃસિંહઃ શરભેશ્વરમ્ ॥ ૧૯॥

યદા યદા મમાજ્ઞેયં મતિઃ સ્યાદ્ગર્વદૂષિતા ।
તદા તદાઽપનેતવ્યા ત્વયૈવ પરમેશ્વર ॥ ૨૦॥

નન્દીશ્વર ઉવાચ ।
એવં વિજ્ઞાપયન્પ્રીત્યા શઙ્કરં નરકેસરી ।
નત્વાશક્તોઽભવદ્વિષ્ણુર્જીવિતાન્તપરાજિતઃ ॥ ૨૧॥

તદ્વક્ત્રં શેષગાત્રાન્તં કૃત્વા સર્વસ્વવિગ્રહમ્ ।
શક્તિયુક્તં તદીયાઙ્ગં વીરભદ્રઃ ક્ષણાત્તતઃ ॥ ૨૨॥

નન્દીશ્વર ઉવાચ ।
અથ બ્રહ્માદયો દેવાઃ શારભં રૂપમાસ્થિતમ્ ।

તુષ્ટુવુઃ શઙ્કરં દેવં સર્વલોકૈકશઙ્કરમ્ ॥ ૨૩॥

॥ દેવા ઊચુઃ ।
બ્રહ્મવિષ્ણ્વિન્દ્રચન્દ્રાદિસુરાઃ સર્વે મહર્ષયઃ ।
દિતિજાદ્યાઃ સમ્પ્રસૂતાઃ ત્વત્તઃ સર્વે મહેશ્વર ॥ ૨૪॥

બ્રહ્મવિષ્ણુમહેન્દ્રાંશ્ચ સૂર્યાદ્યાનસુરાન્સુરાન્ ।
ત્વં વૈ સૃજસિ પાસ્યત્સિ ત્વમેવ સકલેશ્વરઃ ॥ ૨૫॥

યતો હરસિ સંસારં હર ઇત્યુચ્યતે બુધૈઃ ।
નિગૃહીતો હરિર્યસ્માદ્ધર ઇત્યુચ્યતે બુધૈઃ ॥ ૨૬॥

યતો બિભર્ષિ સકલં વિભજ્ય તનુમષ્ટધા ।
અતોઽસ્માન્પાહિ ભગવન્ સુરાન્ દાનૈરભીપ્સિતૈઃ ॥ ૨૭॥

ત્વં મહાપુરુષઃ શમ્ભુઃ સર્વેશઃ સુરનાયકઃ ।
નિઃસ્વાત્મા નિર્વિકારાત્મા પરબ્રહ્મ સતાં ગતિઃ ॥ ૨૮॥

દીનબન્ધુર્દયાસિન્ધુરદ્ભુતોતિઃ પરાત્મદૃક્ ।
પ્રાજ્ઞો વિરાટ્ વિભુઃ સત્યઃ સચ્ચિદાનન્દલક્ષણઃ ॥ ૨૯॥

નન્દીશ્વર ઉવાચ ।
ઇત્યાકર્ણ્ય વચઃ શમ્ભુર્દેવાનાં પરમેશ્વરઃ ।
ઉવાચ તાન્ સુરાન્દેવામહર્ષીંશ્ચ પુરાતનાન્ ॥ ૩૦॥

યથા જલં જલે ક્ષિપ્તં ક્ષીરે ક્ષીરં ઘૃતે ઘૃતમ્ ।
એક એવ તદા વિષ્ણુઃ શિવે લીનો ન ચાન્યથા ॥ ૩૧॥

એકો વિષ્ણુર્નૃસિંહાત્મા સદર્પશ્ચ મહાબલઃ ।
જગત્સંહારકરણે પ્રવૃત્તો નરકેસરી ॥ ૩૨॥

પ્રાર્થનીયો નમસ્તસ્મૈ મદ્ભક્તૈઃ સિદ્ધિકારિભિઃ ।
મદ્ભક્તપ્રવરશ્ચૈવ મદ્ભક્તવરદાયકઃ ॥ ૩૩॥

નન્દીશ્વર ઉવાચ ।
એતાવદુક્ત્વા ભગવાન્ પક્ષિરાજો મહાબલઃ ।
પશ્યતાં સર્વદેવાનાં તત્રૈવાન્તરધીયત ॥ ૩૪॥

વીરભદ્રોઽપિ ભગવાન્ગણાધ્યક્ષો મહાબલઃ ।
નૃસિંહકૃત્તિં નિષ્કૃષ્ય સમાદાય યયૌ ગિરિમ્ ॥ ૩૫॥

નૃસિંહકૃત્તિવસનસ્તદાપ્રભૃતિ શઙ્કરઃ ।
તદ્વક્ત્રં મુણ્ડમાલાયાં નાયકત્વેન કલ્પિતમ્ ॥ ૩૬॥

તતો દેવા નિરાતઙ્કાઃ કીર્તયન્તઃ કથામિમામ્ ।
વિસ્મયોત્ફુલ્લનયના જગ્મુઃ સર્વે યથાગતમ્ ॥ ૩૭॥

ય ઇદં પરમાખ્યાનં પુણ્યં વેદરસાન્વિતમ્ ।
પઠતિ શૃણુયાચ્ચૈવ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૩૮॥

ધન્યં યશસ્યમાયુષ્યમારોગ્યમ્પુષ્ટિવર્દ્ધનમ્ ।
સર્વવિઘ્નપ્રશમનં સર્વવ્યાધિવિનાશનમ્ ॥ ૩૯॥

દુઃખપ્રશમનં વાઞ્છાસિદ્ધિદં મઙ્ગલાલયમ્ ।
અપમૃત્યુહરં બુદ્ધિપ્રદં શત્રુવિનાશનમ્ ॥ ૪૦॥

ઇદં તુ શરભાકારં પરં રૂપં પિનાકિનઃ ।
પ્રકાશનીયં ભક્તેષુ શઙ્કરસ્ય ચરેષુ વૈ ॥ ૪૧॥

તૈરેવ પઠિતવ્યં ચ શ્રોતવ્યં ચ શિવાત્મભિઃ ।
નવધાભક્તિદં દિવ્યમન્તઃકરણબુદ્ધિદમ્ ॥ ૪૨॥

શિવોત્સવેષુ સર્વેષુ ચતુર્દશ્યષ્ટમીષુ ચ ।
પઠેત્પ્રતિષ્ઠાકાલે તુ શિવસન્નિધિકારણમ્ ॥ ૪૩॥

ચૌરવ્યાઘ્રનૃસિંહાત્મકૃતરાજભયેષુ ચ ।
અન્યેષૂત્પાતભૂકમ્પદસ્ય્વાદિપાંસુવૃષ્ટિષુ ॥ ૪૪॥

ઉલ્કાપાતે મહાવાતે વિનાવૃષ્ટ્યતિવૃષ્ટિષુ ।
પઠેદ્યઃ પ્રયતો વિદ્વાન્ શિવભક્તો દૃઢવ્રતઃ ॥ ૪૫॥

યઃ પઠેચ્છૃણુયાદ્વાપિ નિષ્કામો વ્રતમૈશ્વરમ્ ।
રુદ્રલોકં સમાસાદ્ય રુદ્રસ્યાનુચરો ભવેત્ ॥ ૪૬॥

રુદ્રલોકમનુપ્રાપ્ય રુદ્રેણ સહ મોદતે ।
તતઃ સાયુજ્યમાપ્નોતિ શિવસ્ય કૃપયા મુને ॥ ૪૭॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં શરભાવતારવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૩.૧૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૧૩. ત્રયોદશોઽધ્યાયઃ । ગૃહપત્યવતારવર્ણનમ્ ૧ ।

નન્દીશ્વર ઉવાચ ।
શૃણુ બ્રહ્મસુત પ્રીત્યા ચરિતં શશિમૌલિનઃ ।
સોઽવતીર્ણો યથા પ્રીત્યા વિશ્વાનરગૃહે શિવઃ ॥ ૧॥

નામ્ના ગૃહપતિઃ સોઽભૂદગ્નિલોકપતિર્મુને ।
અગ્નિરૂપસ્તૈજસશ્ચ સર્વાત્મા પરમઃ પ્રભુઃ ॥ ૨॥

નર્મદાયાસ્તટે રમ્યે પુરે નર્મપુરે પુરા ।
પુરારિભક્તઃ પુણ્યાત્માભવદ્વિશ્વાનરો મુનિઃ ॥ ૩॥

બ્રહ્મચર્યાશ્રમે નિષ્ઠો બ્રહ્મયજ્ઞરતઃ સદા ।
શાણ્ડિલ્યગોત્રઃ શુચિમાન્બ્રહ્મતેજોનિધિર્વશી ॥ ૪॥

વિજ્ઞાતાખિલશાસ્ત્રાર્થઃ સદાચારરતઃ સદા ।
શૈવાચારપ્રવીણોઽતિ લૌકિકાચારવિદ્વરઃ ॥ ૫॥

ચિત્તે વિચાર્ય ગૃહિણીગુણાન્વિશ્વાનરઃ શુભાન્ ।
ઉદ્વાહ વિધાનેન સ્વોચિતાં કુલકન્યકામ્ ॥ ૬॥

અગ્નિશુશ્રૂષણરતઃ પઞ્ચયજ્ઞપરાયણઃ ।
ષટ્કર્મનિરતો નિત્યં દેવપિત્રતિથિપ્રિયઃ ॥ ૭॥

એવં બહુતિથે કાલે ગતે તસ્યાગ્રજન્મનઃ ।
ભાર્યા શુચિષ્મતી નામ ભર્તારં પ્રાહ સુવ્રતા ॥ ૮॥

નાથ ભોગા મયા સર્વે ભુક્તા વૈ ત્વત્પ્રસાદતઃ ।
સ્ત્રીણાં સમુચિતા યે સ્યુઃ ત્વાં સમેત્ય મુદાવહાઃ ॥ ૯॥

એવં મે પ્રાર્થિતં નાથ ચિરાય હૃદિ સંસ્થિતમ્ ।
ગૃહસ્થાનાં સમુચિતં ત્વમેતદ્દાતુમર્હસિ ॥ ૧૦॥

વિશ્વાનર ઉવાચ ।
કિમદેયં હિ સુશ્રોણિ તવ પ્રિયહિતૈષિણી ।
તત્પ્રાર્થય મહાભાગે પ્રયચ્છામ્યવિલમ્બિતમ્ ॥ ૧૧॥

મહેશિતુઃ પ્રસાદેન મમ કિઞ્ચિન્ન દુર્લભમ્ ।

ઇહામુત્ર ચ કલ્યાણિ સર્વકલ્યાણકારિણઃ ॥ ૧૨॥

નન્દીશ્વર ઉવાચ ।
ઇત્યાકર્ણ્ય વચઃ પત્યુસ્તસ્ય સા પતિદેવતા ।
ઉવાચ હૃષ્ટવદના કરૌ બદ્ધ્વા વિનીતિકા ॥ ૧૩॥

શુચિષ્મત્યુવાચ ।
વરયોગ્યાસ્મિ ચેન્નાથ યદિ દેયો વરો મમ ।
મહેશસદૃશં પુત્રં દેહિ નાન્યં વરં વૃણે ॥ ૧૪॥

નન્દીશ્વર ઉવાચ ।
ઇતિ તસ્યા વચઃ શ્રુત્વા બ્રાહ્મણઃ સ શુચિવ્રતઃ ।
ક્ષણં સમાધિમાધાય હૃદ્યેતત્સમચિન્તયત્ ॥ ૧૫॥

અહો કિં મે તયા તન્વ્યા પ્રાર્થિતં હ્યતિદુર્લભમ્ ।
મનોરથપથાદૂરમસ્તુ વા સ હિ સર્વકૃત્ ॥ ૧૬॥

તેનૈવાસ્યા મુખે સ્થિત્વા વાક્સ્વરૂપેણ શમ્ભુના ।
વ્યાહૃતં કોઽન્યથા કર્તુમુત્સહેત ભવેદિદમ્ ॥ ૧૭॥

ઇતિ સઞ્ચિન્ત્ય સ મુનિર્વિશ્વાનર ઉદારધીઃ ।
તતઃ પ્રોવાચ તાં પત્નીમેકપત્નીવ્રતે સ્થિતઃ ॥ ૧૮॥

નન્દીશ્વર ઉવાચ ।
ઇત્થમાશ્વાસ્ય તાં પત્નીં જગામ તપસે મુનિઃ ।
યત્ર વિશ્વેશ્વરઃ સાક્ષાત્કાશીનાથોઽધિતિષ્ઠતિ ॥ ૧૯॥

પ્રાપ્ય વારાણસીં તૂર્ણં દૃષ્ટ્વા તાં મણિકર્ણિકામ્ ।
તત્યાજ તાપત્રિતયમપિ જન્મશતાર્જિતમ્ ॥ ૨૦॥

દૃષ્ટ્વા સર્વાણિ લિઙ્ગાનિ વિશ્વેશપ્રમુખાનિ ચ ।
સ્નાત્વા સર્વેષુ કુણ્ડેષુ વાપીકૂપસરસ્સુ ચ ॥ ૨૧॥

નત્વા વિનાયકાન્સર્વાન્ગૌરીં શર્વાં પ્રણમ્ય ચ ।
સમ્પૂજ્ય કાલરાજં ચ ભૈરવં પાપભક્ષણમ્ ॥ ૨૨॥

દણ્ડનાયકમુખ્યાંશ્ચ ગણાન્સ્તુત્વા પ્રયત્નતઃ ।
આદિકેશવમુખ્યાંશ્ચ કેશવં પરિતોષ્ય ચ ॥ ૨૩॥

લોલાર્કમુખસૂર્યાંશ્ચ પ્રણમ્ય સ પુનઃ પુનઃ ।

કૃત્વા ચ પિણ્ડદાનાનિ સર્વતીર્થેષ્વતન્દ્રિતઃ ॥ ૨૪॥

સહસ્રભોજનાદ્યૈશ્ચ મુનીન્વિપ્રાન્પ્રતર્પ્ય ચ ।
મહાપૂજોપચારૈશ્ચ લિઙ્ગાન્યભ્યર્ચ્ય ભક્તિતઃ ॥ ૨૫॥

અસકૃચ્ચિન્તયામાસ કિં લિઙ્ગં ક્ષિપ્રસિદ્ધિદમ્ ।
યત્ર નિશ્ચલતામેતિ તપસ્તનયકામ્યયા ॥ ૨૬॥

ક્ષણં વિચાર્ય સ મુનિરિતિ વિશ્વાનરઃ સુધીઃ ।
ક્ષિપ્રં પુત્રપ્રદં લિઙ્ગં વીરેશં પ્રશશંસ હ ॥ ૨૭॥

અસઙ્ખ્યાતાઃ સહસ્રાણિ સિદ્ધાઃ સિદ્ધિં ગતાસ્તતઃ ।
સિદ્ધલિઙ્ગમિતિ ખ્યાતં તસ્માદ્વીરેશ્વરં પરમ્ ॥ ૨૮॥

વીરેશ્વરં મહાલિઙ્ગમબ્દમભ્યર્ચ્ય ભક્તિતઃ ।
આયુર્મનોરથં સર્વં પુત્રાદિકમનેકશઃ ॥ ૨૯॥

અહમપ્યત્ર વીરેશં સમારાધ્ય ત્રિકાલતઃ ।
આશુ પુત્રમવાપ્સ્યામિ યથાભિલષિતં સ્રિયા ॥ ૩૦॥

નન્દીશ્વર ઉવાચ ।
ઇતિ કૃત્વા મતિં ધિરો વિપ્રો વિશ્વાનરઃ કૃતી ।
ચન્દ્રકૂપજલે સ્નાત્વા જગ્રાહ નિયમં વ્રતી ॥ ૩૧॥

એકાહારોઽભવન્માસં માસં નક્તાશનોઽભવત્ ।
અયાચિતાશનો માસં માસં ત્યક્તાશનઃ પુનઃ ॥ ૩૨॥

પયોવ્રતોઽભવન્માસં માસં શાકફલાશનઃ ।
માસં મુષ્ટિતિલાહારો માસં પાનીયભોજનઃ ॥ ૩૩॥

પઞ્ચગવ્યાશનો માસં માસં ચાન્દ્રાયણવ્રતી ।
માસં કુશાગ્રજલભુગ્માસં શ્વસનભક્ષણઃ ॥ ૩૪॥

એવમબ્દમિતં કાલં તતાપ સ તપોઽદ્ભુતમ્ ।
ત્રિકાલમર્ચયદ્ભક્ત્યા વીરેશં લિઙ્ગમુત્તમમ્ ॥ ૩૫॥

અથ ત્રયોદશે માસિ સ્નાત્વા ત્રિપથગામ્ભસિ ।
પ્રત્યૂષ એવ વીરેશં યાવદાયાતિ સ દ્વિજઃ ॥ ૩૬॥

તાવદ્વિલોકયાઞ્ચક્રે મધ્યે લિઙ્ગં તપોધનઃ ।
વિભૂતિભૂષણં બાલમષ્ટવર્ષાકૃતિં શિશુમ્ ॥ ૩૭॥

આકર્ણાયતનેત્રં ચ સુરક્તદશનચ્છદમ્ ।
ચારુપિઙ્ગજટામૌલિં નગ્નં પ્રહસિતાનનમ્ ॥ ૩૮॥

શૈશવોચિતનેપથ્યધારિણં ચિતિધારિણમ્ ।
પઠન્તં શ્રુતિસૂક્તાનિ હસન્તં ચ સ્વલીલયા ॥ ૩૯॥

તમાલોક્ય મુદં પ્રાપ્ય રોમકઞ્ચુકિતો મુનિઃ ।
પ્રોચ્ચચાર હૃદાલાપાન્નમોઽસ્ત્વિતિ પુનઃ પુનઃ ॥ ૪૦॥

અભિલાષપ્રદૈઃ પદ્યૈરષ્ટભિર્બાલરૂપિણમ્ ।
તુષ્ટાવ પરમાનન્દં શમ્ભું વિશ્વાનરઃ કૃતી ॥ ૪૧॥

વિશ્વાનર ઉવાચ ।
એકં બ્રહ્મૈવાદ્વિતીયં સમસ્તં
સત્યં સત્યં નેહ નાનાસ્તિ કિઞ્ચિત્ ।
એકો રુદ્રો ન દ્વિતીયોઽવતસ્થે
તસ્માદેકં ત્વાં પ્રપદ્યે મહેશમ્ ॥ ૪૨॥

કર્તા હર્ત્તા ત્વં હિ સર્વસ્ય શમ્ભો
નાનારૂપેષ્વેકરૂપોઽપ્યરૂપઃ ।
યદ્વત્પ્રત્યગ્ધર્મ એકોઽપ્યનેક-
સ્તસ્માન્નાન્યં ત્વાં વિનેશં પ્રપદ્યે ॥ ૪૩॥

રજ્જૌ સર્પઃ શુક્તિકાયાં ચ રૌપ્યં
નૈરઃ પૂરસ્તન્મૃગાખ્યે મરીચૌ ।
યદ્યત્સદ્વદ્વિષ્વગેવ પ્રપઞ્ચો
યસ્મિન્ જ્ઞાતે તં પ્રપદ્યે મહેશમ્ ॥ ૪૪॥

તોયે શૈત્યં દાહકત્વં ચ વહ્નૌ
તાપો ભાનૌ શીતભાનૌ પ્રસાદઃ ।
પુષ્પે ગન્ધો દુગ્ધમધ્યેઽપિ સર્પિ-
ર્યત્તચ્છમ્ભો ત્વં તતસ્ત્વાં પ્રપદ્યે ॥ ૪૫॥

શબ્દં ગૃહ્ણાસ્યશ્રવાસ્ત્વં હિ જિઘ્ર-
સ્યઘ્રાણસ્ત્વં વ્યઙ્ઘ્રિરાયાસિ દૂરાત્ ।
વ્યક્ષઃ પશ્યેસ્ત્વં રસજ્ઞોઽપ્યજિહ્વઃ

કસ્ત્વાં સમ્યગ્વેત્ત્યતસ્ત્વાં પ્રપદ્યે ॥ ૪૬॥

નો વેદ ત્વામીશ સાક્ષાદ્ધિ વેદો
નો વા વિષ્ણુર્નો વિધાતાખિલસ્ય ।
નો યોગીન્દ્રા નેન્દ્રમુખ્યાશ્ચ દેવા
ભક્તો વેદ ત્વામતસ્ત્વાં પ્રપદ્યે ॥ ૪૭॥

નો તે ગોત્રં નેશ જન્માપિ નાખ્યા
નો વા રૂપં નૈવ શીલં ન દેશઃ ।
ઇત્થમ્ભૂતોઽપીશ્વરસ્ત્વં ત્રિલોક્યાઃ
સર્વાન્કામાન્પૂરયેસ્ત્વં ભજે ત્વામ્ ॥ ૪૮॥

ત્વત્તઃ સર્વં ત્વં હિ સર્વં સ્મરારે
ત્વં ગૌરીશસ્ત્વં ચ નગ્નોઽતિશાન્તઃ ।
ત્વં વૈ વૃદ્ધસ્ત્વં યુવા ત્વં ચ બાલ-
સ્તત્ત્વં યત્કિં નાન્યતસ્ત્વાં નતોઽહમ્ ॥ ૪૯॥

નન્દીશ્વર ઉવાચ ।
સ્તુત્વેતિ વિપ્રો નિપપાત ભૂમૌ
સમ્બદ્ધપાણિર્ભવતીહ યાવત્ ।
તાવત્સ બાલોઽખિલવૃદ્ધવૃદ્ધઃ
પ્રોવાચ ભૂદેવમતીવ હૃષ્ટઃ ॥ ૫૦॥

બાલ ઉવાચ ।
વિશ્વાનર મુનિશ્રેષ્ઠ ભૂદેવાહં ત્વયાદ્ય વૈ ।
તોષિતઃ સુપ્રસન્નાત્મા વૃણીષ્વ વરમુત્તમમ્ ॥ ૫૧॥

તત ઉત્થાય હૃષ્ટાત્મા મુનિર્વિશ્વાનરઃ કૃતી ।
પ્રત્યબ્રવીન્મુનિશ્રેષ્ઠઃ શઙ્કરં બાલરૂપિણમ્ ॥ ૫૨॥

વિશ્વાનર ઉવાચ ।
મહેશ્વર કિમજ્ઞાતં સર્વજ્ઞસ્ય તવ પ્રભો ।
સર્વાન્તરાત્મા ભગવાન્ શર્વઃ સર્વપ્રદો ભવાન્ ॥ ૫૩॥

યાચ્ઞાં પ્રતિ નિયુક્તં માં કિં બ્રૂષે દૈન્યકારિણીમ્ ।
ઇતિ જ્ઞાત્વા મહેશાન યથેચ્છસિ તથા કુરુ ॥ ૫૪॥

નન્દીશ્વર ઉવાચ ।

ઇતિ શ્રુત્વા વચસ્તસ્ય દેવો વિશ્વાનરસ્ય હિ ।
શુચિઃ શુચિવ્રતસ્યાથ શુચિં સ્મિત્વાબ્રવીચ્છિશુઃ ॥ ૫૫॥

ત્વયા શુચે શુચિષ્મત્યાં યોઽભિલાષઃ કૃતો હૃદિ ।
અચિરેણૈવ કાલેન સ ભવિષ્યત્યસંશયમ્ ॥ ૫૬॥

તવ પુત્રત્વમેષ્યામિ શુચિષ્મત્યાં મહામતે ।
ખ્યાતો ગૃહપતિર્નામ્ના શુચિઃ સર્વામરપ્રિયઃ ॥ ૫૭॥

અભિલાષાષ્ટકં પુણ્યં સ્તોત્રમેતત્ત્વયેરિતમ્ ।
અબ્દત્રિકાલપઠનાત્કામદં શિવસન્નિધૌ ॥ ૫૮॥

એતત્સ્તોત્રપ્રપઠનં પુત્રપૌત્રધનપ્રદમ્ ।
સર્વશાન્તિકરં ચાપિ સર્વાપત્તિવિનાશનમ્ ॥ ૫૯॥

સ્વર્ગાપવર્ગસમ્પત્તિકારકં નાત્ર સંશયઃ ।
સર્વસ્તોત્રસમં હ્યેતત્સર્વકામપ્રદં સદા ॥ ૬૦॥

પ્રાતરુત્થાય સુસ્નાતો લિઙ્ગમભ્યર્ચ્ય શામ્ભવમ્ ।
વર્ષં જપન્નિદં સ્તોત્રમપુત્રઃ પુત્રવાન્ભવેત્ ॥ ૬૧॥

અભિલાષાષ્ટકમિદં ન દેયં યસ્ય કસ્યચિત્ ।
ગોપનીયં પ્રયત્નેન મહાવન્ધ્યાપ્રસૂતિકૃત્ ॥ ૬૨॥

સ્ત્રિયા વા પુરુષેણાપિ નિયમાલ્લિઙ્ગસન્નિધૌ ।
અબ્દં જપ્તમિદં સ્તોત્રં પુત્રદં નાત્ર સંશયઃ ॥ ૬૩॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વાન્તર્દધે શમ્ભુર્બાલરૂપઃ સતાં ગતિઃ ।
સોઽપિ વિશ્વાનરો વિપ્રો હૃષ્ટાત્મા સ્વગૃહં યયૌ ॥ ૬૪॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં ગૃહપત્યવતારવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૩.૧૩॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૧૪. ચતુર્દશોઽધ્યાયઃ । ગૃહપત્યવતારવર્ણનમ્ ૨ ।

નન્દીશ્વર ઉવાચ ।
સ વિપ્રો ગૃહમાગત્ય મહાહર્ષસમન્વિતઃ ।
પ્રિયાયૈ કથયામાસ તદ્વૃત્તાન્તમશેષતઃ ॥ ૧॥

તચ્છ્રુત્વા વિપ્રપત્ની સા મુદં પ્રાપ શુચિષ્મતી ।
અતીવ પ્રેમસંયુક્તા પ્રશશંસ વિધિં નિજમ્ ॥ ૨॥

અથ કાલેન તદ્યોષિદન્તર્વત્ની બભૂવ હ ।
વિધિવદ્ વિહિતે તેન ગર્ભાધાનાખ્યકર્મણિ ॥ ૩॥

તતઃ પુંસવનં તેન સ્પન્દનાત્પ્રાગ્વિપશ્ચિતા ।
ગૃહ્યોક્તવિધિના સમ્યક્ કૃતં પુંસ્ત્વવિવૃદ્ધયે ॥ ૪॥

સીમન્તોઽથાષ્ટમે માસે ગર્ભરૂપસમૃદ્ધિકૃત્ ।
સુખપ્રસવસિદ્ધૌ ચ તેનાકરિ ક્રિયાવિદા ॥ ૫॥

અથાતઃ શુભતારાસુ તારાધિપવરાનનઃ ।
કેન્દ્રે ગુરૌ શુભે લગ્ને સુગ્રહેષુ યુગેષુ ચ ॥ ૬॥

અરિષ્ટદીપનિર્વાણઃ સર્વારિષ્ટવિનાશકૃત્ ।
તનયો નામ તસ્યાં તુ શુચિષ્મત્યાં બભૂવ હ ॥ ૭॥

શર્વઃ સમસ્તસુખદો ભૂર્ભુવઃસ્વર્નિવાસિનામ્ ।
ગન્ધવાહનવાહાશ્ચ દિગ્વધૂર્મુખવાસસઃ ॥ ૮॥

ઇષ્ટગન્ધપ્રસૂનૌઘૈર્વવૃષુસ્તે ઘનાઘનાઃ ।
દેવદુન્દુભયો નેદુઃ પ્રસેદુઃ સર્વતો દિશઃ ॥ ૯॥

પરિતઃ સરિતઃ સ્વચ્છા ભૂતાનાં માનસૈઃ સહ ।
તમોઽતામ્યત્તુ નિતરાં રજોઽપિ વિરજોઽભવત્ ॥ ૧૦॥

સત્ત્વાઃ સત્ત્વસમાયુક્તાઃ સુધાવૃષ્ટિર્બભૂવ વૈ ।
કલ્યાણી સર્વથા વાણી પ્રાણિનઃ પ્રિયવત્યભૂત્ ॥ ૧૧॥

રમ્ભામુખ્યા અપ્સરસો મઙ્ગલદ્રવ્યપાણયઃ ।
વિદ્યાધર્યશ્ચ કિન્નર્યસ્તથામર્યઃ સહસ્રશઃ ॥ ૧૨॥

ગન્ધર્વોરગયક્ષાણાં સુમાનિયઃ શુભસ્વરાઃ ।
ગાયન્ત્યો મઙ્ગલં ગીતં તત્રાજગ્મુરનેકશઃ ॥ ૧૩॥

મરીચિરત્રિઃ પુલહઃ પુલસ્ત્યઃ ક્રતુરઙ્ગિરાઃ ।
વસિષ્ઠઃ કશ્યપોઽગસ્ત્યો વિભાણ્ડો માણ્ડવીસુતઃ ॥ ૧૪॥

લોમશો રોમચરણો ભરદ્વાજોઽથ ગૌતમઃ ।
ભૃગુસ્તુ ગાલવો ગર્ગો જાતૂકર્ણ્યઃ પરાશરઃ ॥ ૧૫॥

આપસ્તમ્બો યાજ્ઞવલ્ક્યો દક્ષવાલ્મીકિમુદ્ગલાઃ ।
શાતાતપશ્ચ લિખિતઃ શિલાદઃ શઙ્ખ ઉઞ્છભુક્ ॥ ૧૬॥

જમદગ્નિશ્ચ સંવર્તો મતઙ્ગો ભરતોંઽશુમાન્ ।
વ્યાસઃ કાત્યાયનઃ કુત્સઃ શૌનકઃ સુશ્રુતઃ શુકઃ ॥ ૧૭॥

ઋષ્યશૃઙ્ગોઽથ દુર્વાસાઃ શુચિર્નારદતુમ્બુરુ ।
ઉત્તઙ્કો વામદેવશ્ચ પવનોઽસિતદેવલૌ ॥ ૧૮॥

સાલઙ્કાયનહારીતૌ વિશ્વામિત્રોઽથ ભાર્ગવઃ ।
મૃકણ્ડઃ સહ પુત્રેણ પર્વતો દારુકસ્તથા ॥ ૧૯॥

ધૌમ્યોપમન્યુવત્સાદ્યા મુનયો મુનિકન્યકાઃ ।
તચ્છાન્ત્યર્થં સમાજગ્મુર્ધન્યં વિશ્વાનરાશ્રમમ્ ॥ ૨૦॥

બ્રહ્મા બૃહસ્પતિયુતો દેવો ગરુડવાહનઃ ।
નન્દિભૃઙ્ગિસમાયુક્તો ગૌર્યા સહ વૃષધ્વજઃ ॥ ૨૧॥

મહેન્દ્રમુખ્યા ગીર્વાણા નાગાઃ પાતાલવાસિનઃ ।
રત્નાન્યાદાય બહુશઃ સસરિત્કા મહાબ્ધયઃ ॥ ૨૨॥

સ્થાવરા જઙ્ગમં રૂપં ધૃત્વાયાતાઃ સહસ્રશઃ ।
મહામહોત્સવે તસ્મિન્ બભૂવાકાલકૌમુદી ॥ ૨૩॥

જાતકર્મ સ્વયં તસ્ય કૃતવાન્વિધિરાનતઃ ।
શ્રુતિં વિચાર્ય તદ્રૂપં નામ્ના ગૃહપતિસ્ત્વયમ્ ॥ ૨૪॥

ઇતિ નામ દદૌ તસ્મૈ દેયમેકાદશેઽહનિ ।
નામકર્મવિધાનેન તદર્થં શ્રુતિમુચ્ચરન્ ॥ ૨૫॥

ચતુર્નિગમમન્ત્રોક્તૈરાશીર્ભિરભિનન્દ્ય ચ ।
સમયાદ્ધં સમારુહ્ય સર્વેષાં ચ પિતામહઃ ॥ ૨૬॥

કૃત્વા બાલોચિતાં રક્ષાં લૌકિકીં ગતિમાશ્રિતઃ ।

આરુહ્ય યાનં સ્વં ધામ હરોઽપિ હરિણા યયૌ ॥ ૨૭॥

અહો રૂપમહો તેજસ્ત્વહો સર્વાઙ્ગલક્ષણમ્ ।
અહો શુચિષ્મતીભાગ્યમાવિરાસીત્સ્વયં હરઃ ॥ ૨૮॥

અથવા કિમિદં ચિત્રં શર્વભક્તજનેષ્વહો ।
સ્વયમાવિરભૂદ્ રુદ્રો યતો રુદ્રસ્તદર્ચિતઃ ॥ ૨૯॥

ઇતિ સ્તુવન્તસ્તેઽન્યોઽન્યં સમ્પ્રહૃષ્ટતનૂરુહઃ ।
વિશ્વાનરં સમાપૃચ્છ્ય જગ્મુઃ સર્વે યથાગતમ્ ॥ ૩૦॥

અતઃ પુત્રં સમીહન્તે ગૃહસ્થાશ્રમવાસિનઃ ।
પુત્રેણ લોકાઞ્જયતિ શ્રુતિરેષા સનાતની ॥ ૩૧॥

અપુત્રસ્ય ગૃહં શૂન્યમપુત્રસ્યાર્જનં વૃથા ।
અપુત્રસ્ય તપશ્છિન્નં નો પવિત્રત્યપુત્રતઃ ॥ ૩૨॥

ન પુત્રાત્પરમો લાભો ન પુત્રાત્પરમં સુખમ્ ।
ન પુત્રાત્પરમં મિત્રં પરત્રેહ ચ કુત્રચિત્ ॥ ૩૩॥

નિષ્ક્રમોઽથ ચતુર્થેઽસ્ય માસિ પિત્રા કૃતો ગૃહાત્ ।
અન્નપ્રાશનમબ્દાર્દ્ધે ચૂડાબ્દે ચાર્થવત્કૃતા ॥ ૩૪॥

કર્ણવેધં તતઃ કૃત્વા શ્રવણર્ક્ષે સ કર્મવિત્ ।
બ્રહ્મતેજોભિવૃદ્ધ્યર્થં પઞ્ચમેઽબ્દે વ્રતં દદૌ ॥ ૩૫॥

ઉપાકર્મ તતઃ કૃત્વા વેદાનધ્યાપયત્સુધીઃ ।
ત્ર્યબ્દં વેદાન્સ વિધિનાધ્યૈષ્ટ સાઙ્ગપદક્રમાન્ ॥ ૩૬॥

વિદ્યાજાતં સમસ્તં ચ સાક્ષિમાત્રં ગુરોર્મુખાત્ ।
વિનયાદિગુણાનાવિષ્કુર્વઞ્જગ્રાહ શક્તિમાન્ ॥ ૩૭॥

તતોઽથ નવમે વર્ષે પિત્રોઃ શુશ્રૂષણે રતમ્ ।
વૈશ્વાનરં ગૃહપતિં દ્રષ્ટુમાયાચ્ચ નારદઃ ॥ ૩૮॥

વિશ્વાનરોટજં પ્રાપ્ય દેવર્ષિસ્તં તુ કૌતુકી ।
અપૃચ્છત્કુશલં તત્ર ગૃહીતાર્ઘાસનઃ ક્રમાત્ ॥ ૩૯॥

તતઃ સર્વં ચ તદ્ભાગ્યં પુત્રધર્મં ચ સમ્મુખે ।
વિશ્વાનરં સમવદત્સ્મૃત્વા શિવપદામ્બુજમ્ ॥ ૪૦॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તો મુનિના બાલઃ પિત્રોરાજ્ઞામવાપ્ય સઃ ।
પ્રણમ્ય નારદં શ્રીમાન્ ભક્ત્યા પ્રહ્વ ઉપાવિશત ॥ ૪૧॥

નારદ ઉવાચ ।
વૈશ્વાનર સમભ્યેહિ મમોત્સઙ્ગે નિષીદ ભોઃ ।
લક્ષણાનિ પરીક્ષેઽહં પાણિં દર્શય દક્ષિણમ્ ॥ ૪૨॥

તતો દૃષ્ટ્વા તુ સર્વં હિ તાલુજિહ્વાદિ નારદઃ ।
વિશ્વાનરં સમવદચ્છિવપ્રેરણયા સુધીઃ ॥ ૪૩॥

નારદ ઉવાચ ।
વિશ્વાનર મુને વચ્મિ શૃણુ પુત્રાઙ્ગમાદરાત્ ।
સર્વાઙ્ગસ્વઙ્ગવાન્પુત્રો મહાલક્ષણવાનયમ્ ॥ ૪૪॥

કિન્તુ સર્વગુણોપેતં સર્વલક્ષણલક્ષિતમ્ ।
સમ્પૂર્ણનિર્મલકલં પાલયેદ્વિધુવદ્વિધિઃ ॥ ૪૫॥

તસ્માત્સર્વપ્રયત્નેન રક્ષણીયસ્ત્વસૌ શિશુઃ ।
ગુણોઽપિ દોષતાં યાતિ વક્રીભૂતે વિધાતરિ ॥ ૪૬॥

શઙ્કેઽસ્ય દ્વાદશે વર્ષે પ્રત્યૂહો વિદ્યુદગ્નિતઃ ।
ઇત્યુક્ત્વા નારદોઽગચ્છદ્દેવલોકં યથાગતમ્ ॥ ૪૭॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં ગૃહપત્યવતારોપાખ્યાને ગૃહપત્યવતારવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૩.૧૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૧૫. પઞ્ચદશોઽધ્યાયઃ । ગૃહપત્યવતારવર્ણનમ્ ૩ ।

નન્દીશ્વર ઉવાચ ।
વિશ્વાનરઃ સપત્નીકઃ તચ્છ્રુત્વા નારદેરિતમ્ ।
તદેવં મન્યમાનોઽભૂદ્વજ્રપાતં સુદારુણમ્ ॥ ૧॥

હા હતોઽસ્મીતિ વચસા હૃદયં સમતાડયત્ ।
મૂર્ચ્છામવાપ મહતીં પુત્રશોકસમાકુલઃ ॥ ૨॥

શુચિષ્મત્યપિ દુઃખાર્તા રુરોદાતીવ દુસ્સહમ્ ।
અતિસ્વરેણ હારાવૈરત્યન્તં વ્યાકુલેન્દ્રિયા ॥ ૩॥

શ્રુત્વાર્તનાદમિતિ વિશ્વનરોઽપિ મોહં
હિત્વોત્થિતઃ કિમિતિ કિં ત્વિતિ કિં કિમેતત્ ।
ઉચ્ચૈર્વદન્ ગૃહપતિઃ ક્વ સ મે બહિસ્થઃ
પ્રાણોઽન્તરાત્મનિલયસ્સકલેન્દ્રિયેશઃ ॥ ૪॥

તતો દૃષ્ટ્વા સ પિતરૌ બહુશોકસમાવૃતૌ ।
સ્મિત્વોવાચ ગૃહપતિઃ સબાલઃ શઙ્કરાંશજઃ ॥ ૫॥

ગૃહપતિરુવાચ ।
હે માતસ્તાત કિં જાતં કારણં તદ્વદાધુના ।
કિમર્થં રુદિતોઽત્યર્થં ત્રાસસ્તાદૃક્ કુતો હિ વામ્ ॥ ૬॥

ન માં કૃતવપુસ્ત્રાણં ભવચ્ચરણરેણુભિઃ ।
કાલઃ કલયિતું શક્તો વરાકી ચઞ્ચલાલ્પિકા ॥ ૭॥

પ્રતિજ્ઞાં શ ृણુતાં તાતૌ યદિ વાં તનયો હ્યહમ્ ।
કરિષ્યેઽહં તથા યેન મૃત્યુસ્ત્રસ્તો ભવિષ્યતિ ॥ ૮॥

મૃત્યુઞ્જયં સમારાધ્ય સર્વજ્ઞં સર્વદં સતામ્ ।
જપિષ્યામિ મહાકાલં સત્યં તાતૌ વદામ્યહમ્ ॥ ૯॥

નન્દીશ્વર ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય જારિતૌ દ્વિજદમ્પતી ।
અકાલામૃતવર્ષૌઘૈર્ગતતાપૌ તદોચતુઃ ॥ ૧૦॥

દ્વિજદમ્પતી ઊચતુઃ ।
પુનર્બ્રૂહિ પુનર્બ્રૂહિ કીદૃક્ કીદૃક્ પુનર્વદ ।
કાલઃ કલયિતું નાલં વરાકી ચઞ્ચલાસ્તિ કા ॥ ૧૧॥

આવયોસ્તાપનાશાય મહોપાયસ્ત્વયેરિતઃ ।
મૃત્યુઞ્જયાખ્યદેવસ્ય સમારાધનલક્ષણઃ ॥ ૧૨॥

તદ્વચ્ચ શરણં શમ્ભોર્નાતઃ પરતરં હિ તત્ ।

મનોરથપથાતીતકારિણઃ પાપહારિણઃ ॥ ૧૩॥

કિં ન શ્રુતં ત્વયા તાત શ્વેતકેતું યથા પુરા ।
પાશિતં કાલપાશેન રરક્ષ ત્રિપુરાન્તકઃ ॥ ૧૪॥

શિલાદતનયં મૃત્યુગ્રસ્તમષ્ટાબ્દમાત્રકમ્ ।
શિવો નિજજનં ચક્રે નન્દિનં વિશ્વનન્દિનમ્ ॥ ૧૫॥

ક્ષીરોદમથનોદ્ભૂતં પ્રલયાનલસન્નિભમ્ ।
પીત્વા હાલાહલં ઘોરમરક્ષદ્ભુવનત્રયમ્ ॥ ૧૬॥

જલન્ધરં મહાદર્પં હૃતત્રૈલોક્યસમ્પદમ્ ।
રુચિરાઙ્ગુષ્ઠરેખોત્થચક્રેણ નિજઘાન યઃ ॥ ૧૭॥

ય એકેષુનિપાતોત્થજ્વલનૈસ્ત્રિપુરમ્પુરા ।
ત્રૈલોક્યૈશ્વર્યસમ્મૂઢં શોષયામાસ ભાનુના ॥ ૧૮॥

કામં દૃષ્ટિનિપાતેન ત્રૈલોક્યવિજયોર્જિતમ્ ।
નિનાયાનઙ્ગપદવીં વીક્ષ્યમાણેષ્વજાદિષુ ॥ ૧૯॥

તં બ્રહ્માદ્યૈકકર્તારં મેઘવાહનમચ્યુતમ્ ।
પ્રયાહિ પુત્ર શરણં વિશ્વરક્ષામણિં શિવમ્ ॥ ૨૦॥

નન્દીશ્વર ઉવાચ ।
પિત્રોરનુજ્ઞાં પ્રાપ્યેતિ પ્રણમ્ય ચરણૌ તયોઃ ।
પ્રાદક્ષિણ્યમુપાવૃત્ય બહ્વાશ્વાસ્ય વિનિર્યયૌ ॥ ૨૧॥

સમ્પ્રાપ્ય કાશીં દુષ્પ્રાપાં બ્રહ્મનારાયણાદિભિઃ ।
મહાસંવર્ત્તસન્તાપહન્ત્રીં વિશ્વેશપાલિતામ્ ॥ ૨૨॥

સ્વર્ધુન્યા હારયષ્ટ્યેવ રાજિતાં કણ્ઠભૂમિષુ ।
વિચિત્રગુણશાલિન્યા હરપત્ન્યા વિરાજિતામ્ ॥ ૨૩॥

તત્ર પ્રાપ્ય સ વિપ્રેશઃ પ્રાગ્યયૌ મણિકર્ણિકામ્ ।
તત્ર સ્નાત્વા વિધાનેન દૃષ્ટ્વા વિશ્વેશ્વરં પ્રભુમ્ ॥ ૨૪॥

સાઞ્જલિર્નતશીર્ષોઽસૌ મહાનન્દાન્વિતઃ સુધીઃ ।
ત્રૈલોક્યપ્રાણસન્ત્રાણકારિણં પ્રણનામ હ ॥ ૨૫॥

આલોક્યાલોક્ય તલ્લિઙ્ગં તુતોષ હૃદયે મુહુઃ ।
પરમાનન્દકન્દાઢ્યં સ્ફુટમેતન્ન સંશયઃ ॥ ૨૬॥

અહો ન મત્તો ધન્યોઽસ્તિ ત્રૈલોક્યે સચરાચરે ।
યદદ્રાક્ષિષમદ્યાહં શ્રીમદ્વિશ્વેશ્વરં વિભુમ્ ॥ ૨૭॥

મમ ભાગ્યોદયાયૈવ નારદેન મહર્ષિણા ।
પુરાગત્ય તથોક્તં યત્કૃતકૃત્યોઽસ્મ્યહં તતઃ ॥ ૨૮॥

નન્દીશ્વર ઉવાચ ।
ઇત્યાનન્દામૃતરસૈર્વિધાય સ હિ પારણમ્ ।
તતઃ શુભેઽહ્નિ સંસ્થાપ્ય લિઙ્ગં સર્વહિતપ્રદમ્ ॥ ૨૯॥

જગ્રાહ નિયમાન્ઘોરાન્ દુષ્કરાનકૃતાત્મભિઃ ।
અષ્ટોત્તરશતૈઃ કુમ્ભૈઃ પૂર્ણૈર્ગઙ્ગાઽમ્ભસા શુભૈઃ ॥ ૩૦॥

સંસ્નાપ્ય વાસસા પૂતૈઃ પૂતાત્મા પ્રત્યહં શિવમ્ ।
નીલોત્પલમયીં માલાં સમર્પયતિ સોઽન્વહમ્ ॥ ૩૧॥

અષ્ટાધિકસહસ્રૈસ્તુ સુમનોભિર્વિનિર્મિતામ્ ।
સ પક્ષે વાથ વા માસે કન્દમૂલફલાશનઃ ॥ ૩૨॥

શીર્ણપર્ણાશનૈર્ધીરઃ ષણ્માસં સમ્બભૂવ સઃ ।
ષણ્માસં વાયુભક્ષોઽભૂત્ષણ્માસં જલબિન્દુભુક્ ॥ ૩૩॥

એવં વર્ષદ્વયં તસ્ય વ્યતિક્રાન્તં મહાત્મનઃ ।
શિવૈકમનસો વિપ્રાસ્તપ્યમાનસ્ય નારદ ॥ ૩૪॥

જન્મતો દ્વાદશે વર્ષે તદ્વચો નારદેરિતમ્ ।
સત્યં કરિષ્યન્નિવ તમભ્યગાત્કુલિશાયુધઃ ॥ ૩૫॥

ઉવાચ ચ વરં બ્રૂહિ દદ્મિ ત્વન્મનસિ સ્થિતમ્ ।
અહં શતક્રતુર્વિપ્ર પ્રસન્નોઽસ્મિ શુભવ્રતૈઃ ॥ ૩૬॥

નન્દીશ્વર ઉવાચ ।
ઇત્યાકર્ણ્ય મહેન્દ્રસ્ય વાક્યં મુનિકુમારકઃ ।
ઉવાચ મધુરં ધીરઃ કીર્તયન્મધુરાક્ષરમ્ ॥ ૩૭॥

ગૃહપતિરુવાચ ।
મઘવન્ વૃત્રશત્રો ત્વાં જાને કુલિશપાણિનમ્ ।
નાહં વૃણે વરં ત્વત્તઃ શઙ્કરો વરદોઽસ્તિ મે ॥ ૩૮॥

ઇન્દ્ર ઉવાચ ।
ન મત્તઃ શઙ્કરસ્ત્વન્યો દેવદેવોઽસ્મ્યહં શિશો ।
વિહાય બાલિશત્વં ત્વં વરં યાચસ્વ મા ચિરમ્ ॥ ૩૯॥

ગૃહપતિરુવાચ ।
ગચ્છાહલ્યાપતેઽસાધો ગોત્રારે પાકશાસન ।
ન પ્રાર્થયે પશુપતેરન્યં દેવાન્તરં સ્ફુટમ્ ॥ ૪૦॥

નન્દીશ્વર ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા ક્રોધસંરક્તલોચનઃ ।
ઉદ્યમ્ય કુલિશં ઘોરં ભીષયામાસ બાલકમ્ ॥ ૪૧॥

સ દૃષ્ટ્વા બાલકો વજ્રં વિદ્યુજ્જ્વાલાસમાકુલમ્ ।
સ્મરન્નારદવાક્યં ચ મુમૂર્ચ્છ ભયવિહ્વલઃ ॥ ૪૨॥

અથ ગૌરીપતિઃ શમ્ભુરાવિરાસીત્તમોનુદઃ ।
ઉત્તિષ્ઠોત્તિષ્ઠ ભદ્રં તે સ્પર્શૈઃ સઞ્જીવયન્નિવ ॥ ૪૩॥

ઉન્મીલ્ય નેત્રકમલે સુપ્તે ઇવ દિનક્ષયે ।
અપશ્યદગ્રે ચોત્થાય શમ્ભુમર્કશતાધિકમ્ ॥ ૪૪॥

ભાલે લોચનમાલોક્ય કણ્ઠેકાલં વૃષધ્વજમ્ ।
વામાઙ્ગસન્નિવિષ્ટાદ્રિતનયં ચન્દ્રશેખરમ્ ॥ ૪૫॥

કપર્દેન વિરાજન્તં ત્રિશૂલાજગવાયુધમ્ ।
સ્ફુરત્કર્પૂરગૌરાઙ્ગં પરિણદ્ધગજાજિનમ્ ॥ ૪૬॥

પરિજ્ઞાય મહાદેવં ગુરુવાક્યત આગમાત્ ।
હર્ષબાષ્પાકુલાસન્નકણ્ઠરોમાઞ્ચકઞ્ચુકઃ ॥ ૪૭॥

ક્ષણં ચ ગિરિવિત્તસ્થૌ ચિત્રકૃત્રિમપુત્રકઃ ।
યથા તથા સુસમ્પન્નો વિસ્મૃત્યાત્માનમેવ ચ ॥ ૪૮॥

ન સ્તોતું ન નમસ્કર્તું કિઞ્ચિદ્વિજ્ઞપ્તુમેવ ચ ।
યદા સ ન શશાકાલં તદા સ્મિત્વાહ શઙ્કરઃ ॥ ૪૯॥

ઈશ્વર ઉવાચ ।
શિશો ગૃહપતે શક્રાદ્વજ્રોદ્યતકરાદહો ।
જ્ઞાતં ભીતોઽસિ મા ભૈષીર્જિજ્ઞાસા તે મયા કૃતા ॥ ૫૦॥

મમ ભક્તસ્ય નો શક્રો ન વજં ચાન્તકોઽપિ ચ ।
પ્રભવેદિન્દ્રરૂપેણ મયૈવ ત્વં બિભીષિતઃ ॥ ૫૧॥

વરં દદામિ તે ભદ્ર ત્વમગ્નિપદભાગ્ભવ ।
સર્વેષામેવ દેવાનાં વરદસ્ત્વં ભવિષ્યસિ ॥ ૫૨॥

સર્વેષામેવ ભૂતાનાં ત્વમગ્નેઽન્તશ્ચરો ભવ ।
ધર્મરાજેન્દ્રયોર્મધ્યે દિગીશો રાજ્યમાપ્નુહિ ॥ ૫૩॥

ત્વયેદં સ્થાપિતં લિઙ્ગં તવ નામ્ના ભવિષ્યતિ ।
અગ્નીશ્વર ઇતિ ખ્યાતં સર્વતેજોવિબૃંહણમ્ ॥ ૫૪॥

અગ્નીશ્વરસ્ય ભક્તાનાં ન ભયં વિદ્યુદગ્નિભિઃ ।
અગ્નિમાન્દ્યભયં નૈવ નાકાલમરણં ક્વચિત્ ॥ ૫૫॥

અગ્નીશ્વરં સમભ્યર્ચ્ય કાશ્યાં સર્વસમૃદ્ધિદમ્ ।
અન્યત્રાપિ મૃતો દૈવાદ્વહ્નિલોકે મહીયતે ॥ ૫૬॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વાનીય તદ્બન્ધૂન્પિત્રોશ્ચ પરિપશ્યતોઃ ।
દિક્પતિત્વેઽભિષિચ્યાગ્નિં તત્ર લિઙ્ગે શિવોઽવિશત્ ॥ ૫૭॥

ઇત્થમગ્ન્યવતારસ્તે વર્ણિતો મે જનાર્દનઃ ।
નામ્ના ગૃહપતિસ્તાત શઙ્કરસ્ય પરાત્મનઃ ॥ ૫૮॥

ચિત્રહોત્રપુરી રમ્યા સુખદાર્ચિષ્મતી વરા ।
જાતવેદસિ યે ભક્તા તે તત્ર નિવસન્તિ વૈ ॥ ૫૯॥

અગ્નિપ્રવેશં યે કુર્યુર્દૃઢસત્ત્વા જિતેન્દ્રિયાઃ ।
સ્ત્રિયો વા સત્ત્વસમ્પન્નાસ્તે સર્વેઽપ્યગ્નિતેજસઃ ॥ ૬૦॥

અગ્નિહોત્રરતા વિપ્રાઃ સ્થાપિતા બ્રહ્મચારિણઃ ।
પઞ્ચાગ્નિવર્ત્તિનોઽપ્યેવમગ્નિલોકેઽગ્નિવર્ચસઃ ॥ ૬૧॥

શીતે શીતાપનુત્ત્યૈ યસ્ત્વેધોભારાન્પ્રયચ્છતિ ।
કુર્યાદગ્નીષ્ટિકાં વાથ સ વસેદગ્નિસન્નિધૌ ॥ ૬૨॥

અનાથસ્યાગ્નિસંસ્કારં યઃ કુર્યાચ્છ્રદ્ધયાન્વિતઃ ।
અશક્તઃ પ્રેરયેદન્યં સોઽગ્નિલોકે મહીયતે ॥ ૬૩॥

અગ્નિરેકો દ્વિજાતીનાં નિઃશ્રેયસકરઃ પરઃ ।

ગુરુર્દેવો વ્રતં તીર્થં સર્વમગ્નિર્વિનિશ્ચિતમ્ ॥ ૬૪॥

અપાવનાનિ સર્વાણિ વહ્નિસંસર્ગતઃ ક્ષણાત્ ।
પાવનાનિ ભવન્ત્યેવ તસ્માદ્યઃ પાવકઃ સ્મૃતઃ ॥ ૬૫॥

અન્તરાત્મા હ્યયં સાક્ષાન્નિશ્ચયો હ્યાશુશુક્ષણિઃ ।
માંસગ્રાસાન્પચેત્કુક્ષૌ સ્ત્રીણાં નો માંસપેશિકામ્ ॥ ૬૬॥

તૈજસી શામ્ભવી મૂર્તિઃ પ્રત્યક્ષા દહનાત્મિકા ।
કર્ત્રી હર્ત્રી પાલયિત્રી વિનૈતાં કિં વિલોક્યતે ॥ ૬૭॥

ચિત્રભાનુરયં સાક્ષાન્નેત્રં ત્રિભુવનેશિતુઃ ।
અન્ધે તમોમયે લોકે વિનૈનં કઃ પ્રકાશનઃ ॥ ૬૮॥

ધૂપપ્રદીપનૈવેદ્યપયોદધિઘૃતૈક્ષવમ્ ।
એતદ્ભુક્તં નિષેવન્તે સર્વે દિવિ દિવૌકસઃ ॥ ૬૯॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં ગૃહપત્યવતારવર્ણનં નામ પઞ્ચદશોऽધ્યાયઃ ॥ ૩.૧૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૧૬. ષોડશોऽધ્યાયઃ । યક્ષેશ્વરાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
યક્ષેશ્વરાવતારં ચ શૃણુ શમ્ભોર્મુનીશ્વર ।
ગર્વિણં ગર્વહન્તારં સતાં ભક્તિવિવર્દ્ધનમ્ ॥ ૧॥

પુરા દેવાશ્ચ દૈત્યાશ્ચ પીયૂષાર્થં મહાબલાઃ ।
ક્ષીરોદધિં મમન્થુસ્તે સુકૃતસ્વાર્થસન્ધયઃ ॥ ૨॥

મથ્યમાનેऽમૃતે પૂર્વં ક્ષીરાબ્ધેઃ સુરદાનવૈઃ ।
અગ્રેઃ સમુત્થિતં તસ્માદ્વિષં કાલાનલપ્રભમ્ ॥ ૩॥

તં દૃષ્ટ્વા નિખિલા દેવા દૈત્યાશ્ચ ભયવિહ્વલાઃ ।
વિદ્રુત્ય તરસા તાત શમ્ભોસ્તે શરણં યયુઃ ॥ ૪॥

દૃષ્ટ્વા તં શઙ્કરં સર્વે સર્વદેવશિખામણિમ્ ।

પ્રણમ્ય તુષ્ટુવુર્ભક્ત્યા સાચ્યુતા નતમસ્તકાઃ ॥ ૫॥

તતઃ પ્રસન્નો ભગવાન્ શઙ્કરો ભક્તવત્સલઃ ।
પપૌ વિષં મહાઘોરં સુરાસુરગણાર્દનમ્ ॥ ૬॥

પતિં તં વિષમં કણ્ઠે નિદધે વિષમુલ્બણમ્ ।
રેજે તેનાતિ સ વિભુર્નીલકણ્ઠો બભૂવ હ ॥ ૭॥

તતઃ સુરાસુરગણા મમન્થુઃ પુનરેવ તમ્ ।
વિષદાહવિનિર્મુક્તાઃ શિવાનુગ્રહતોઽખિલાઃ ॥ ૮॥

તતો બહૂનિ રત્નાનિ નિસ્સૃતાનિ તતો મુને ।
અમૃતં ચ પદાર્થં હિ સુરદાનવયોર્મુને ॥ ૯॥

તં પપુઃ કેવલં દેવા નાસુરાઃ કૃપયા હરેઃ ।
તતો બભૂવ સુમહદ્રણં તેષાં મિથોઽકદમ્ ॥ ૧૦॥

દ્વન્દ્વયુદ્ધં બભૂવાથ દેવદાનવયોર્મુને ।
તત્ર રાહુભયાચ્ચન્દ્રો વિદુદ્રાવ તદર્દિતઃ ॥ ૧૧॥

જગામ સદનં શમ્ભોઃ શરણ ભયવિહ્વલઃ ।
સુપ્રણમ્ય ચ તુષ્ટાવ પાહિ પાહીતિ સંવદન્ ॥ ૧૨॥

તતઃ સતામભયદઃ શઙ્કરો ભક્તવત્સલઃ ।
દધ્રે શિરસિ ચન્દ્રં સ વિભુઃ શરણમાગતમ્ ॥ ૧૩॥

અથાગતસ્તદા રાહુસ્તુષ્ટાવ સુપ્રણમ્ય તમ્ ।
શઙ્કરં સકલાધીશં વાગ્ભિરિષ્ટાભિરાદરાત્ ॥ ૧૪॥

શમ્ભુસ્તન્મતમાજ્ઞાય તચ્છિરાંસ્યચ્યુતેન હ ।
પુરા છિન્નાનિ વૈ કેતુસંજ્ઞાનિ નિદધે ગલે ॥ ૧૫॥

તતો યુદ્ધેઽસુરાઃ સર્વે દેવૈશ્ચૈવ પરાજિતાઃ ।
પીત્વામૃતં સુરાઃ સર્વે જય પ્રાપુર્મહાબલાઃ ॥ ૧૬॥

વિષ્ણુપ્રભૃતયઃ સર્વે બભૂવુશ્ચાતિગર્વિતાઃ ।
બલાનિ ચાહ્કુરન્તોઽન્તઃ શિવમાયાવિમોહિતાઃ ॥ ૧૭॥

તતઃ સ શઙ્કરો દેવઃ સર્વાધીશોઽથ ગર્વહા ।
યક્ષો ભૂત્વા જગામાશુ યત્ર દેવાઃ સ્થિતા મુને ॥ ૧૮॥

સર્વાન્ દૃષ્ટ્વાચ્યુતમુખાન્દેવાન્યક્ષપતિઃ સ વૈ ।
મહાગર્વાઢ્યમનસા મહેશઃ પ્રાહ ગર્વહા ॥ ૧૯॥

યક્ષેશ્વર ઉવાચ ।
કિમર્થં સંસ્થિતા યૂયમત્ર સર્વે સુરા મિથઃ ।
કિમુ કાષ્ઠાખિલં બ્રુત કારણં મેઽનુ પૃચ્છતે ॥ ૨૦॥

દેવા ઊચુઃ ।
અભૂદત્ર મહાન્દેવ રણઃ પરમદારુણઃ ।
અસુરા નાશિતાઃ સર્વેઽવશિષ્ટા વિદ્રુતા ગતાઃ ॥ ૨૧॥

વયં સર્વે મહાવીરા દૈત્યઘ્ના બલવત્તરાઃ ।
અગ્રેઽસ્માકં કિયન્તસ્તે દૈત્યાઃ ક્ષુદ્રબલાઃ સદા ॥ ૨૨॥

નન્દીશ્વર ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તેષાં સુરાણાં ગર્વગર્ભિતમ્ ।
ગર્વહાસૌ મહાદેવો યક્ષરૂપો વચોઽબ્રવીત્ ॥ ૨૩॥

યક્ષેશ્વર ઉવાચ ।
હે સુરા નિખિલા યૂયં મદ્વચઃ શૃણુતાદરાત્ ।
યથાર્થં વચ્મિ નાસત્યં સર્વગર્વાપહારકમ્ ॥ ૨૪॥

ગર્વમેનં ન કુરુત કર્તા હર્તાપરઃ પ્રભુઃ ।
વિસ્મૃતાશ્ચ મહેશાનં કથયધ્વં વૃથા બલાઃ ॥ ૨૫॥

યુષ્માકં ચેત્સ હિ મદો જાનતાં સ્વબલં મહત્ ।
મત્સ્થાપિતં તૃણમિદં છિન્ત સ્વાસ્ત્રૈશ્ચ તૈઃ સુરાઃ ॥ ૨૬॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વૈકં તૃણં તેષાં નિચિક્ષેપ પુરસ્તતઃ ।
જહ્રે સર્વમદં યક્ષરૂપ ઈશઃ સતાં ગતિઃ ॥ ૨૭॥

અથ સર્વે સુરા વિષ્ણુપ્રમુખા વીરમાનિનઃ ।
કૃત્વા સ્વપૌરુષં તત્ર સ્વાયુધાનિ વિચિક્ષિપુઃ ॥ ૨૮॥

તત્રાસન્ વિફલાન્યાશુ તાન્યસ્ત્રાણિ દિવૌકસામ્ ।
શિવપ્રભાવતસ્તેષાં મૂઢગર્વાપહારિણઃ ॥ ૨૯॥

અથાસીત્તુ નભોવાણી દેવવિસ્મયહારિણી ।

યક્ષોઽયં શઙ્કરો દેવાઃ સર્વગર્વાપહારકઃ ॥ ૩૦॥

કર્તા હર્તા તથા ભર્તાયમેવ પરમેશ્વરઃ ।
એતદ્બલેન બલિનો જીવાઃ સર્વેઽન્યથા ન હિ ॥ ૩૧॥

અસ્ય માયાપ્રભાવાદ્ વૈ મોહિતાઃ સ્વપ્રભું શિવમ્ ।
મદતો બુબુધુર્નૈવાદ્યાપિ બોધતનું પ્રભુમ્ ॥ ૩૨॥

નન્દીશ્વર ઉવાચ ।
ઇતિ શ્રુત્વા નભોવાણીં બુબુધુસ્તે ગતસ્મયાઃ ।
યક્ષેશ્વરં પ્રણેમુશ્ચ તુષ્ટુવુશ્ચ તમીશ્વરમ્ ॥ ૩૩॥

દેવા ઊચુઃ ।
દેવદેવ મહાદેવ સર્વગર્વાપહારક ।
યક્ષેશ્વર મહાલીલ માયા તેઽત્યદ્ભુતા પ્રભો ॥ ૩૪॥

મોહિતા માયયાદ્યાપિ તવ યક્ષસ્વરૂપિણઃ ।
સગર્વમભિભાષન્તસ્ત્વત્પુરો હિ પૃથઙ્મયાઃ ॥ ૩૫॥

ઇદાનીં જ્ઞાનમાયાતં તવૈવ કૃપયા પ્રભો ।
કર્તા હર્તા ચ ભર્તા ચ ત્વમેવાન્યો ન શઙ્કર ॥ ૩૬॥

ત્વમેવ સર્વશક્તીનાં સર્વેષાં હિ પ્રવર્તકઃ ।
નિવર્તકશ્ચ સર્વેશઃ પરમાત્માવ્યયોઽદ્વયઃ ॥ ૩૭॥

યક્ષેશ્વરસ્વરૂપેણ સર્વેષાં નો મદો હૃતઃ ।
કૃતો મન્યામહે તત્તેઽનુગ્રહો હિ કૃપાલુના ॥ ૩૮॥

અથો સ યક્ષનાથોઽનુગૃહ્ય વૈ સકલાન્ સુરાન્ ।
વિબોધ્ય વિવિધૈર્વાક્યૈસ્તત્રૈવાન્તરધીયત ॥ ૩૯॥

ઇત્થં સ વર્ણિતઃ શમ્ભોરવતારઃ સુખાવહઃ ।
યક્ષેશ્વરાખ્યઃ સુખદઃ સતાં તુષ્ટોઽભયઙ્કરઃ ॥ ૪૦॥

ઇદમાખ્યાનમમલં સર્વગર્વાપહારકમ્ ।
સતાં સુશાન્તિદં નિત્યં ભુક્તિમુક્તિપ્રદં નૃણામ્ ॥ ૪૧॥

ય ઇદં શ‍ૃણુયાદ્ભક્ત્યા શ્રાવયેદ્વા સુધીઃ પુમાન્ ।
સર્વકામાનવાપ્નોતિ તતશ્ચ લભતે ગતિમ્ ॥ ૪૨॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં યક્ષેશ્વરાવતારવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૩.૧૬॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૧૭. સપ્તદશોઽધ્યાયઃ । શિવદશાવતારવર્ણનમ્ ।

શ‌ૃણ્વથો ગિરિશસ્યાદ્યાવતારાન્ દશસઙ્ખ્યકાન્ ।
મહાકાલમુખાન્ ભક્ત્યોપાસનાકાણ્ડસેવિતાન્ ॥ ૧॥

તત્રાદ્યો હિ મહાકાલો ભુક્તિમુક્તિપ્રદઃ સતામ્ ।
શક્તિસ્તત્ર મહાકાલી ભક્તેપ્સિતફલપ્રદા ॥ ૨॥

તારનામા દ્વિતીયશ્ચ તારાશક્તિસ્તથૈવ સા ।
ભુક્તિમુક્તિપ્રદૌ ચોભૌ સ્વસેવકસુખપ્રદૌ ॥ ૩॥

ભુવનેશો હિ બાલાહ્વસ્તૃતીયઃ પરિકીર્તિતઃ ।
ભુવનેશી શિવા તત્ર બાલાહ્વા સુખદા સતામ્ ॥ ૪॥

શ્રીવિદ્યેશઃ ષોડશાહ્વઃ શ્રીર્વિદ્યા ષોડશી શિવા ।
ચતુર્થો ભક્તસુખદો ભુક્તિમુક્તિફલપ્રદઃ ॥ ૫॥

પઞ્ચમો ભૈરવઃ ખ્યાતઃ સર્વદા ભક્તકામદઃ ।
ભૈરવી ગિરિજા તત્ર સદુપાસકકામદા ॥ ૬॥

છિન્નમસ્તકનામાસૌ શિવઃ ષષ્ઠઃ પ્રકીર્તિતઃ ।
ભક્તકામપ્રદા ચૈવ ગિરિજા છિન્નમસ્તકા ॥ ૭॥

ધૂમવાન્ સપ્તમઃ શમ્ભુઃ સર્વકામફલપ્રદઃ ।
ધૂમવતી શિવા તત્ર સદુપાસકકામદા ॥ ૮॥

શિવાવતારઃ સુખદો હ્યષ્ટમો બગલામુખઃ ।
શક્તિસ્તત્ર મહાનન્દા વિખ્યાતા બગલામુખી ॥ ૯॥

શિવાવતારો માતઙ્ગો નવમઃ પરિકીર્તિતઃ ।
માતઙ્ગી તત્ર શર્વાણી સર્વકામફલપ્રદા ॥ ૧૦॥

દશમઃ કમલઃ શમ્ભુર્ભુક્તિમુક્તિફલપ્રદઃ ।

કમલા ગિરિજા તત્ર સ્વભક્તપરિપાલિની ॥ ૧૧॥

એતે દશમિતાઃ શૈવા અવતારાઃ સુખપ્રદાઃ ।
ભુક્તિમુક્તિપ્રદાશ્ચૈવ ભક્તાનાં સર્વદા સતામ્ ॥ ૧૨॥

એતે દશાવતારા હિ શઙ્કરસ્ય મહાત્મનઃ ।
નાનાસુખપ્રદા નિત્યં સેવતાં નિર્વિકારતઃ ॥ ૧૩॥

એતદ્દશાવતારાણાં માહાત્મ્યં વર્ણિતં મુને ।
સર્વકામપ્રદં જ્ઞેયં તન્ત્રશાસ્ત્રાદિગર્ભિતમ્ ॥ ૧૪॥

એતાસામાદિશક્તીનામદ્ભુતો મહિમા મુને ।
સર્વકામપ્રદો જ્ઞેયસ્તત્રંશાસ્ત્રાદિગર્ભિતઃ ॥ ૧૫॥

શત્રુમારણકાર્યાદૌ તત્તચ્છક્તિઃ પરા મતા ।
ખલદણ્ડકરી નિત્યં બ્રહ્મતેજોવિવર્દ્ધિની ॥ ૧૬॥

ઇત્યુક્તાસ્તે મયા બ્રહ્મન્નવતારા મહેશિતુઃ ।
સશક્તિકા દશમિતા મહાકાલમુખાઃ શુભાઃ ॥ ૧૭॥

શૈવપર્વસુ સર્વેષુ યોઽધીતે ભક્તિતત્પરઃ ।
એતદાખ્યાનમમલં સોઽતિશમ્ભુપ્રિયો ભવેત્ ॥ ૧૮॥

બ્રાહ્મણો બ્રહ્મવર્ચસ્વી ક્ષત્રિયો વિજયી ભવેત્ ।
ધનાધિપો હિ વૈશ્યઃ સ્યાચ્છૂદ્રઃ સુખમવાપ્નુયાત્ ॥ ૧૯॥

શાઙ્કરા નિજધર્મસ્થાઃ શ ृણ્વન્તશ્ચરિતં ત્વિદમ્ ।
સુખિનઃ સ્યુર્વિશેષેણ શિવભક્તા ભવન્તુ ચ ॥ ૨૦॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં શિવદશાવતારવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૩.૧૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૧૮. અષ્ટાદશોઽધ્યાયઃ । એકાદશાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
એકાદશવતારાન્વૈ શ ृણ્વથો શાઙ્કરાન્વરાન્ ।

યાન્ શ્રુત્વા ન હિ બાધ્યેત બાધાસત્યાદિસમ્ભવા ॥ ૧॥

પુરા સર્વે સુરાઃ શક્રમુખા દૈત્યપરાજિતાઃ ।
ત્યક્ત્વામરાવતીં ભીત્યાપલાયન્ત નિજાં પુરીમ્ ॥ ૨॥

દૈત્યપ્રપીડિતા દેવા જગ્મુસ્તે કશ્યપાન્તિકમ્ ।
બધ્વા કરાન્નતસ્કન્ધાઃ પ્રણેમુસ્તં સુવિહ્વલમ્ ॥ ૩॥

સુનુત્વા તં સુરાઃ સર્વે કૃત્વા વિજ્ઞપ્તિમાદરાત્ ।
સર્વં નિવેદયામાસુઃ સ્વદુઃખં તત્પરાજયમ્ ॥ ૪॥

તતઃ સ કશ્યપસ્તાત તત્પિતા શિવસક્તધીઃ ।
તદાકર્ણ્યામરાકં વૈ દુઃખિતોઽભૂન્ન ચાધિકમ્ ॥ ૫॥

તાનાશ્વાસ્ય મુનિઃ સોઽથ ધૈર્યમાધાય શાન્તધીઃ ।
કાશીં જગામ સુપ્રીત્યા વિશ્વેશ્વરપુરીં મુને ॥ ૬॥

ગઙ્ગામ્ભસિ તતઃ સ્નાત્વા કૃત્વા તં વિધિમાદરાત્ ।
વિશ્વેશ્વરં સમાનર્ચ સામ્બં સર્વેશ્વરં પ્રભુમ્ ॥ ૭॥

શિવલિઙ્ગં સુસંસ્થાપ્ય ચકાર વિપુલં તપઃ ।
શમ્ભુમુદ્દિશ્ય સુપ્રીત્યા દેવાનાં હિતકામ્યયા ॥ ૮॥

મહાન્કાલો વ્યતીયાય તપતસ્તસ્ય વૈ મુને ।
શિવપાદામ્બુજાસક્તમનસો ધૈર્યશાલિનઃ ॥ ૯॥

અથ પ્રાદુરભૂચ્છમ્ભુર્વરં દાતું તદર્ષયે ।
સ્વપદાસક્તમનસે દીનબન્ધુઃ સતાં ગતિઃ ॥ ૧૦॥

વરં બ્રૂહીતિ ચોવાચ સુપ્રસન્નો મહેશ્વરઃ ।
કશ્યપં મુનિશાર્દૂલં સ્વભક્તં ભક્તવત્સલઃ ॥ ૧૧॥

દૃષ્ટ્વાથ તં મહેશાનં સ પ્રણમ્ય કૃતાઞ્જલિઃ ।
તુષ્ટાવ કશ્યપો હૃષ્ટો દેવતાતઃ પ્રસન્નધીઃ ॥ ૧૨॥

કશ્યપ ઉવાચ ।
દેવદેવ મહેશાન શરણાગતવત્સલ ।
સર્વેશ્વઃ પરમાત્મા ત્વં ધ્યાનગમ્યોઽદ્વયોઽવ્યયઃ ॥ ૧૩॥

બલનિગ્રહકર્તા ત્વં મહેશ્વર સતાં ગતિઃ ।
દીનબન્ધુર્દયાસિન્ધુર્ભક્તરક્ષણદક્ષધીઃ ॥ ૧૪॥

એતે સુરાસ્ત્વદીયા હિ ત્વદ્ભક્તાશ્ચ વિશેષતઃ ।
દૈત્યૈઃ પરાજિતાશ્ચાથ પાહિ તાન્દુઃખિતાન્ પ્રભો ॥ ૧૫॥

અસમર્થો રમેશોઽપિ દુઃખદસ્તે મુહુર્મુહુઃ ।
અતઃ સુરા મચ્છરણા વેદયન્તોઽસુખં ચ તત્ ॥ ૧૬॥

તદર્થં દેવદેવેશ દેવદુઃખવિનાશક ।
તત્પૂરિતું તપોનિષ્ઠાં પ્રસન્નાર્થં તવાસદમ્ ॥ ૧૭॥

શરણં તે પ્રપન્નોઽસ્મિ સર્વથાહં મહેશ્વર ।
કામં મે પૂરય સ્વામિન્દેવદુઃખં વિનાશય ॥ ૧૮॥

પુત્રદુઃખૈશ્ચ દેવેશ દુઃખિતોઽહં વિશેષતઃ ।
સુખિનં કુરુ મામીશ સહાયસ્ત્વં દિવૌકસામ્ ॥ ૧૯॥

ભૂત્વા મમ સુતો નાથ દેવા યક્ષાઃ પરાજિતાઃ ।
દૈત્યૈર્મહાબલૈઃ શમ્ભો સુરાનન્દપ્રદો ભવ ॥ ૨૦॥

સદૈવાસ્તુ મહેશાન સર્વલેખસહાયકઃ ।
યથા દૈત્યકૃતા બાધા ન બાધેત સુરાન્પ્રભો ॥ ૨૧॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તસ્ય તુ સર્વેશસ્તથેતિ પ્રોચ્ય શઙ્કરઃ ।
પશ્યતસ્તસ્ય ભગવાંસ્તત્રૈવાન્તર્દધે હરઃ ॥ ૨૨॥

કશ્યપોઽપિ મહાહૃષ્ટઃ સ્વસ્થાનમગમદ્ દ્રુતમ્ ।
દેવેભ્યઃ કથયામાસ સર્વવૃત્તાન્તમાદરાત્ ॥ ૨૩॥

તતઃ સ શઙ્કરઃ શર્વઃ સત્યં કર્તું સ્વકં વચઃ ।
સુરભ્યાં કશ્યપાજ્જજ્ઞે એકાદશસ્વરૂપવાન્ ॥ ૨૪॥

મહોત્સવસ્તદાસીદ્ વૈ સર્વં શિવમયં ત્વભૂત્ ।
આસન્હૃષ્ટાઃ સુરાશ્ચાથ મુનિના કશ્યપેન ચ ॥ ૨૫॥

કપાલી પિઙ્ગલો ભીમો વિરૂપાક્ષો વિલોહિતઃ ।
શાસ્તાજપાદહિર્બુધ્ન્યશ્શમ્ભુશ્ચણ્ડો ભવસ્તથા ॥ ૨૬॥

એકાદશૈતે રુદ્રાસ્તુ સુરભીતનયાઃ સ્મૃતાઃ ।
દેવકાર્યાર્થમુત્પન્નાઃ શિવરૂપાઃ સુખાસ્પદમ્ ॥ ૨૭॥

તે રુદ્રાઃ કાશ્યપા વીરા મહાબલપરાક્રમાઃ ।
દૈત્યાન્ જઘ્નુશ્ચ સઙ્ગ્રામે દેવસાહાય્યકારિણઃ ॥ ૨૮॥

તદ્રુદ્રકૃપયા દેવા દૈત્યાન્ જિત્વા ચ નિર્ભયાઃ ।
ચક્રુઃ સ્વરાજ્યં સર્વે તે શક્રાદ્યાઃ સ્વસ્થમાનસાઃ ॥ ૨૯॥

અદ્યાપિ તે મહારુદ્રાઃ સર્વે શિવસ્વરૂપકાઃ ।
દેવાનાં રક્ષણાર્થાય વિરાજન્તે સદા દિવિ ॥ ૩૦॥

ઐશાન્યાં પુરિ તે વાસં ચક્રિરે ભક્તવત્સલાઃ ।
વિરમન્તે સદા તત્ર નાનાલીલાવિશારદાઃ ॥ ૩૧॥

તેષામનુચરા રુદ્રાઃ કોટિશઃ પરિકીર્તિતાઃ ।
સર્વત્ર સંસ્થિતાસ્તત્ર ત્રિલોકેષ્વભિભાગશઃ ॥ ૩૨॥

ઇતિ તે વર્ણિતાસ્તાતાવતારાઃ શઙ્કરસ્ય વૈ ।
એકાદશમિતા રુદ્રાઃ સર્વલોકસુખાવહાઃ ॥ ૩૩॥

ઇદમાખ્યાનમમલં સર્વપાપપ્રણાશકમ્ ।
ધન્યં યશસ્યમાયુષ્યં સર્વકામપ્રદાયકમ્ ॥ ૩૪॥

ય ઇદં શ‍ૃણુયાત્તાત શ્રાવયેદ્વૈ સમાહિતઃ ।
ઇહ સર્વસુખં ભુક્ત્વા તતો મુક્તિં લભેત સઃ ॥ ૩૫॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં એકાદશાવતારવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૩.૧૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૧૯. એકોનવિંશોઽધ્યાયઃ । દુર્વાસશ્ચરિતવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
અથાન્યચ્ચરિતં શમ્ભોઃ શ‍ૃણુ પ્રીત્યા મહામુને ।
યથા બભૂવ દુર્વાસાઃ શઙ્કરો ધર્મહેતવે ॥ ૧॥

બ્રહ્મપુત્રો બભૂવાતિતપસ્વી બ્રહ્મવિત્પ્રભુઃ ।
અનસૂયાપતિર્ધીમાન્બ્રહ્માજ્ઞાપ્રતિપાલકઃ ॥ ૨॥

સુનિર્દેશાદ્ બ્રહ્મણો હિ સસ્ત્રીકઃ પુત્રકામ્યયા ।
સ ત્ર્યક્ષકુલનામાનં યયૌ ચ તપસે ગિરિમ્ ॥ ૩॥

પ્રાણાનાયમ્ય વિધિવન્નિર્વિન્ધ્યાતટિનીતટે ।
તપશ્ચચાર સુમહદ્ અદ્વન્દ્વોઽબ્દશતં મુનિઃ ॥ ૪॥

ય એક ઈશ્વરઃ કશ્ચિદવિકારી મહાપ્રભુઃ ।
સ મે પુત્રવરં દદ્યાદિતિ નિશ્ચિતમાનસઃ ॥ ૫॥

બહુકાલો વ્યતીયાય તસ્મિંસ્તપતિ સત્તપઃ ।
આવિર્બભૂવ તસ્માત્તુ શુચિર્જ્વાલા મહીયસી ॥ ૬॥

તયાસન્નિખિલા લોકા દગ્ધપ્રાયા મુનીશ્વરાઃ ।
તથા સુરર્ષયઃ સર્વે પીડિતા વાસવાદયઃ ॥ ૭॥

અથ સર્વે વાસવાદ્યા સુરાશ્ચ મુનયો મુને ।
બ્રહ્મસ્થાનં યયુઃ શીઘ્રં તજ્જ્વાલાતિપ્રપીડિતાઃ ॥ ૮॥

નત્વા નુત્વા વિધિં દેવાઃ તત્સ્વદુઃખં ન્યવેદયન્ ।
બ્રહ્મા સહ સુરૈસ્તાત વિષ્ણુલોકં યયાવરમ્ ॥ ૯॥

તત્ર ગત્વા રમાનાથં નત્વા નુત્વા વિધિઃ સુરૈઃ ।
સ્વદુઃખં તત્સમાચખ્યૌ વિષ્ણવેઽનન્તકં મુને ॥ ૧૦॥

વિષ્ણુશ્ચ વિધિના દેવૈ રુદ્રસ્થાનં યયૌ દ્રુતમ્ ।
હરં પ્રણમ્ય તત્રૈત્ય તુષ્ટાવ પરમેશ્વરમ્ ॥ ૧૧॥

સ્તુત્વા બહુતયા વિષ્ણુઃ સ્વદુઃખં ચ ન્યવેદયત્ ।
શર્વં જ્વાલાસમુદ્ભૂતમત્રેશ્ચ તપસઃ પરમ્ ॥ ૧૨॥

અથ તત્ર સમેતાસ્તુ બ્રહ્મવિષ્ણુમહેશ્વરાઃ ।
મુને સમ્મન્ત્રયાઞ્ચક્રુરન્યોઽન્યં જગતાં હિતમ્ ॥ ૧૩॥

તદા બ્રહ્માદયો દેવાસ્ત્રયસ્તે વરદર્ષભાઃ ।
જગ્મુસ્તદાશ્રમં શીઘ્રં વરં દાતું તદર્ષયે ॥ ૧૪॥

સ્વચિહ્નચિહ્નિતાંસ્તાન્સ દૃષ્ટ્વાત્રિર્મુનિસત્તમઃ ।
પ્રણનામ ચ તુષ્ટાવ વાગ્ભિરિષ્ટાભિરાદરાત્ ॥ ૧૫॥

તતઃ સ વિસ્મિતો વિપ્રસ્તાનુવાચ કૃતાઞ્જલિઃ ।
બ્રહ્મપુત્રો વિનીતાત્મા બ્રહ્મવિષ્ણુહરાભિધાન્ ॥ ૧૬॥

અત્રિરુવાચ ।
હે બ્રહ્મન્ હે હરે રુદ્ર પૂજ્યાસ્ત્રિજગતાં મતાઃ ।
પ્રભવશ્ચેશ્વરાઃ સૃષ્ટિરક્ષાસંહારકારકાઃ ॥ ૧૭॥

એક એવ મયા ધ્યાત ઈશ્વરઃ પુત્રહેતવે ।
યઃ કશ્ચિદીશ્વરઃ ખ્યાતો જગતાં સ્વસ્ત્રિયા સહ ॥ ૧૮॥

યૂયં ત્રયસ્સુરાઃ કસ્માદાગતા વરદર્ષભાઃ ।
એતન્મે સંશયં છિત્ત્વા તતો દત્તેપ્સિતં વરમ્ ॥ ૧૯॥

ઇતિ શ્રુત્વા વચસ્તસ્ય પ્રત્યૂચુસ્તે સુરાસ્ત્રયઃ ।
યાદૃક્કૃતસ્તે સઙ્કલ્પસ્તથૈવાભૂન્મુનીશ્વર ॥ ૨૦॥

વયં ત્રયો ભવેશાનાઃ સમાના વરદર્ષભાઃ ।
અસ્મદંશભવાસ્તસ્માદ્ભવિષ્યન્તિ સુતાસ્ત્રયઃ ॥ ૨૧॥

વિદિતા ભુવને સર્વે પિત્રોઃ કીર્તિવિવર્દ્ધનાઃ ।
ઇત્યુક્ત્વા ત્રયો દેવાઃ સ્વધામાનિ યયુર્મુદા ॥ ૨૨॥

વરં લબ્ધ્વા મુનિઃ સોઽથ જગામ સ્વાશ્રમં મુદા ।
યુતોઽનુસૂયયા પ્રીતો બ્રહ્માનન્દપ્રદો મુને ॥ ૨૩॥

અથ બ્રહ્મા હરિઃ શમ્ભુરવતેરુઃ સ્ત્રિયાં તતઃ ।
પુત્રરૂપૈઃ પ્રસન્નાસ્તે નાનાલીલાપ્રકાશકાઃ ॥ ૨૪॥

વિધેરંશાદ્વિધુર્જજ્ઞેઽનસૂયાયાં મુનીશ્વરાત્ ।
આવિર્બભૂવોદધિતઃ ક્ષિપ્તો દેવૈઃ સ એવ હિ ॥ ૨૫॥

વિષ્ણોરંશાત્ સ્ત્રિયાં તસ્યામત્રેર્દત્તો વ્યજાયત ।
સંન્યાસપદ્ધતિર્યેન વર્દ્ધિતા પરમા મુને ॥ ૨૬॥

દુર્વાસા મુનિશાર્દૂલઃ શિવાંશાન્મુનિસત્તમ ।
જજ્ઞે તસ્યાં સ્ત્રિયામત્રેર્વરધર્મપ્રવર્તકઃ ॥ ૨૭॥

ભૂત્વા રુદ્રશ્ચ દુર્વાસા બ્રહ્મતેજોવિવર્દ્ધનઃ ।
ચક્રે ધર્મપરીક્ષાં ચ બહૂનાં સ દયાપરઃ ॥ ૨૮॥

સૂર્યવંશે સમુત્પન્નો યોઽમ્બરીષો નૃપોઽભવત્ ।
તત્પરીક્ષામકાર્ષીત્સ તાં શૃણુ ત્વં મુનીશ્વર ॥ ૨૯॥

સોઽમ્બરીષો નૃપવરઃ સપ્તદ્વીપરસાપતિઃ ।
નિયમં હિ ચકારાસાવેકાદશ્યાં વ્રતે દૃઢમ્ ॥ ૩૦॥

એકાદશ્યા વ્રતં કૃત્વા દ્વાદશ્યાં ચૈવ પારણામ્ ।
કરિષ્યામીતિ સુદૃઢસઙ્કલ્પસ્તુ નરાધિપઃ ॥ ૩૧॥

જ્ઞાત્વા તન્નિયમં તસ્ય દુર્વાસા મુનિસત્તમઃ ।
તદન્તિકં ગતઃ શિષ્યૈર્બહુભિઃ શઙ્કરાંશજઃ ॥ ૩૨॥

પારણે દ્વાદશીં સ્વલ્પાં જ્ઞાત્વા યાવત્સ ભોજનમ્ ।
કર્ત્તું વ્યવસિતસ્તાવદાગતં સ ન્યમન્ત્રયત્ ॥ ૩૩॥

તતઃ સ્નાનાર્થમગમદ્દુર્વાસાઃ શિષ્યસંયુતઃ ।
વિલમ્બં કૃતવાંસ્તત્ર પરીક્ષાર્થં મુનિર્બહુ ॥ ૩૪॥

ધર્મવિઘ્નં તદા જ્ઞાત્વા સ નૃપઃ શાસ્ત્રશાસનાત્ ।
જલં પ્રાશ્યાસ્થિતસ્તત્ર તદાગમનકાઙ્ક્ષયા ॥ ૩૫॥

એતસ્મિન્નન્તરે તત્ર દુર્વાસા મુનિરાગતઃ ।
કૃતાશનં નૃપં જ્ઞાત્વા પરીક્ષાર્થં ધૃતાકૃતિઃ ॥ ૩૬॥

ચુક્રોધાતિ નૃપે તસ્મિન્પરીક્ષાર્થં વૃષસ્ય સઃ ।
પ્રોવાચ વચનં તૂગ્રં સ મુનિઃ શઙ્કરાંશજઃ ॥ ૩૭॥

દુર્વાસા ઉવાચ ।
માં નિમન્ત્ર્ય નૃપાભોજ્ય જલં પીતં ત્વયાધમ ।
દર્શયામિ ફલં તસ્ય દુષ્ટદણ્ડધરો હ્યહમ્ ॥ ૩૮॥

ઇત્યુક્ત્વા ક્રોધતામ્રાક્ષો નૃપં દગ્ધું સમુદ્યતઃ ।
સમુત્તસ્થૌ દ્રુતં ચક્રં તત્સ્થં રક્ષાર્થમૈશ્વરમ્ ॥ ૩૯॥

પ્રજજ્વાલાતિ તં ચક્રં મુનિં દગ્ધું સુદર્શનમ્ ।
શિવરૂપં તમજ્ઞાત્વા શિવમાયાવિમોહિતમ્ ॥ ૪૦॥

એતસ્મિન્નન્તરે વ્યોમવાણ્યુવાચાશરીરિણી ।
અમ્બરીષં મહાત્માનં બ્રહ્મભક્તં ચ વૈષ્ણવમ્ ॥ ૪૧॥

વ્યોમવાણ્યુવાચ ।
સુદર્શનમિદં ચક્રં હરયે શમ્ભુનાર્પિતમ્ ।
શાન્તં કુરુ પ્રજ્વલિતમદ્ય દુર્વાસસે નૃપ ॥ ૪૨॥

દુર્વાસાયં શિવઃ સાક્ષાત્સ ચક્રં હરયેઽર્પિતમ્ ।
એવં સાધારણમુનિં ન જાનીહિ નૃપોત્તમ ॥ ૪૩॥

તવ ધર્મપરીક્ષાર્થમાગતોઽયં મુનીશ્વરઃ ।
શરણં યાહિ તસ્યાશુ ભવિષ્યત્યન્યથા લયઃ ॥ ૪૪॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા ચ નભોવાણી વિરરામ મુનીશ્વર ।
અસ્તાવીત્સ હરાંશં તમમ્બરીષોઽપિ ચાદરાત્ ॥ ૪૫॥

અમ્બરીષ ઉવાચ ।
યદ્યસ્તિ દત્તમિષ્ટં ચ સ્વધર્મો વા સ્વનુષ્ઠિતઃ ।
કુલં નો વિપ્રદૈવં ચેદ્ધરેરસ્ત્રં પ્રશામ્યતુ ॥ ૪૬॥

યદિ નો ભગવાન્પ્રીતો મદ્ભક્તો ભક્તવત્સલઃ ।
સુદર્શનમિદં ચાસ્ત્રં પ્રશામ્યતુ વિશેષતઃ ॥ ૪૭॥

નન્દીશ્વર ઉવાચ ।
ઇતિ સ્તુવતિ રુદ્રાગ્રે શૈવં ચક્રં સુદર્શનમ્ ।
અશામ્યત્સર્વથા જ્ઞાત્વા તં શિવાંશં સુલબ્ધધીઃ ॥ ૪૮॥

અથામ્બરીષઃ સ નૃપઃ પ્રણનામ ચ તં મુનિમ્ ।
શિવાવતારં સંજ્ઞાય સ્વપરીક્ષાર્થમાગતમ્ ॥ ૪૯॥

સુપ્રસન્નો બભૂવાથ સ મુનિઃ શઙ્કરાંશજઃ ।
ભુક્ત્વા તસ્મૈ વરં દત્ત્વા સ્વાભીષ્ટં સ્વાલયં યયૌ ॥ ૫૦॥

અમ્બરીષપરીક્ષાયાં દુર્વાસશ્ચરિતં મુને ।
પ્રોક્તામન્યચ્ચરિત્રં ત્વં શ ृણુ તસ્ય મુનીશ્વર ॥ ૫૧॥

પુનર્દાશરથેશ્ચક્રે પરીક્ષાં નિયમેન વૈ ।
મુનિરૂપેણ કાલેન યઃ કૃતો નિયમો મુને ॥ ૫૨॥

તદૈવ મુનિના તેન સૌમિત્રિઃ પ્રેષિતો હઠાત્ ।
તં તત્યાજ દ્રુતં રામો બન્ધું પણવશાન્મુને ॥ ૫૩॥

સા કથા વિદિતા લોકે મુનિભિર્બહુધોદિતા ।
નાતો મે વિસ્તરાત્પ્રોક્તા જ્ઞાતા યત્સર્વથા બુધૈઃ ॥ ૫૪॥

નિયમં સુદૃઢં દૃષ્ટ્વા સુપ્રસન્નોઽભવન્મુનિઃ ।

દુર્વાસાઃ સપ્રસન્નાત્મા વરં તસ્મૈ પ્રદત્તવાન્ ॥ ૫૫॥

શ્રીકૃષ્ણનિયમસ્યાપિ પરીક્ષાં સ ચકાર હ ।
તાં શ ૃણુ ત્વં મુનિશ્રેષ્ઠ કથયામિ કથાં ચ તામ્ ॥ ૫૬॥

બ્રહ્મપ્રાર્થનયા વિષ્ણુર્વસુદેવસુતોઽભવત્ ।
ધરાભારાવતારાર્થં સાધૂનાં રક્ષણાય ચ ॥ ૫૭॥

હત્વા દુષ્ટાન્મહાપાપાન્ બ્રહ્મદ્રોહકરાન્ખલાન્ ।
રરક્ષ નિખિલાન્સાધૂન્બ્રાહ્મણાન્કૃષ્ણનામભાક્ ॥ ૫૮॥

બ્રહ્મભક્તિં ચકારાતિ સ કૃષ્ણો વસુદેવજઃ ।
નિત્યં હિ ભોજયામાસ સુરસાન્બ્રાહ્મણાન્બહૂન્ ॥ ૫૯॥

બ્રહ્મભક્તો વિશેષેણ કૃષ્ણશ્ચેતિ પ્રથામગાત્ ।
સન્દ્રષ્ટુકામઃ સ મુનિઃ કૃષ્ણાન્તિકમગાન્મુને ॥ ૬૦॥

રુક્મિણીસહિતં કૃષ્ણં સન્નં કૃત્વા રથે સ્વયમ્ ।
સંયોજ્ય સંસ્થિતો વાહં સુપ્રસન્ન ઉવાહ તમ્ ॥ ૬૧॥

મુની રથાત્સમુત્તીર્ય દૃષ્ટ્વા તાં દૃઢતાં પરામ્ ।
તસ્મૈ ભૂત્વા સુપ્રસન્નો વજ્રાઙ્ગત્વવરં દદૌ ॥ ૬૨॥

ધુનદ્યામેકદા સ્નાનં કુર્વન્નગ્નો બભૂવ હ ।
લજ્જિતોઽભૂન્મુનિશ્રેષ્ઠો દુર્વાસાઃ કૌતુકી મુને ॥ ૬૩॥

તજ્જ્ઞાત્વા દ્રૌપદી સ્નાનં કુર્વતી તત્ર ચાદરાત્ ।
તલ્લજ્જાં છાદયામાસ ભિન્નસ્વાઞ્ચલદાનતઃ ॥ ૬૪॥

તદાદાય પ્રવાહેનાગતં સ્વનિકટં મુનિઃ ।
તેનાચ્છાદ્ય સ્વગુહ્યં ચ તસ્યૈ તુષ્ટો બભૂવ સઃ ॥ ૬૫॥

દ્રૌપદ્યૈ ચ વરં પ્રાદાત્તદઞ્ચલવિવર્દ્ધનમ્ ।
પાણ્ડવાન્સુખિનશ્ચક્રે દ્રૌપદી તદ્વરાત્પુનઃ ॥ ૬૬॥

હંસડિમ્ભૌ નૃપૌ કૌચિત્સ્વાવમાનકરૌ ખલૌ ।
દત્ત્વા નિદેશં ચ હરેર્નાશયામાસ સ પ્રભુઃ ॥ ૬૭॥

બ્રહ્મતેજો વિશેષેણ સ્થાપયામાસ ભૂતલે ।
સંન્યાસપદ્ધતિં ચૈવ યથાશાસ્ત્રવિધિક્રમમ્ ॥ ૬૮॥

બહૂનુદ્ધારયામાસ સૂપદેશં વિબોધ્ય ચ ।
જ્ઞાનં દત્ત્વા વિશેષેણ બહૂન્મુક્તાંશ્ચકાર સઃ ॥ ૬૯॥

ઇત્થં ચક્રે સ દુર્વાસા વિચિત્રં ચરિતં બહુ ।
ધન્યં યશસ્યમાયુષ્યં શ‍ૃણ્વતઃ સર્વકામદમ્ ॥ ૭૦॥

ય ઇદં શ‍ૃણુયાદ્ભક્ત્યા દુર્વાસશ્ચરિતં મુદા ।
શ્રાવયેદ્વા પરાન્ યશ્ચ સ સુખીહ પરત્ર ચ ॥ ૭૧॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં દુર્વાસશ્ચરિતવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૩.૧૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૨૦. વિંશોઽધ્યાયઃ । હનુમદવતારચરિત્રવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
અતઃ પરં શ‍ૃણુ પ્રીત્યા હનુમચ્ચરિતં મુને ।
યથા ચકારાશુ હરો લીલાસ્તદ્રૂપતો વરાઃ ॥ ૧॥

ચકાર સુહિતં પ્રીત્યા રામસ્ય પરમેશ્વરઃ ।
તત્સર્વં ચરિતં વિપ્ર શ‍ૃણુ સર્વસુખાવહમ્ ॥ ૨॥

એકસ્મિન્સમયે શમ્ભુરદ્ભુતોતિકરઃ પ્રભુઃ ।
દદર્શ મોહિનીરૂપં વિષ્ણોઃ સ હિ વસેદ્ગુણઃ ॥ ૩॥

ચક્રે સ્વં ક્ષુભિતં શમ્ભુઃ કામબાણહતો યથા ।
સ્વં વીર્યં પાતયામાસ રામકાર્યાર્થમીશ્વરઃ ॥ ૪॥

તદ્વીર્યં સ્થાપયામાસુઃ પત્રે સપ્તર્ષયશ્ચ તે ।
પ્રેરિતા મનસા તેન રામકાર્યાર્થમાદરાત્ ॥ ૫॥

તૈર્ગૌતમસુતાયાં તદ્વીર્યં શમ્ભોર્મહર્ષિભિઃ ।
કર્ણદ્વારા તથાઞ્જન્યાં રામકાર્યાર્થમાહિતમ્ ॥ ૬॥

તતશ્ચ સમયે તસ્માદ્ધનૂમાનિતિ નામભાક્ ।
શમ્ભુર્જજ્ઞે કપિતનુર્મહાબલપરાક્રમઃ ॥ ૭॥

હનૂમાન્સ કપીશાનઃ શિશુરેવ મહાબલઃ ।
રવિબિમ્બં બભક્ષાશુ જ્ઞાત્વા લઘુફલં પ્રગે ॥ ૮॥

દેવપ્રાર્થનયા તં સોઽત્યજજ્જ્ઞાત્વા મહાબલમ્ ।
શિવાવતારં ચ પ્રાપ વરાન્દત્તાન્ સુરર્ષભિઃ ॥ ૯॥

સ્વજનન્યન્તિકં પ્રાગાદથ સોઽતિપ્રહર્ષિતઃ ।
હનૂમાન્સર્વમાચખ્યૌ તસ્યૈ તદ્ વૃત્તમાદરાત્ ॥ ૧૦॥

તદાજ્ઞયા તતો ધીરઃ સર્વવિદ્યામયત્નતઃ ।
સૂર્યાત્પપાઠ સ કપિર્ગત્વા નિત્યં તદન્તિકમ્ ॥ ૧૧॥

સૂર્યાજ્ઞયા તદંશસ્ય સુગ્રીવસ્યાન્તિકં યયૌ ।
માતુરાજ્ઞામનુપ્રાપ્ય રુદ્રાંશઃ કપિસત્તમઃ ॥ ૧૨॥

જ્યેષ્ઠભ્રાત્રા વાલિના હિ સ્વસ્ત્રીભોક્ત્રા તિરસ્કૃતઃ ।
ઋષ્યમૂકગિરૌ તેન ન્યવસત્સ હનૂમતા ॥ ૧૩॥

તતોઽભૂત્સ સુકણ્ઠસ્ય મન્ત્રી કપિવરઃ સુધીઃ ।
સર્વથા સુહિતં ચક્રે સુગ્રીવસ્ય હરાંશજઃ ॥ ૧૪॥

તત્રાગતેન સભ્રાત્રા હૃતભાર્યેણ દુઃખિના ।
કારયામાસ રામેણ તસ્ય સખ્યં સુખાવહમ્ ॥ ૧૫॥

ઘાતયામાસ રામશ્ચ વાલિનં કપિકુઞ્જરમ્ ।
ભ્રાતૃપત્ન્યાશ્ચ ભોક્તારં પાપિનં વીરમાનિનમ્ ॥ ૧૬॥

તતો રામાજ્ઞયા તાત હનૂમાન્વાનરેશ્વરઃ ।
સ સીતાન્વેષણં ચક્રે બહુભિર્વાનરૈઃ સુધીઃ ॥ ૧૭॥

જ્ઞાત્વા લઙ્કાગતાં સીતાં ગતસ્તત્ર કપીશ્વરઃ ।
દ્રુતમુલ્લઙ્ઘ્ય સિન્ધું તમનિસ્તીર્યં પરૈઃ સ વૈ ॥ ૧૮॥

ચક્રેઽદ્ભુતચરિત્રં સ તત્ર વિક્રમસંયુતમ્ ।
અભિજ્ઞાનં દદૌ પ્રીત્યા સીતાયૈ સ્વપ્રભોર્વરમ્ ॥ ૧૯॥

સીતાશોકં જહારાશુ સ વીરઃ કપિનાયકઃ ।
શ્રાવયિત્વા રામવૃત્તં તત્પ્રાણાવનકારકમ્ ॥ ૨૦॥

તદભિજ્ઞાનમાદાય નિવૃત્તો રામસન્નિધિમ્ ।
રાવણારામમાહત્ય જઘાન બહુરાક્ષસાન્ ॥ ૨૧॥

તદૈવ રાવણસુતં હત્વા સબહુરાક્ષસમ્ ।
સ મહોપદ્રવં ચક્રે મહોતિસ્તત્ર નિર્ભયઃ ॥ ૨૨॥

યદા દગ્ધો રાવણેનાવગુણ્ઠ્ય વસનાનિ ચ ।
તૈલાભ્યક્તાનિ સુદૃઢં મહાબલવતા મુને ॥ ૨૩॥

ઉત્પ્લુત્યોત્પ્લુત્ય ચ તદા મહાદેવાંશજઃ કપિઃ ।
દદાહ લઙ્કાં નિખિલાં કૃત્વા વ્યાજં તમેવ હિ ॥ ૨૪॥

દગ્ધ્વા લઙ્કાં વઞ્ચયિત્વા વિભીષણગૃહં તતઃ ।
અપતદ્વારિધૌ વીરસ્તતઃ સ કપિકુઞ્જરઃ ॥ ૨૫॥

સ્વપુચ્છં તત્ર નિર્વાપ્ય પ્રાપ તસ્ય પરન્તટમ્ ।
અખિન્નઃ સ યયૌ રામસન્નિધિં ગિરિશાંશજઃ ॥ ૨૬॥

અવિલમ્બેન સુજવો હનૂમાન્ કપિસત્તમઃ ।
રામોપકણ્ઠમાગત્ય દદૌ સીતાશિરોમણિમ્ ॥ ૨૭॥

તતસ્તદાજ્ઞયા વીરઃ સિન્ધૌ સેતુમબન્ધયત્ ।
વાનરૈઃ સ સમાનીય બહૂન્ ગિરિવરાન્ બલી ॥ ૨૮॥

ગત્વા તત્ર તતો રામસ્તર્તુકામો યથા તતઃ ।
શિવલિઙ્ગં સમાનર્ચ પ્રતિષ્ઠાપ્ય જયેપ્સયા ॥ ૨૯॥

તદ્વરાત્સ જયં પ્રાપ્ય વરં તીર્ત્વોદધિં તતઃ ।
લઙ્કામાવૃત્ય કપિભી રણં ચક્રે સ રાક્ષસૈઃ ॥ ૩૦॥

જઘાનાથાસુરાન્વીરો રામસૈન્યં રરક્ષ સઃ ।
શક્તિક્ષતં લક્ષ્મણં ચ સઞ્જીવિન્યા હ્યજીવયત્ ॥ ૩૧॥

સર્વથા સુખિનં ચક્રે સરામં લક્ષ્મણં હિ સઃ ।
સર્વસૈન્યં રરક્ષાસૌ મહાદેવાત્મજઃ પ્રભુઃ ॥ ૩૨॥

રાવણં પરિવારાઢ્યં નાશયામાસ વિશ્રમઃ ।
સુખીચકાર દેવાન્સ મહાબલગ્રહઃ કપિઃ ॥ ૩૩॥

મહીરાવણસંજ્ઞં સ હત્વા રામં સલક્ષ્મણમ્ ।
તત્સ્થાનાદાનયામાસ સ્વસ્થાનં પરિપાલ્ય ચ ॥ ૩૪॥

રામકાર્યં ચકારાશુ સર્વથા કપિપુઙ્ગવઃ ।

અસુરાન્નમયામાસ નાનાલીલાં ચકાર ચ ॥ ૩૫॥

સ્થાપયામાસ ભૂલોકે રામભક્તિં કપીશ્વરઃ ।
સ્વયં ભક્તવરો ભૂત્વા સીતારામસુખપ્રદઃ ॥ ૩૬॥

લક્ષ્મણપ્રાણદાતા ચ સર્વદેવમદાપહઃ ।
રુદ્રાવતારો ભગવાન્ભક્તોદ્ધારકરઃ સ વૈ ॥ ૩૭॥

હનુમાન્સ મહાવીરો રામકાર્યકરઃ સદા ।
રામદૂતાભિધો લોકે દૈત્યઘ્નો ભક્તવત્સલઃ ॥ ૩૮॥

ઇતિ તે કથિતં તાત હનુમચ્ચરિતં વરમ્ ।
ધન્યં યશસ્યમાયુષ્યં સર્વકામફલપ્રદમ્ ॥ ૩૯॥

ય ઇદં શૃણુયાદ્ભક્ત્યા શ્રાવયેદ્વા સમાહિતઃ ।
સ ભુક્ત્વેહાખિલાન્કામાન્ અન્તે મોક્ષં લભેત્પરમ્ ॥ ૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં હનુમદવતારચરિત્રવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૩.૨૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૨૧. એકવિંશોઽધ્યાયઃ । મહેશાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
અથ પ્રીત્યા શૃણુ મુનેઽવતારં પરમં પ્રભોઃ ।
શઙ્કરસ્યાત્મભૂપુત્ર શૃણ્વતાં સર્વકામદમ્ ॥ ૧॥

એકદા મુનિશાર્દૂલ ગિરિજાશઙ્કરાવુભૌ ।
વિહર્તુકામૌ સઞ્જાતૌ સ્વેચ્છયા પરમેશ્વરૌ ॥ ૨॥

ભૈરવં દ્વારપાલં ચ કૃત્વાભ્યન્તરમાગતૌ ।
નાનાસખિગણૈઃ પ્રીત્યા સેવિતૌ નરશીલિતૌ ॥ ૩॥

ચિરં વિહૃત્ય તત્ર દ્વૌ સ્વતન્ત્રૌ પરમેશ્વરૌ ।
બભૂવતુઃ પ્રસન્નૌ તૌ નાનાલીલાકરૌ મુને ॥ ૪॥

અથોન્મત્તાકૃતિર્દેવી સ્વતન્ત્રા લીલયા શિવા ।

આગતા દ્વારિ તદ્રૂપા પ્રભોરાજ્ઞામવાપ સા ॥ ૫॥

તાં દેવીં ભૈરવઃ સોઽથ નારીદૃષ્ટ્યા વિલોક્ય ચ ।
નિષિષેધ બહિર્ગન્તું તદ્રૂપેણ વિમોહિતઃ ॥ ૬॥

નારીદૃષ્ટ્યા સુદૃષ્ટા સા ભૈરવેણ યદા મુને ।
ક્રુદ્ધાભવચ્છિવા દેવી તં શશાપ તદાઽમ્બિકા ॥ ૭॥

શિવોવાચ ।
નારીદૃષ્ટ્યા પશ્યસિ ત્વં યતો માં પુરુષાધમ ।
અતો ભવ ધરાયાં હિ માનુષસ્ત્વં ચ ભૈરવ ॥ ૮॥

નન્દીશ્વર ઉવાચ ।
ઇત્થં યદાભવચ્છપ્તો ભૈરવઃ શિવયા મુને ।
હાહાકારો મહાનાસીદ્દુઃખમાપ સ લીલયા ॥ ૯॥

તતશ્ચ શઙ્કરઃ શીઘ્રં તમાગત્ય મુનીશ્વર ।
આશ્વાસયદ્ભૈરવં હિ નાનાનુનયકોવિદઃ ॥ ૧૦॥

તચ્છાપાદ્ભૈરવઃ સોઽથ ક્ષિતાવવતરન્મુને ।
મનુષ્યયોન્યાં વૈતાલસંજ્ઞકઃ શઙ્કરેચ્છયા ॥ ૧૧॥

તત્સ્નેહતઃ શિવઃ સોઽપિ ક્ષિતાવવતરદ્વિભુઃ ।
શિવયા સહ સલ્લીલો લૌકિકીં ગતિમાશ્રિતઃ ॥ ૧૨॥

મહેશાહ્વઃ શિવશ્ચાસીચ્છારદા ગિરિજા મુને ।
સુલીલાં ચક્રતુઃ પ્રીત્યા નાનાલીલાવિશારદૌ ॥ ૧૩॥

ઇતિ તે કથિતં તાત મહેશચરિતં વરમ્ ।
ધન્યં યશસ્યમાયુષ્યં સર્વકામફલપ્રદમ્ ॥ ૧૪॥

ય ઇદં શૃણુયાદ્ભક્ત્યા શ્રાવયેદ્વા સમાહિતઃ ।
સ ભુક્ત્વેહાખિલાન્ભોગાનન્તે મોક્ષમવાપ્નુયાત્ ॥ ૧૫॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં મહેશાવતારવર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૩.૨૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૨૨. દ્વાવિંશોઽધ્યાયઃ । વિષ્ણૂપદ્રવવૃષાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
શૃણુ બ્રહ્મસુત પ્રાજ્ઞ વૃષેશાખ્યં મુનીશ્વર ।
શિવાવતારં સલ્લીલં હરિગર્વહરં વરમ્ ॥ ૧॥

પુરા દેવાસુરાઃ સર્વે જરામૃત્યુભયાર્દિતાઃ ।
પરસ્પરં ચ સન્ધાય રત્નાન્યાદિત્સવોઽભવન્ ॥ ૨॥

તતઃ સુરાસુરાઃ સર્વે ક્ષીરોદં સાગરોત્તમમ્ ।
ઉદ્યતા મથિતું તં ચ બભૂવુર્મુનિનન્દન ॥ ૩॥

આસન્ શુચિસ્મિતાઃ સર્વે કેનેદં મન્થનં ભવેત્ ।
સ્વકાર્યસિદ્ધયે તસ્ય બ્રહ્મન્નિતિ સુરાસુરાઃ ॥ ૪॥

તદા નભોગતા વાણી મેઘગમ્ભીરનિઃસ્વના ।
ઉવાચ દેવાન્દૈત્યાંશ્ચશ્વાસયન્તીશ્વરાજ્ઞયા ॥ ૫॥

નભોવાણ્યુવાચ ।
હે દેવા અસુરાશ્ચૈવ મન્થધ્વં ક્ષીરસાગરમ્ ।
ભવતાં બલબુદ્ધિર્હિ ભવિષ્યતિ ન સંશયઃ ॥ ૬॥

મન્દરં ચૈવ મન્થાનં રજ્જું કુરુત વાસુકિમ્ ।
મિથઃ સર્વે મિલિત્વા તુ મન્થનં કુરુતાદરાત્ ॥ ૭॥

નન્દીશ્વર ઉવાચ ।
નભોગતાં તદા વાણીં નિશમ્યાથ સુરાસુરાઃ ।
ઉદ્યોગં ચક્રિરે સર્વે તત્કર્તું મુનિસત્તમ ॥ ૮॥

સુસન્ધાયાખિલાસ્તે વૈ મન્દરં પર્વતોત્તમમ્ ।
કનકાભં ચ સરલં નાનાશોભાર્ચિતં યયુઃ ॥ ૯॥

સુપ્રસાદ્ય ગિરીશં તં તદાજ્ઞમાઃ સુરાસુરાઃ ।
બલાદુત્પાટયામાસુર્નેતુકામાઃ પયોઽર્ણવમ્ ॥ ૧૦॥

ભુજૈરુત્પાટ્ય તે સર્વે જગ્મુઃ ક્ષીરાર્ણવં મુને ।
અશક્તા અભવંસ્તત્ર તમાનેતું હતૌજસઃ ॥ ૧૧॥

તદ્ભુજૈઃ સ પરિભ્રષ્ટઃ પતિતો મન્દરો ગિરિઃ ।

સહસાતિગુરુઃ સદ્યો દેવદૈત્યોપરિ ધ્રુવમ્ ॥ ૧૨॥

એવં ભગ્નોદ્યમા ભગ્નાઃ સમ્બભૂવુઃ સુરાસુરાઃ ।
ચેતનાઃ પ્રાપ્ય ચ તતસ્તુષ્ટુવુર્જગદીશ્વરમ્ ॥ ૧૩॥

તદિચ્છયોદ્યતાઃ સર્વે પુનરુત્થાપ્ય તં ગિરિમ્ ।
નિચિક્ષિપુર્જલે નીત્વા ક્ષીરોદસ્યોત્તરે તટે ॥ ૧૪॥

તતઃ સુરાસુરગણા રજ્જું કૃત્વા ચ વાસુકિમ્ ।
રત્નાન્યાદાતુકામાસ્તે મમન્થુઃ ક્ષીરસાગરમ્ ॥ ૧૫॥

ક્ષીરોદે મથ્યમાને તુ શ્રીઃ સ્વર્લોકમહેશ્વરી ।
સમુદ્ભૂતા સમુદ્રાચ્ચ ભૃગુપુત્રી હરિપ્રિયા ॥ ૧૬॥

ધન્વન્તરિઃ શશાઙ્કશ્ચ પારિજાતો મહાદ્રુમઃ ।
ઉચ્ચૈઃશ્રવાશ્ચ તુરગો ગજ ઐરાવતસ્તથા ॥ ૧૭॥

સુરા હરિધનુઃ શઙ્ખો ગાવઃ કામદુઘાસ્તતઃ ।
કૌસ્તુભાખ્યો મણિશ્ચૈવ તથા પીયૂષમેવ ચ ॥ ૧૮॥

પુનશ્ચ મથ્યમાને તુ કાલકૂટં મહાવિષમ્ ।
યુગાન્તાનલભં જાતં સુરાસુરભયાવહમ્ ॥ ૧૯॥

પીયૂષજન્મકાલે તુ બિન્દવો યે બહિર્ગતાઃ ।
તેભ્યઃ કાન્તાઃ સમુદ્ભૂતા બહ્વયો હ્યદ્ભુતદર્શનાઃ ॥ ૨૦॥

શરત્પૂર્ણેન્દુવદનાસ્તડિત્સૂર્યાનલપ્રભાઃ ।
હારકેયૂરકટકૈર્દિવ્યરત્નૈરલઙ્કૃતાઃ ॥ ૨૧॥

લાવણ્યામૃતતોયેન તાઃ સિઞ્ચન્ત્યો દિશો દશ ।
જગદુન્માદયન્ત્યેવ ભ્રૂભઙ્ગાયતવીક્ષણાઃ ॥ ૨૨॥

કોટિશસ્તાઃ સમુત્પન્નાસ્ત્વમૃતાત્કામનિસ્સૃતાઃ ।
તતોઽમૃતં સમુત્પન્નં જરામૃત્યુનિવારણમ્ ॥ ૨૩॥

લક્ષ્મીં શઙ્ખં કૌસ્તુભં ચ ખડ્ગં જગ્રાહ કેશવઃ ।
જગ્રાહાર્કો હયં દિવ્યમુચ્ચૈઃશ્રવસમાદરાત્ ॥ ૨૪॥

પારિજાતં તરુવરમૈરાવતમિભેશ્વરમ્ ।
શચીપતિશ્ચ જગ્રાહ નિર્જરેશો મહાદરાત્ ॥ ૨૫॥

કાલકૂટં શશાङ्કં ચ દેવત્રાણાય શङ्કરઃ ।
સ્વકણ્ઠે ધૃતવાન્ શમ્ભુઃ સ્વેચ્છયા ભક્તવત્સલઃ ॥ ૨૬॥

દૈત્યાઃ સુરાખ્યાં રમણીમીશ્વરાજવિમોહિતાઃ ।
જગૃહુઃ સકલા વ્યાસ સર્વે ધન્વન્તરિં જનાઃ ॥ ૨૭॥

જગૃહુર્મુનયઃ સર્વે કામધેનું મુનીશ્વરાઃ ।
સામાન્યતસ્ત્રિયસ્તાશ્ચ સ્થિતા આસન્વિમોહિકાઃ ॥ ૨૮॥

અમૃતાર્થં મહાયુદ્ધં સમ્બભૂવ જયૈષિણામ્ ।
સુરાણામસુરાણાં ચ મિથઃ સङ્ક્ષુબ્ધચેતસામ્ ॥ ૨૯॥

હૃતં સોમં ચ દૈતેયૈર્બલાદ્દેવાન્વિજિત્ય ચ ।
બલિપ્રભૃતિભિર્વ્યાસ યુગાન્તાગ્ન્યર્કસુપ્રભૈઃ ॥ ૩૦॥

દેવાઃ શङ્કરમાપન્ના વિહ્વલાઃ શિવમાયયા ।
સર્વે શક્રાદયસ્તાત દૈતેયૈરર્દિતા બલાત્ ॥ ૩૧॥

તતસ્તદમૃતં યત્નાત્સ્ત્રીસ્વરૂપેણ માયયા ।
શિવાજ્ઞયા રમેશેન દૈત્યેભ્યશ્ચ હૃતં મુને ॥ ૩૨॥

અપાયયત્સુરાંસ્તાંશ્ચ મોહિની સ્ત્રીસ્વરૂપધૃક્ ।
મોહયિત્વાસુરાન્સર્વાન્હરિર્માયાવિનાં વરઃ ॥ ૩૩॥

ગત્વા નિકટમેતસ્યા ઊચિરે દૈત્યપુઙ્ગવાઃ ।
પાયયસ્વ સુધામેતાં માભૂદ્ભેદોઽત્ર પઙ્ક્તિષુ ॥ ૩૪॥

એતદુક્ત્વા દદુસ્તસ્મૈ વિષ્ણવે છલરૂપિણે ।
તે દૈત્યા દાનવાઃ સર્વે શિવમાયાવિમોહિતાઃ ॥ ૩૫॥

એતસ્મિન્નન્તરે દૃષ્ટ્વા સ્ત્રિયો દાનવપુઙ્ગવાઃ ।
અનયન્નમૃતોદ્ભૂતા યથાસ્થાનં યથાસુખમ્ ॥ ૩૬॥

તાસાં પુરાણિ દિવ્યાનિ સ્વર્ગાચ્છતગુણાન્યપિ ।
ઘોરૈર્યન્ત્રૈઃ સુગુપ્તાનિ મયમાયાકૃતાનિ ચ ॥ ૩૭॥

સુરક્ષિતાનિ સર્વાણિ કૃત્વા યુદ્ધાય નિર્યયુઃ ।
અસ્પૃષ્ટવક્ષસો દૈત્યાઃ કૃત્વા સમયમેવ હિ ॥ ૩૮॥

ન સ્પૃશામઃ સ્ત્રિયશ્ચેમા યદિ દેવૈર્વિનિર્જિતાઃ ।
ઇત્યુક્ત્વા તે મહાવીરા દૈત્યાઃ સર્વે યુયુત્સવઃ ॥ ૩૯॥

સિંહનાદં તતશ્ચક્રુઃ શઙ્ખાન્દધ્મુઃ પૃથક્પૃથક્ ।
પૂરયન્ત ઇવાકાશં તર્પયન્તો બલાહકાન્ ॥ ૪૦॥

યુદ્ધં બભૂવ દેવાનામસુરૈઃ સહ ભીકરમ્ ।
દેવાસુરાખ્યમતુલં પ્રસિદ્ધં ભુવનત્રયે ॥ ૪૧॥

જયં પ્રાપુઃ સુરાઃ સર્વે વિષ્ણુના પરિરક્ષિતાઃ ।
દૈત્યાઃ પલાયિતાસ્તત્ર હતાઃ સામરવિષ્ણુના ॥ ૪૨॥

દૈત્યાઃ સમ્મોહિતા દેવૈર્વિષ્ણુના ચ મહાત્મના ।
હતાવશિષ્ટાઃ પાતાલં વિવિશુર્વિવરાણિ ચ ॥ ૪૩॥

અનુવવ્રાજ તાન્વિષ્ણુશ્ચક્રપાણિર્મહાબલઃ ।
પાતાલં પરમં ગત્વા સંસ્થિતાન્ભીતભીતવત્ ॥ ૪૪॥

એતસ્મિન્નન્તરે વિષ્ણુર્દદર્શામૃતસમ્ભવાઃ ।
કાન્તાઃ પૂર્ણેન્દુવદના દિવ્યલાવણ્યગર્વિતાઃ ॥ ૪૫॥

સમ્મોહિતઃ કામબાણૈર્લેભે તત્રૈવ નિર્વૃતિમ્ ।
તાભિશ્ચ વરનારીભિઃ ક્રીડમાનો બભૂવ હ ॥ ૪૬॥

તાભ્યઃ પુત્રાનજનયદ્વિષ્ણુર્વરપરાક્રમાન્ ।
મહીં સર્વાં કમ્પયન્તો નાનાયુદ્ધવિશારદાન્ ॥ ૪૭॥

તતો વૈ હરિપુત્રાસ્તે મહાબલપરાક્રમાઃ ।
મહોપદ્રવમાચેરુઃ સ્વર્ગે ભુવિ ચ દુઃખદમ્ ॥ ૪૮॥

લોકોપદ્રવમાલક્ષ્ય નિર્જરા મુનયોઽથ વૈ ।
ચક્રુર્નિવેદનનં તેષાં બ્રહ્મણે પ્રણિપત્ય ચ ॥ ૪૯॥

તચ્છ્રુત્વાદાય તાન્બ્રહ્મા યયૌ કૈલાસપર્વતમ્ ।
તત્ર દૃષ્ટ્વા શિવં દેવં પ્રણનામ પુનઃ પુનઃ ॥ ૫૦॥

તુષ્ટાવ વિવિધૈઃ સ્તોત્રૈર્નતસ્કન્ધઃ કૃતાઞ્જલિઃ ।
જય દેવ મહાદેવ સર્વસ્વામિન્નિતિ બ્રુવન્ ॥ ૫૧॥

બ્રહ્મોવાચ ।
દેવદેવ મહાદેવ લોકાન્ રક્ષાખિલાન્પ્રભો ।
ઉપદ્રુતાન્વિષ્ણુપુત્રૈઃ પાતાલસ્થૈર્વિકારિભિઃ ॥ ૫૨॥

નારીષ્વમૃતભૂતાસુ સંસક્તાત્મા હરિર્વિભો ।
પાતાલે તિષ્ઠતીદાનીં રમતે હિ વિકારવાન્ ॥ ૫૩॥

નન્દીશ્વર ઉવાચ ।
ઇત્થં બહુસ્તુતઃ શમ્ભુર્બ્રહ્મણા સર્ષિનિર્જરૈઃ ।
લોકસંરક્ષણાર્થાય વિષ્ણોરાનયનાય ચ ॥ ૫૪॥

તતઃ સ ભગવાન્ શમ્ભુઃ કૃપાસિન્ધુર્મહેશ્વરઃ ।
તદુપદ્રવમાજ્ઞાય વૃષરૂપો બભૂવ હ ॥ ૫૫॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં વિષ્ણૂપદ્રવવૃષાવતારવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૩.૨૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૨૩. ત્રયોવિંશોઽધ્યાયઃ । વૃષેશ્વરસંજ્ઞકશિવાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
તતો વૃષભરૂપેણ ગર્જમાનઃ પિનાકધૃક્ ।
પ્રવિષ્ટો વિવરં તત્ર નિનદન્ભૈરવાન્ રવાન્ ॥ ૧॥

નિપેતુસ્તસ્ય નિનદૈઃ પુરાણિ નગરાણિ ચ ।
પ્રકમ્પો હિ બભૂવાથ સર્વેષાં પુરવાસિનામ્ ॥ ૨॥

તતો વૃષો હરેઃ પુત્રાન્સઙ્ગ્રામોદ્યતકાર્મુકાન્ ।
શિવમાયાવિમૂઢાત્મમહાબલપરાક્રમાન્ ॥ ૩॥

હરિપુત્રાસ્તતસ્તેઽથ પ્રાકુપ્યન્મુનિસત્તમ ।
પ્રદુદ્રુવુઃ પ્રગર્જ્યોચ્ચૈર્વીરાઃ શઙ્કરસમ્મુખમ્ ॥ ૪॥

આયાતાંસ્તાન્હરેઃ પુત્રાન્ રુદ્રો વૃષભરૂપધૃક્ ।
પ્રાકુપ્યદ્વિષ્ણુપુત્રાંશ્ચ ખુરૈઃ શૃઙ્ગૈર્વ્યદારયત્ ॥ ૫॥

વિદારિતાઙ્ગા રુદ્રેણ સર્વે હરિસુતાશ્ચ તે ।
નષ્ટા દ્રુતં સન્બભૂવુર્ગતપ્રાણા વિચેતસઃ ॥ ૬॥

હતેષુ તેષુ પુત્રેષુ વિષ્ણુર્બલવતાં વરઃ ।

નિષ્ક્રમ્યાથ પ્રગર્જ્યોચ્ચૈર્યયૌ શીઘ્રં હરાન્તિકમ્ ॥ ૭॥

દૃષ્ટ્વા રુદ્રં પ્રવ્રજન્તં હતવિષ્ણુસુતં વૃષમ્ ।
શરૈઃ સન્તાડયામાસ દિવ્યૈરસ્ત્રૈશ્ચ કેશવઃ ॥ ૮॥

તતઃ ક્રુદ્ધો મહાદેવો વૃષરૂપી મદાબલઃ ।
અસ્ત્રાણિ તાનિ વિષ્ણોશ્ચ જગ્રાસ ગિરિગોચરઃ ॥ ૯॥

અથ કૃત્વા મહાકોપં વૃષાત્મા સ મહેશ્વરઃ ।
વિનનાદ મહાઘોરં કમ્પયંસ્ત્રિજગન્મુને ॥ ૧૦॥

તત ઉત્પ્લુત્ય તરસા ખુરૈઃ શૃઙ્ગૈર્વ્યદારયત્ ।
વિષ્ણું ક્રોધાકુલં મૂઢમજાનન્તં નિજં હરિમ્ ॥ ૧૧॥

તતઃ સ શિથિલાત્મા હિ વ્યથિતાઙ્ગો બભૂવ હ ।
તત્પ્રહારમસહ્યાશુ હરિર્માયાવિમોહિતઃ ॥ ૧૨॥

ગતગર્વો હરિશ્ચૈવ વિચેતા ગતચેતનઃ ।
જ્ઞાતવાન્ પરમેશાનં વિહરન્તં વૃષાત્મના ॥ ૧૩॥

અથ વિજ્ઞાય ગૌરીશમાગતં વૃષરૂપતઃ ।
પ્રાહ ગમ્ભીરયા વાચા નતસ્કન્ધઃ કૃતાઞ્જલિઃ ॥ ૧૪॥

હરિરુવાચ ।
દેવદેવ મહાદેવ કરુણાસાગર પ્રભો ।
માયયા તે મહેશાન મોહિતોઽહં વિમૂઢધીઃ ॥ ૧૫॥

કૃતં યુદ્ધં ત્વયેશેન સ્વનાથેન મયા પ્રભો ।
કૃપાં કૃત્વા મયિ સ્વામિન્સોઽપરાધો હિ સહ્યતામ્ ॥ ૧૬॥

નન્દીશ્વર ઉવાચ ।
તસ્ય તદ્વચનં શ્રુત્વા હરેર્દીનતયા મુને ।
ભગવાન્ શઙ્કરઃ પ્રાહ રમેશં ભક્તવત્સલઃ ॥ ૧૭॥

હે વિષ્ણો હે મહાબુદ્ધે કથં માં જ્ઞાતવાન્ન હિ ।
યુદ્ધં કૃતં કૃતસ્તેઽદ્ય જ્ઞાનં સર્વં ચ વિસ્મૃતમ્ ॥ ૧૮॥

આત્માનં કિન્ન જાનાસિ મદધીનપરાક્રમમ્ ।
ત્વયા નાત્ર રતિઃ કાર્યા નિવર્તસ્વ કુચારતઃ ॥ ૧૯॥

કામાધીનં કથં જ્ઞાનં સ્ત્રીષુ સક્તો વિહારકૃત્ ।

નોચિતં તવ દેવેશ સ્મરણં વિશ્વતારણમ્ ॥ ૨૦॥

તચ્છુત્વા શમ્ભુવચનં વિજ્ઞાનપ્રદમાદરાત્ ।
વ્રીડ્યન્સ્વમનસા વિષ્ણુઃ પ્રાહ વાચં મહેશ્વરમ્ ॥ ૨૧॥

વિષ્ણુરુવાચ ।
મમાત્ર વિદ્યતે ચક્રં તદ્ ગૃહીત્વેતદાદરાત્ ।
ગમિષ્યામિ સ્વલોકં તં ત્વદાજ્ઞાપરિપાલકઃ ॥ ૨૨॥

નન્દીશ્વર ઉવાચ ।
તદાકર્ણ્ય મહેશાનો વચનં વૈષ્ણવં હરઃ ।
પ્રત્યુવાચ વૃષાત્મા હિ વૃષરક્ષઃ પુનર્હરિમ્ ॥ ૨૩॥

ન વિલમ્બઃ પ્રકર્ત્તવ્યો ગન્તવ્યમિત આશુ તે ।
મચ્છાસનાદ્દૂરે લોકે ચક્રમત્રૈવ તિષ્ઠતામ્ ॥ ૨૪॥

સન્તાનાદિત્યસંસ્થાનાચ્છિવત્વવચનાદપિ ।
અહં ઘોરતરં તસ્માચ્ચક્રમન્યદ્દદામિ તે ॥ ૨૫॥

એતદુક્ત્વા હરોઽલેખીદ્દિવ્યં કાલાનલપ્રભમ્ ।
પરં ચક્રં પ્રદીપ્તં હિ સર્વદુષ્ટવિનાશનમ્ ॥ ૨૬॥

વિષ્ણવે પ્રદદૌ ચક્રં ઘોરાર્કાયુતસુપ્રભમ્ ।
સર્વામરમુનીન્દ્રાણાં રક્ષકાય મહાત્મને ॥ ૨૭॥

લબ્ધ્વા સુદર્શનં ચાન્યચ્ચક્રં પરમદીપ્તિમત્ ।
ઉવાચ વિબુધાંસ્તત્ર વિષ્ણુર્બુદ્ધિમતાં વરઃ ॥ ૨૮॥

સર્વદેવવરા યૂયં મદ્વાક્યં શ‍ૃણુતાદરાત્ ।
કર્તવ્યં તત્તથા શીઘ્રં તતઃ શં વો ભવિષ્યતિ ॥ ૨૯॥

દિવ્યા વરાઙ્ગનાસ્સન્તિ પાતાલે યૌવનાન્વિતાઃ ।
તાભિઃ સાર્દ્ધં મહાક્રીડાં યઃ કરોતુ કરોતુ સઃ ॥ ૩૦॥

તચ્છુત્વા કેશવાદ્વાક્યં શૂરાસ્ત્રિદશયોનયઃ ।
પ્રવેષ્ટુકામાઃ પાતાલં બભૂવુર્વિષ્ણુના સહ ॥ ૩૧॥

વિચારમથ વિજ્ઞાય તં તદા ભગવાન્હરઃ ।
ક્રોધાચ્છાપં દદૌ ઘોરં દેવયોન્યષ્ટકસ્ય ચ ॥ ૩૨॥

હર ઉવાચ ।

વર્જયિત્વા મુનિં શાન્તં દાનવાન્વા મદંશજમ્ ।
ઇદં યઃ પ્રવિશેત્સ્થાનં તસ્ય સ્યાન્નિધનં ક્ષણાત્ ॥ ૩૩॥

શ્રુત્વા વાક્યમિદં ઘોરં મનુષ્યહિતવર્ધનમ્ ।
પ્રત્યાખ્યાતાસ્તુ રુદ્રેણ દેવાઃ સ્વગૃહમાયયુઃ ॥ ૩૪॥

એવં સ્ત્રીલઃ પરો વિષ્ણુઃ શિવેન પ્રતિશાસિતઃ ।
સ્વર્લોકમગમદ્ વ્યાસ સ્વાસ્થ્યં પ્રાપ જગચ્ચ તત્ ॥ ૩૫॥

વૃષેશ્વરોઽપિ ભગવાન્ શઙ્કરો ભક્તવત્સલઃ ।
ઇત્થં કૃત્વા દેવકાર્યં જગામ સ્વગિરીશ્વરમ્ ॥ ૩૬॥

વૃષેશ્વરાવતારસ્તુ વર્ણિતઃ શઙ્કરસ્ય ચ ।
વિષ્ણુમોહહરઃ શર્વઃ ત્રૈલોક્યસુખકારકઃ ॥ ૩૭॥

પવિત્રમિદમાખ્યાનં શત્રુબાધાહરં પરમ્ ।
સ્વર્ગ્યં યશસ્યમાયુષ્યં ભુક્તિમુક્તિપ્રદં સતામ્ ॥ ૩૮॥

ય ઇદં શ ૃણુયાદ્ભક્ત્યા શ્રાવયેદ્વૈ સમાહિતઃ ।
તથા પઠિતિ યો હીદં પાઠયેત્ સુધિયો નરાન્ ।
સ ભુક્ત્વા સકલાન્ કામાન્ અન્તે મોક્ષમવાપ્નુયાત્ ॥ ૩૯॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસહિતાયાં વૃષેશ્વરસંજ્ઞકશિવાવતારવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૩.૨૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૨૪. ચતુર્વિંશોઽધ્યાયઃ । પિપ્પલાદાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
પિપ્પલાદાખ્યમપરમવતારં મહેશિતુઃ ।
શ ૃણુ પ્રાજ્ઞ મહાપ્રીત્યા ભક્તિવર્ધનમુત્તમમ્ ॥ ૧॥

યઃ પુરા ગદિતો વિપ્રો દધીચિર્મુનિસત્તમઃ ।
મહાશૈવઃ સુપ્રતાપી ચ્યાવનિર્ભૃગુવંશજઃ ॥ ૨॥

ક્ષુવેણ સહ સઙ્ગ્રામે યેન વિષ્ણુઃ પરાજિતઃ ।
સનિર્જરોઽથ સંશપ્તો મહેશ્વરસહાયિના ॥ ૩॥

તસ્ય પત્ની મહાભાગા સુવર્ચા નામ નામતઃ ।
મહાપતિવ્રતા સાધ્વી યયા શપ્તા દિવૌકસઃ ॥ ૪॥

તસ્માત્તસ્યાં મહાદેવો નાનાલીલાવિશારદઃ ।
પ્રાદુર્બભૂવ તેજસ્વી પિપ્પલાદેતિ નામતઃ ॥ ૫॥

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય મુનિશ્રેષ્ઠો નન્દીશ્વરવચોઽદ્ભુતમ્ ।
સનત્કુમારઃ પ્રોવાચ નતસ્કન્ધઃ કૃતાઞ્જલિઃ ॥ ૬॥

સનત્કુમાર ઉવાચ ।
નન્દીશ્વર મહાપ્રાજ્ઞ સાક્ષાદ્ રુદ્રસ્વરૂપધૃક્ ।
ધન્યસ્ત્વં સદ્ગુરુસ્તાત શ્રાવિતેયં કથાદ્ભુતા ॥ ૭॥

ક્ષુવેણ સહ સઙ્ગ્રામે શ્રુતો વિષ્ણુપરાજયઃ ।
બ્રહ્મણા મે પુરા તાત તચ્છાપશ્ચ શિલાદજ ॥ ૮॥

અધુના શ્રોતુમિચ્છામિ દેવશાપં સુવર્ચયા ।
દત્તં પશ્ચાત્ પિપ્પલાદચરિતં મઙ્ગલાયનમ્ ॥ ૯॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વાથ શૈલાદિર્વિધિપુત્રવચઃ શુભમ્ ।
પ્રત્યુવાચ પ્રસન્નાત્મા સ્મૃત્વા શિવપદામ્બુજમ્ ॥ ૧૦॥

નન્દીશ્વર ઉવાચ ।
એકદા નિર્જરાઃ સર્વે વાસવાદ્યા મુનીશ્વર ।
વૃત્રાસુરસહાયૈશ્ચ દૈત્યૈરાસન્પરાજિતાઃ ॥ ૧૧॥

સ્વાનિ સ્વાનિ વરાસ્ત્રાણિ દધીચસ્યાશ્રમેઽખિલાઃ ।
નિઃક્ષિપ્ય સહસા સદ્યોઽભવન્ દેવાઃ પરાજિતાઃ ॥ ૧૨॥

તદા સર્વે સુરાઃ સેન્દ્રા વધ્યમાનાસ્તથર્ષયઃ ।
બ્રહ્મલોકં ગતાઃ શીઘ્રં પ્રોચુઃ સ્વં વ્યસનં ચ તત્ ॥ ૧૩॥

તચ્છ્રુત્વા દેવવચનં બ્રહ્મા લોકપિતામહઃ ।
સર્વં શશંસ તત્ત્વેન ત્વષ્ટુશ્ચૈવ ચિકીર્ષિતમ્ ॥ ૧૪॥

ભવદ્વધાર્થં જનિતસ્ત્વષ્ટ્રાયં તપસા સુરાઃ ।
વૃત્રો નામ મહાતેજાઃ સર્વદૈત્યાધિપો મહાન્ ॥ ૧૫॥

અથ પ્રયત્નઃ ક્રિયતાં ભવેદસ્ય વધો યથા ।
તત્રોપાયં શ઼ૃણુ પ્રાજ્ઞ ધર્મહેતોર્વદામિ તે ॥ ૧૬॥

મહામુનિર્દધીચિર્યઃ સ તપસ્વી જિતેન્દ્રિયઃ ।
લેભે શિવં સમારાધ્ય વજ્રાસ્થિત્વવરં પુરા ॥ ૧૭॥

તસ્યાસ્થીન્યેવ યાચધ્વં સ દાસ્યતિ ન સંશયઃ ।
નિર્માય તૈર્દણ્ડવજ્રં વૃત્રં જહિ ન સંશયઃ ॥ ૧૮॥

નન્દીશ્વર ઉવાચ ।
તચ્છ્રુત્વા બ્રહ્મવચનં શક્રો ગુરુસમન્વિતઃ ।
આગચ્છત્સામરઃ સદ્યો દધીચ્યાશ્રમમુત્તમમ્ ॥ ૧૯॥

દૃષ્ટ્વા તત્ર મુનિં શક્રઃ સુવર્ચાન્વિતમાદરાત્ ।
નનામ સાઞ્જલિર્નમ્રઃ સગુરુઃ સામરશ્ચ તમ્ ॥ ૨૦॥

તદભિપ્રાયમાજ્ઞાય સ મુનિર્બુધસત્તમઃ ।
સ્વપત્નીં પ્રેષયામાસ સુવર્ચાં સ્વાશ્રમાન્તરમ્ ॥ ૨૧॥

તતસ્સ દેવરાજશ્ચ સામરઃ સ્વાર્થસાધકઃ ।
અર્થશાસ્ત્રપરો ભૂત્વા મુનીશં વાક્યમબ્રવીત્ ॥ ૨૨॥

શક્ર ઉવાચ ।
ત્વષ્ટ્રા વિપ્રકૃતાઃ સર્વે વયં દેવાસ્તથર્ષયઃ ।
શરણ્યં ત્વાં મહાશૈવં દાતારં શરણં ગતાઃ ॥ ૨૩॥

સ્વાસ્થીનિ દેહિ નો વિપ્ર મહાવજ્રમયાનિ હિ ।
અસ્થ્ના તે સ્વપવિં કૃત્વા હનિષ્યામિ સુરદ્રુહમ્ ॥ ૨૪॥

ઇત્યુક્તસ્તેન સ મુનિઃ પરોપકરણે રતઃ ।
ધ્યાત્વા શિવં સ્વનાથં હિ વિસસર્જ કલેવરમ્ ॥ ૨૫॥

બ્રહ્મલોકં ગતઃ સદ્યઃ સ મુનિર્ધ્વસ્તબન્ધનઃ ।
પુષ્પવૃષ્ટિરભૂત્તત્ર સર્વે વિસ્મયમાગતાઃ ॥ ૨૬॥

અથ ગાં સુરભિં શક્ર આહૂયાશુ હ્યલેહયત્ ।
અસ્ત્રનિર્મિતયે ત્વાષ્ટ્રં નિર્દિદેશ તદસ્થિભિઃ ॥ ૨૭॥

વિશ્વકર્મા તદાજ્ઞપ્તશ્ચક્લૃપેઽસ્ત્રાણિ કૃત્સ્નશઃ ।
તદસ્થિભિર્વજ્રમયૈઃ સુદૃઢૈઃ શિવવર્ચસા ॥ ૨૮॥

તસ્ય વંશોદ્ભવૈર્વજ્રં શરો બ્રહ્મશિરસ્તથા ।
અન્યાસ્થિભિર્બહૂનિ સ્વપરાણ્યસ્ત્રાણિ નિર્મમે ॥ ૨૯॥

તમિન્દ્રો વજ્રમુદ્યમ્ય વર્દ્ધિતઃ શિવવર્ચસા ।
વૃત્રમભ્યદ્રવત્ક્રુદ્ધો મુને રુદ્ર ઇવાન્તકમ્ ॥ ૩૦॥

તતઃ શક્રઃ સુસન્નદ્ધસ્તેન વજ્રેણ સ દ્રુતમ્ ।
ઉચ્ચકર્ત શિરો વાર્ત્રં ગિરિશૃઙ્ગમિવૌજસા ॥ ૩૧॥

તદા સમુત્સવસ્તાત બભૂવ ત્રિદિવૌકસામ્ ।
તુષ્ટુવુર્નિર્જરાઃ શક્રં પેતુઃ કુસુમવૃષ્ટયઃ ॥ ૩૨॥

ઇતિ તે કથિતં તાત પ્રસઙ્ગાચ્ચરિતં ત્વિદમ્ ।
પિપ્પલાદાવતારં મે શૃણુ શમ્ભોર્મહાદરાત્ ॥ ૩૩॥

સુવર્ચા સા મુનેઃ પત્ની દધીચસ્ય મહાત્મનઃ ।
યયૌ સ્વમાશ્રમાભ્યન્તસ્તદાજ્ઞપ્તા પતિવ્રતા ॥ ૩૪॥

આગત્ય તત્ર સા દૃષ્ટ્વા ન પતિં સ્વં તપસ્વિની ।
ગૃહકાર્યં ચ સા કૃત્વાખિલં પતિનિદેશતઃ ॥ ૩૫॥

આજગામ પુનસ્તત્ર પશ્યન્તી બહ્વશોભનમ્ ।
દેવાંશ્ચ તાન્મુનિશ્રેષ્ઠ સુવર્ચા વિસ્મિતાભવત્ ॥ ૩૬॥

જ્ઞાત્વા ચ તત્સર્વમિદં સુરાણાં
કૃત્યં તદાનીં ચ ચુકોપ સાધ્વી ।
દદૌ તદા શાપમતીવ રુષ્ટા
તેષાં સુવર્ચા ઋષિવર્યભાર્યા ॥ ૩૭॥

સુવર્ચોવાચ ।
અહો સુરા દુષ્ટતરાશ્ચ સર્વે
સ્વકાર્યદક્ષા હ્યબુધાશ્ચ લુબ્ધાઃ ।
તસ્માચ્ચ સર્વે પશવો ભવન્તુ
સેન્દ્રાશ્ચ મેઽદ્યપ્રભૃતીત્યુવાચ ॥ ૩૮॥

એવં શાપં દદૌ તેષાં સુરાણાં સા તપસ્વિની ।

સશક્રાણાં ચ સર્વેષાં સુવર્ચા મુનિકામિની ॥ ૩૯॥

અનુગન્તું પતેર્લોકમથેચ્છત્સા પતિવ્રતા ।
ચિતાં ચક્રે સમેધોભિઃ સુપવિત્રૈર્મનસ્વિની ॥ ૪૦॥

તતો નભોગિરા પ્રાહ સુવર્ચાં તાં મુનિપ્રિયામ્ ।
આશ્વાસયન્તી ગિરિશપ્રેરિતા સુખદાયિની ॥ ૪૧॥

આકાશવાણ્યુવાચ ।
સાહસં ન કુરુ પ્રાજ્ઞે શ‍ૃણુ મે પરમં વચઃ ।
મુનિતેજસ્ત્વદુદરે તદુત્પાદય યત્નતઃ ॥ ૪૨॥

તતઃ સ્વાભીષ્ટચરણં દેવિ કર્તું ત્વમર્હસિ ।
સગર્ભા ન દહેદ્ ગાત્રમિતિ બ્રહ્મનિદેશનમ્ ॥ ૪૩॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા સા નભોવાણી વિરરામ મુનીશ્વર ।
તાં શ્રુત્વા સા મુનેઃ પત્ની વિસ્મિતાભૂત્ક્ષણં ચ સા ॥ ૪૪॥

સુવર્ચા સા મહાસાધ્વી પતિલોકમભીપ્સતી ।
ઉપવિશ્યાશ્મના ભૂયઃ સોદરં વિદદાર હ ॥ ૪૫॥

નિર્ગતો જઠરાત્તસ્યા ગર્ભો મુનિવરસ્ય સઃ ।
મહાદિવ્યતનુર્દીપ્તો ભાસયંશ્ચ દિશો દશ ॥ ૪૬॥

સાક્ષાદ્ રુદ્રાવતારોઽસૌ દધીચિવરતેજસઃ ।
પ્રાદુર્ભૂતઃ સ્વયં તાત સ્વલીલાકરણે ક્ષમઃ ॥ ૪૭॥

તં દૃષ્ટ્વા સ્વસુતં દિવ્યં સ્વરૂપં મુનિકામિની ।
સુવર્ચાજ્ઞાય મનસા સાક્ષાદ્ રુદ્રાવતારકમ્ ॥ ૪૮॥

પ્રહૃષ્ટાભૂન્મહાસાધ્વી પ્રણમ્યાશુ નુનાવ સા ।
સ્વહૃદિ સ્થાપયામાસ તત્સ્વરૂપં મુનીશ્વર ॥ ૪૯॥

સુવર્ચા તનયં તં ચ પ્રહસ્ય વિમલેક્ષણા ।
જનની પ્રાહ સુપ્રીત્યા પતિલોકમભીપ્સતી ॥ ૫૦॥

સુવર્ચોવાચ ।
હે તાત પરમેશાન ચિરં તિષ્ઠાસ્ય સન્નિધૌ ।
અશ્વત્થસ્ય મહાભાગ સર્વેષાં સુખદો ભવેઃ ॥ ૫૧॥

મામાજ્ઞાપય સુપ્રીત્યા પતિલોકાય ચાધુના ।
તત્રસ્થાહં ચ પતિના ત્વાં ધ્યાયે રુદ્રરૂપિણમ્ ॥ ૫૨॥

નન્દીશ્વર ઉવાચ ।
ઇત્યેવં સા બભાષેઽથ સુવર્ચા તનયં પ્રતિ ।
પતિમન્વગમત્સાધ્વી પરમેણ સમાધિના ॥ ૫૩॥

એવં દધીચપત્ની સા પતિના સઙ્ગતા મુને ।
શિવલોકં સમાસાદ્ય સિષેવે શઙ્કરં મુદા ॥ ૫૪॥

એતસ્મિન્નન્તરે દેવાઃ સેન્દ્રાશ્ચ મુનિભિઃ સહ ।
તત્રાજગ્મુસ્ત્વરા તાત આહૂતા ઇવ હર્ષિતાઃ ॥ ૫૫॥

હરિર્બ્રહ્મા ચ સુપ્રીત્યાવતીર્ણં શઙ્કરં ભુવિ ।
સુવર્ચાયાં દધીચાદ્વા યયતુઃ સ્વગણૈઃ સહ ॥ ૫૬॥

તત્ર દૃષ્ટ્વાવતીર્ણં તં મુનિપુત્રત્વમાગતમ્ ।
રુદ્રં સર્વે પ્રણેમુશ્ચ તુષ્ટુવુર્બદ્ધપાણયઃ ॥ ૫૭॥

તદોત્સવો મહાનાસીદ્દેવાનાં મુનિસત્તમ ।
નેદુર્દુન્દુભયસ્તત્ર નર્તક્યો નનૃતુર્મુદા ॥ ૫૮॥

જગુર્ગન્ધર્વપુત્રાશ્ચ કિન્નરા વાદ્યવાદકાઃ ।
વાદયામાસુરમરાઃ પુષ્પવૃષ્ટિં ચ ચક્રિરે ॥ ૫૯॥

દધીચેઃ પિપ્પલપિતુર્વિલસન્તં સુતં ચ તમ્ ।
સંસ્કૃત્ય વિધિવત્સર્વે વિષ્ણ્વાદ્યાસ્તુષ્ટુવુઃ પુનઃ ॥ ૬૦॥

પિપ્પલાદેતિ તન્નામ ચક્રે બ્રહ્મા પ્રસન્નધીઃ ।
પ્રસન્નો ભવ દેવેશ ઇત્યૂચે હરિણા સુરૈઃ ॥ ૬૧॥

ઇત્યુક્ત્વા તમનુજ્ઞાય બ્રહ્મા વિષ્ણુઃ સુરાસ્તથા ।
સ્વં સ્વં ધામ યયુઃ સર્વે વિધાય ચ મહોત્સવમ્ ॥ ૬૨॥

અથ રુદ્રઃ પિપ્પલાદોઽશ્વત્થમૂલે મહાપ્રભુઃ ।
તતાપ સુચિરં કાલં લોકાનાં હિતકામ્યયા ॥ ૬૩॥

ઇત્થં સુતપતસ્તસ્ય પિપ્પલાદસ્ય સમ્મુખે ।
મહાકાલો વ્યતીયાય લોકચર્યાનુસારિણઃ ॥ ૬૪॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં પિપ્પલાદાવતારવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૩.૨૪॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૨૫. પઞ્ચવિંશોઽધ્યાયઃ । પિપ્પલાદાવતારચરિતવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
અથ લોકે વ્યવસ્થાય ધર્મસ્ય સ્થાપનેચ્છયા ।
મહાલીલાં ચકારેશસ્તામહો સન્મુને શ‍ૃણુ ॥ ૧॥

એકદા પુષ્પભદ્રાયાં સ્નાતું ગચ્છન્મુનીશ્વરઃ ।
દદર્શ પદ્માં યુવતીં શિવાંશાં સુમનોહરામ્ ॥ ૨॥

તલ્લિપ્સુસ્તત્પિતુઃ સ્થાનમનરણ્યસ્ય ભૂપતેઃ ।
જગામ ભુવનાચારી લોકતત્ત્વવિચક્ષણઃ ॥ ૩॥

રાજા નરાણાં તં દૃષ્ટ્વા પ્રણમ્ય ચ ભયાકુલઃ ।
મધુપર્કાદિકં દત્ત્વા પૂજયામાસ ભક્તિતઃ ॥ ૪॥

સ્નેહાત્સર્વં ગૃહીત્વા સ યયાચે કન્યકાં મુનિઃ ।
મૌની બભૂવ નૃપતિઃ કિઞ્ચિન્નિર્વક્તુમક્ષમઃ ॥ ૫॥

મુનિઃ પ્રોવાચ નૃપતિં કન્યાં મે દેહિ ભક્તિતઃ ।
અન્યથા ભસ્મસાત્સર્વં કરિષ્યેઽહં ત્વયા સહ ॥ ૬॥

અથો બભૂવુરાચ્છન્નાઃ સર્વે રાજજનાસ્તદા ।
તેજસા પિપ્પલાદસ્ય દાધીચસ્ય મહામુને ॥ ૭॥

અથ રાજા મહાભીતો વિલપ્ય ચ મુહુર્મુહુઃ ।
કન્યામલઙ્કૃતાં પદ્માં વૃદ્ધાય મુનયે દદૌ ॥ ૮॥

પદ્માં વિવાહ્ય સ મુનિઃ શિવાંશામ્ભૂપતેઃ સુતામ્ ।
પિપ્પલાદો ગૃહીત્વા તાં મુદિતઃ સ્વાશ્રમં યયૌ ॥ ૯॥

તત્ર ગત્વા મુનિવરો વયસા જર્જરોઽધિકઃ ।
ઉવાસ નાર્યા સ તયા તપસ્વી નાતિલમ્પટઃ ॥ ૧૦॥

અથોઽનરણ્યકન્યા સા સિષેવે ભક્તિતો મુનિમ્ ।
કર્મણા મનસા વાચા લક્ષ્મીર્નારાયણં યથા ॥ ૧૧॥

ઇત્થં સ પિપ્પલાદો હિ શિવાંશો મુનિસત્તમઃ ।
રેમે તયા યુવત્યા ચ યુવાભૂય સ્વલીલયા ॥ ૧૨॥

દશ પુત્રા મહાત્માનો બભૂવુઃ સુતપસ્વિનઃ ।
મુનેઃ પિતુઃ સમાઃ સર્વે પદ્માયાઃ સુખવર્દ્ધનાઃ ॥ ૧૩॥

એવં લીલાવતારો હિ શઙ્કરસ્ય મહાપ્રભોઃ ।
પિપ્પલાદો મુનિવરો નાનાલીલાકરઃ પ્રભુઃ ॥ ૧૪॥

યેન દત્તો વરઃ પ્રીત્યા લોકેભ્યો હિ દયાલુના ।
દૃષ્ટ્વા લોકે શનેઃ પીડાં સર્વેષામનિવારિણીમ્ ॥ ૧૫॥

ષોડશાબ્દાવધિ નૃણાં જન્મતો ન ભવેચ્ચ સા ।
તથા ચ શિવભક્તાનાં સત્યમેતદ્ધિ મે વચઃ ॥ ૧૬॥

અથાનાદૃત્ય મદ્વાક્યં કુર્યાત્પીડાં શનિઃ ક્વચિત્ ।
તેષાં નૃણાં તદા સ સ્યાદ્ભસ્મસાન્ન હિ સંશયઃ ॥ ૧૭॥

ઇતિ તદ્ભયતસ્તાત વિકૃતોઽપિ શનૈશ્ચરઃ ।
તેષાં ન કુરુતે પીડાં કદાચિદ્ ગ્રહસત્તમઃ ॥ ૧૮॥

ઇતિ લીલામનુષ્યસ્ય પિપ્પલાદસ્ય સન્મુને ।
કથિતં સુચરિત્રં તે સર્વકામફલપ્રદમ્ ॥ ૧૯॥

ગાધિશ્ચ કૌશિકશ્ચૈવ પિપ્પલાદો મહામુનિઃ ।
શનૈશ્ચરકૃતાં પીડાં નાશયન્તિ સ્મૃતાસ્ત્રયઃ ॥ ૨૦॥

પિપ્પલાદસ્ય ચરિતં પદ્માચરિતસંયુતમ્ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ સુભક્ત્યા ભુવિ માનવઃ ॥ ૨૧॥

શનિપીડાવિનાશાર્થમેતચ્ચરિતમુત્તમમ્ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૨૨॥

ધન્યો મુનિવરો જ્ઞાની મહાશૈવઃ સતાં પ્રિયઃ ।
અસ્ય પુત્રો મહેશાનઃ પિપ્પલાદાખ્ય આત્મવાન્ ॥ ૨૩॥

ઇદમાખ્યાનમનઘં સ્વર્ગ્યં કુગ્રહદોષહૃત્ ।
સર્વકામપ્રદં તાત શિવભક્તિવિવર્દ્ધનમ્ ॥ ૨૪॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં પિપ્પલાદાવતારચરિતવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૩.૨૫॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૨૬. ષડ્વિંશોઽધ્યાયઃ । વૈશ્યનાથાહ્વયશિવાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
શ‍ૃણુ તાત પ્રવક્ષ્યામિ શિવસ્ય પરમાત્મનઃ ।
અવતારં પરાનન્દં વૈશ્યનાથાહ્વયં મુને ॥ ૧॥

નન્દિગ્રામે પુરા કાચિન્મહાનન્દેતિ વિશ્રુતા ।
બભૂવ વારવનિતા શિવભક્તા સુસુન્દરી ॥ ૨॥

મહાવિભવસમ્પન્ના સુધનાઢ્યા મહોજ્જ્વલા ।
નાનારત્નપરિચ્છિન્નશ‍ૃઙ્ગારરસનિર્ભરા ॥ ૩॥

સર્વસઙ્ગીતવિદ્યાસુ નિપુણાતિમનોહરા ।
તસ્યા ગેયેન હૃષ્યન્તિ રાજ્ઞ્યો રાજાન એવ ચ ॥ ૪॥

સમાનર્ચ સદા સામ્બં સા વેશ્યા શઙ્કરં મુદા ।
શિવનામજપાસક્તા ભસ્મરુદ્રાક્ષભૂષણા ॥ ૫॥

શિવં સમ્પૂજ્ય સા નિત્યં સેવન્તી જગદીશ્વરમ્ ।
નનર્ત પરયા ભક્ત્યા ગાયન્તી શિવસદ્યશઃ ॥ ૬॥

રુદ્રાક્ષૈર્ભૂષયિત્વૈકં મર્કટં ચૈવ કુક્કુટમ્ ।
કરતાલૈશ્ચ ગીતૈશ્ચ સદા નર્તયતિ સ્મ સા ॥ ૭॥

નૃત્યમાનૌ ચ તૌ દૃષ્ટ્વા શિવભક્તિરતા ચ સા ।
વેશ્યા સ્મ વિહસત્યુચ્ચૈઃ પ્રેમ્ણા સર્વસખીયુતા ॥ ૮॥

રુદ્રાક્ષૈઃ કૃતકેયૂરકર્ણાભરણમણ્ડના ।
મર્કટઃ શિક્ષયા તસ્યાઃ પુરો નૃત્યતિ બાલવત્ ॥ ૯॥

શિખાસમ્બદ્ધરુદ્રાક્ષઃ કુક્કુટઃ કપિના સહ ।
નિત્યં નનર્ત નૃત્યજ્ઞઃ પશ્યતાં હિતમાવહન્ ॥ ૧૦॥

એવં સા કુર્વતી વેશ્યા કૌતુકં પરમાદરાત્ ।
શિવભક્તિરતા નિત્યં મહાનન્દભરાભવત્ ॥ ૧૧॥

શિવભક્તિં પ્રકુર્વન્ત્યા વેશ્યાયા મુનિસત્તમ ।
બહુકાલો વ્યતીયાય તસ્યાઃ પરમસૌખ્યતઃ ॥ ૧૨॥

એકદા ચ ગૃહે તસ્યા વૈશ્યો ભૂત્વા શિવઃ સ્વયમ્ ।
પરીક્ષિતું ચ તદ્ભાવમાજગામ શુભો વ્રતી ॥ ૧૩॥

ત્રિપુણ્ડ્રવિલસદ્ભાલો રુદ્રાક્ષાભરણઃ કૃતી ।
શિવનામજપાસક્તો જટિલઃ શૈવવેષભૃત્ ॥ ૧૪॥

સ બિભ્રદ્ભસ્મનિચયં પ્રકોષ્ઠે વરકઙ્કણમ્ ।
મહારત્નપરિસ્તીર્ણં રાજતે પરકૌતુકી ॥ ૧૫॥

તમાગતં સુસમ્પૂજ્ય સા વેશ્યા પરયા મુદા ।
સ્વસ્થાને સાદરં વૈશ્યં સુન્દરી હિ ન્યવેશયત્ ॥ ૧૬॥

તત્પ્રકોષ્ઠે વરં વીક્ષ્ય કઙ્કણં સુમનોહરમ્ ।
તસ્મિઞ્જાતસ્પૃહા સા ચ તં પ્રોવાચ સુવિસ્મિતા ॥ ૧૭॥

મહાનન્દોવાચ ।
મહારત્નમયશ્ચાયં કઙ્કણસ્ત્વત્કરે સ્થિતઃ ।
મનો હરતિ મે સદ્યો દિવ્યસ્ત્રીભૂષણોચિતઃ ॥ ૧૮॥

નન્દીશ્વર ઉવાચ ।
ઇતિ તાં નવરત્નાઢ્યે સસ્પૃહાં કરભૂષણે ।
વીક્ષ્યોદારમતિર્વૈશ્યઃ સસ્મિતં સમભાષત ॥ ૧૯॥

વૈશ્યનાથ ઉવાચ ।
અસ્મિન્ રત્નવરે દિવ્યે સસ્પૃહં યદિ તે મનઃ ।
ત્વમેવાધત્સ્વ સુપ્રીત્યા મૌલ્યમસ્ય દદાસિ કિમ્ ॥ ૨૦॥

વેશ્યોવાચ ।
વયં હિ સ્વૈરચારિણ્યો વેશ્યાસ્તુ ન પતિવ્રતાઃ ।
અસ્મત્કુલોચિતો ધર્મો વ્યભિચારો ન સંશયઃ ॥ ૨૧॥

યદ્યેતદખિલં ચિત્તં ગૃહ્ણાતિ કરભૂષણમ્ ।
દિનત્રયમહોરાત્રં પત્ની તવ ભવામ્યહમ્ ॥ ૨૨॥

વૈશ્ય ઉવાચ ।
તથાસ્તુ યદિ તે સત્યં વચનં વીરવલ્લભે ।
દદામિ રત્નવલયં ત્રિરાત્રં ભવ મે વધૂઃ ॥ ૨૩॥

એતસ્મિન્વ્યવહારે તુ પ્રમાણં શશિભાસ્કરૌ ।
ત્રિવારં સત્યમિત્યુક્ત્વા હૃદયં મે સ્પૃશ પ્રિયે ॥ ૨૪॥

વેશ્યોવાચ ।
દિનત્રયમહોરાત્રં પત્ની ભૂત્વા તવ પ્રભો ।
સહધર્મં ચરામીતિ સત્યં સત્યં ન સંશયઃ ॥ ૨૫॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા હિ મહાનન્દા ત્રિવારં શશિભાસ્કરૌ ।
પ્રમાણીકૃત્ય સુપ્રીત્યા સા તદ્ હૃદયમસ્પૃશત્ ॥ ૨૬॥

અથ તસ્યૈ સ વૈશ્યસ્તુ પ્રદત્ત્વા રત્નકઙ્કણમ્ ।
લિઙ્ગં રત્નમયં તસ્ય હસ્તે દત્ત્વેદમબ્રવીત્ ॥ ૨૭॥

વૈશ્યનાથ ઉવાચ ।
ઇદં રત્નમયં લિઙ્ગં શૈવં મત્પ્રાણદવલ્લભમ્ ।
રક્ષણીયં ત્વયા કાન્તે ગોપનીયં પ્રયત્નતઃ ॥ ૨૮॥

નન્દીશ્વર ઉવાચ ।
એવમસ્ત્વિતિ સા પ્રોચ્ય લિઙ્ગમાદાય રત્નજમ્ ।
નાટ્યમણ્ડપિકામધ્યે નિધાય પ્રાવિશદ્ ગૃહમ્ ॥ ૨૯॥

સા તેન સઙ્ગતા રાત્રૌ વૈશ્યેન વિટધર્મિણા ।
સુખં સુષ્વાપ પર્યઙ્કે મૃદુતલ્પોપશોભિતે ॥ ૩૦॥

તતો નિશીથસમયે મુને વૈશ્યપતીચ્છયા ।
અકસ્માદુત્થિતા વાણી નૃત્યમણ્ડપિકાન્તરે ॥ ૩૧॥

મહાપ્રજ્વલિતો વહ્નિઃ સુસમીરસહાયવાન્ ।
નાટ્યમણ્ડપિકાં તાત તામેવ સહસાવૃણોત્ ॥ ૩૨॥

મણ્ડપે દહ્યમાને તુ સહસોત્થાય સમ્ભ્રમાત્ ।

મર્કટં મોચયામાસ સા વેશ્યા તત્ર બન્ધનાત્ ॥ ૩૩॥

સ મર્કટો મુક્તબન્ધઃ કુક્કુટેન સહામુના ।
ભિયા દૂરં હિ દુદ્રાવ વિધૂયાગ્નિકણાન્બહૂન્ ॥ ૩૪॥

સ્તમ્ભેન સહ નિર્દગ્ધં તલ્લિઙ્ગં શકલીકૃતમ્ ।
દૃષ્ટ્વા વેશ્યા સ વૈશ્યશ્ચ દુરન્તં દુઃખમાપતુઃ ॥ ૩૫॥

દૃષ્ટ્વા હ્યાત્મસમં લિઙ્ગં દગ્ધં વૈશ્યપતિસ્તદા ।
જ્ઞાતું તદ્ભાવમન્તઃસ્થં મરણાય મતિં દધે ॥ ૩૬॥

નિવિશ્યેઽતિતરાં ખેદાદ્વૈશ્યસ્તામાહ દુઃખિતામ્ ।
નાનાલીલો મહેશાનઃ કૌતુકાન્નરદેહવાન્ ॥ ૩૭॥

વૈશ્યપતિરુવાચ ।
શિવલિઙ્ગે તુ નિર્ભિન્ને દગ્ધે મહત્પ્રાણવલ્લભે ।
સત્યં વચ્મિ ન સન્દેહો નાહં જીવિતુમુત્સહે ॥ ૩૮॥

ચિતાં કારય મે ભદ્રે સ્વભૃત્યૈસ્ત્વં વરૈર્લઘુ ।
શિવે મનઃ સમાવેશ્ય પ્રવેક્ષ્યામિ હુતાશનમ્ ॥ ૩૯॥

યદિ બ્રહ્મેન્દ્રવિષ્ણ્વાદ્યા વારયેયુઃ સમેત્ય મામ્ ।
તથાપ્યસ્મિન્ ક્ષણે ભદ્રે પ્રવિશામિ ત્યજામ્યસૂન્ ॥ ૪૦॥

નન્દીશ્વર ઉવાચ ।
તમેવં દૃઢનિર્બન્ધં સા વિજ્ઞાય સુદુઃખિતા ।
સ્વભૃત્યૈઃ કારયામાસ ચિતાં સ્વભવનાદ્ બહિઃ ॥ ૪૧॥

તતઃ સ વૈશ્યઃ શિવ એક એવ
પ્રદક્ષિણીકૃત્ય સમિદ્ધમગ્નિમ્ ।
વિવેશ પશ્યત્સુ નરેષુ ધીરઃ
સુકૌતુકી સઙ્ગતિભાવમિચ્છુઃ ॥ ૪૨॥

દૃષ્ટ્વા સા તદ્ગતિં વેશ્યા મહાનન્દાતિવિસ્મિતા ।
અનુતાપં ચ યુવતી પ્રપેદે મુનિસત્તમ ॥ ૪૩॥

અથ સા દુઃખિતા વેશ્યા સ્મૃત્વા ધર્મં સુનિર્મલમ્ ।
સર્વાન્બન્ધુજનાન્વીક્ષ્ય બભાષે કરુણં વચઃ ॥ ૪૪॥

મહાનન્દોવાચ ।

રત્નકઙ્કણમાદાય મયા સત્યમુદાહૃતમ્ ।
દિનત્રયમહં પત્ની વૈશ્યસ્યામુષ્ય સમ્મતા ॥ ૪૫॥

કર્મણા મત્કૃતેનાયં મૃતો વૈશ્યઃ શિવવ્રતી ।
તસ્માદહં પ્રવેક્ષ્યામિ સહાનેન હુતાશનમ્ ॥ ૪૬॥

સ્વધર્મચારિણીત્યુક્તમાચાર્યૈઃ સત્યવાદિભિઃ ।
એવં કૃતે મમ પ્રીત્યા સત્યં મયિ ન નશ્યતુ ॥ ૪૭॥

સત્યાશ્રયઃ પરો ધર્મઃ સત્યેન પરમા ગતિઃ ।
સત્યેન સ્વર્ગમોક્ષૌ ચ સત્યે સર્વં પ્રતિષ્ઠિતમ્ ॥ ૪૮॥

નન્દીશ્વર ઉવાચ ।
ઇતિ સા દૃઢનિર્બન્ધા વાર્યમાણાપિ બન્ધુભિઃ ।
સત્યલોપભિયા નારી પ્રાણાંસ્ત્યક્તું મનો દધે ॥ ૪૯॥

સર્વસ્વં દ્વિજમુખ્યેભ્યો દત્ત્વા ધ્યાત્વા સદાશિવમ્ ।
તમગ્નિં ત્રિઃપરિક્રમ્ય પ્રવેશાભિમુખી હ્યભૂત્ ॥ ૫૦॥

તાં પતન્તીં સમિદ્ધેઽગ્નૌ સ્વપદાર્પિતમાનસામ્ ।
વારયામાસ વિશ્વાત્મા પ્રાદુર્ભૂતઃ સ વૈ શિવઃ ॥ ૫૧॥

સા તં વિલોક્યાખિલદેવદેવં
ત્રિલોચનં ચન્દ્રકલાવતંસમ્ ।
શશાઙ્કસૂર્યાનલકોટિભાસં
સ્તબ્ધેવ ભીતેવ તથૈવ તસ્થૌ ॥ ૫૨॥

તાં વિહ્વલાં સુવિત્રસ્તાં વેપમાનાં જડીકૃતામ્ ।
સમાશ્વાસ્ય ગલદ્બાષ્પાં કરૌ ધૃત્વાબ્રવીદ્વચઃ ॥ ૫૩॥

શિવ ઉવાચ ।
સત્યં ધર્મં ચ ધૈર્યં ચ ભક્તિં ચ મયિ નિશ્ચલામ્ ।
પરીક્ષિતું ત્વત્સકાશં વૈશ્યો ભૂત્વાહમાગતઃ ॥ ૫૪॥

માયયાગ્નિં સમુદ્દીપ્ય દગ્ધં તે નાટ્યમણ્ડપમ્ ।
દગ્ધં કૃત્વા રત્નલિઙ્ગં પ્રવિષ્ટોઽહં હુતાશનમ્ ॥ ૫૫॥

સા ત્વં સત્યમનુસ્મૃત્ય પ્રવિષ્ટાગ્નિં મયા સહા ।
અતસ્તે સમ્પ્રદાસ્યામિ ભોગાંસ્ત્રિદશદુર્લભાન્ ॥ ૫૬॥

યદ્યદિચ્છસિ સુશ્રોણિ તદેવ હિ દદામિ તે ।
ત્વદ્ભક્ત્યાહં પ્રસન્નોઽસ્મિ તવાદેયં ન વિદ્યતે ॥ ૫૭॥

નન્દીશ્વર ઉવાચ ।
ઇતિ બ્રુવતિ ગૌરીશે શઙ્કરે ભક્તવત્સલે ।
મહાનન્દા ચ સા વેશ્યા શઙ્કરં પ્રત્યભાષત ॥ ૫૮॥

વેશ્યોવાચ ।
ન મે વાઞ્છાસ્તિ ભોગેષુ ભૂમૌ સ્વર્ગે રસાતલે ।
તવ પાદામ્બુજસ્પર્શાદન્યત્કિઞ્ચિન્ન કામયે ॥ ૫૯॥

યે મે ભૃત્યાશ્ચ દાસ્યશ્ચ યે ચાન્યે મમ બાન્ધવાઃ ।
સર્વે ત્વદ્દર્શનપરાસ્ત્વયિ સન્ન્યસ્તવૃત્તયઃ ॥ ૬૦॥

સર્વાનેતાન્મયા સાર્ધં નિનીયાત્મપરં પદમ્ ।
પુનર્જન્મભયં ઘોરં વિમોચય નમોઽસ્તુ તે ॥ ૬૧॥

નન્દીશ્વર ઉવાચ ।
તતઃ સ તસ્યા વચનં પ્રતિનન્દ્ય મહેશ્વરઃ ।
તાઃ સર્વાશ્ચ તયા સાર્ધં નિનાય સ્વં પરં પદમ્ ॥ ૬૨॥

વૈશ્યનાથાવતારસ્તે વર્ણિતઃ પરમો મયા ।
મહાનન્દાસુખકરો ભક્તાનન્દપ્રદઃ સદા ॥ ૬૩॥

ઇદં ચરિત્રં પરમં પવિત્રં
સતાં ચ સર્વપ્રદમાશુ દિવ્યમ્ ।
શિવાવતારસ્ય વિશામ્પતેર્મહા-
નન્દામહાસૌખ્યકરં વિચિત્રમ્ ॥ ૬૪॥

ઇદં યઃ શ‍ૃણુયાદ્ભક્ત્યા શ્રાવયેદ્વા સમાહિતઃ ।
ચ્યવતે ન સ્વધર્માત્સ પરત્ર લભતે ગતિમ્ ॥ ૬૫॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં વૈશ્યનાથાહ્વયશિવાવતારવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૩.૨૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૨૭. સપ્તવિંશોઽધ્યાયઃ । દ્વિજેશાખ્યશિવાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
શ‍ૃણુ તાત પ્રવક્ષ્યામિ શિવસ્ય પરમાત્મનઃ ।
દ્વિજેશ્વરાવતારં ચ સશિવં સુખદં સતામ્ ॥ ૧॥

યઃ પૂર્વં વર્ણિતસ્તાત ભદ્રાયુર્નૃપસત્તમઃ ।
યસ્મિન્નૃષભરૂપેણાનુગ્રહં કૃતવાઞ્છિવઃ ॥ ૨॥

તદ્ધર્મસ્ય પરીક્ષાર્થં પુનરાવિર્બભૂવ સઃ ।
દ્વિજેશ્વરસ્વરૂપેણ તદેવ કથયામ્યહમ્ ॥ ૩॥

ઋષભસ્ય પ્રભાવેણ શત્રૂઞ્જિત્વા રણે પ્રભુઃ ।
પ્રાપ્તસિંહાસનસ્તાત ભદ્રાયુઃ સમ્બભૂવ હ ॥ ૪॥

ચન્દ્રાઙ્ગદસ્ય તનયા સીમન્તિન્યાઃ શુભાઙ્ગજા ।
પત્ની તસ્યાભવદ્ બ્રહ્મન્સુસાધ્વી કીર્તિમાલિની ॥ ૫॥

સ ભદ્રાયુઃ કદાચિત્સ્વપ્રિયયા ગહનં વનમ્ ।
પ્રાવિશત્સંવિહારાર્થં વસન્તસમયે મુને ॥ ૬॥

અથ તસ્મિન્વને રમ્યે વિજહાર સ ભૂપતિઃ ।
શરણાગતપાલિન્યા તયા સ્વપ્રિયયા સહ ॥ ૭॥

અથ તદ્ધર્મદૃઢતાં પ્રતીક્ષન્પરમેશ્વરઃ ।
લીલાં ચકાર તત્રૈવ શિવયા સહ શઙ્કરઃ ॥ ૮॥

શિવા શિવશ્ચ ભૂત્વોભૌ તદ્વને દ્વિજદમ્પતી ।
વ્યાઘ્રં માયામયં કૃત્વાવિર્ભૂતૌ નિજલીલયા ॥ ૯॥

અથાવિદૂરે તસ્યૈવ દ્રવન્તૌ ભયવિહ્વલૌ ।
અન્વીયમાનૌ વ્યાઘ્રેણ રુદન્તૌ તૌ બભૂવતુઃ ॥ ૧૦॥

અથ વિદ્ધૌ ચ તૌ તાત ભદ્રાયુઃ સ મહીપતિઃ ।
દદર્શ ક્રન્દમાનૌ હિ શરણ્યઃ ક્ષત્રિયર્ષભઃ ॥ ૧૧॥

અથ તૌ મુનિશાર્દૂલ સ્વમાયાદ્વિજદમ્પતી ।
ભદ્રાયુષં મહારાજમૂચતુર્ભયવિહ્વલૌ ॥ ૧૨॥

દ્વિજદમ્પતી ઊચતુઃ ।

પાહિ પાહિ મહારાજ નાવુભૌ ધર્મવિત્તમ ।
એષ આયાતિ શાર્દૂલો જગ્ધુમાવાં મહાપ્રભો ॥ ૧૩॥

એષ હિંસ્રઃ કાલસમઃ સર્વપ્રાણિભયઙ્કરઃ ।
યાવન્ન ખાદતિ પ્રાપ્ય તાવન્નૌ રક્ષ ધર્મવિત્ ॥ ૧૪॥

નન્દીશ્વર ઉવાચ ।
ઇત્થમાક્રન્દિતં શ્રુત્વા તયોશ્ચ નૃપતીશ્વરઃ ।
અતિ શીઘ્રં મહાવીરઃ સ યાવદ્ધનુરાદદે ॥ ૧૫॥

તાવદભ્યેત્ય શાર્દૂલઃ ત્વરમાણોઽતિમાયિકઃ ।
સ તસ્ય દ્વિજવર્યસ્ય મધ્યે જગ્રાહ તાં વધૂમ્ ॥ ૧૬॥

હે નાથ નાથ હે કાન્ત હા શમ્ભો હા જગદ્ગુરો ।
ઇતિ રોરુયમાનાં તાં વ્યાઘ્રો જગ્રાસ ભીષણઃ ॥ ૧૭॥

તાવત્સ રાજા નિશિતૈર્ભલ્લૈર્વ્યાઘ્રમતાડયત્ ।
ન સ તૈર્વિવ્યથે કિઞ્ચિદ્ગિરીન્દ્ર ઇવ વૃષ્ટિભિઃ ॥ ૧૮॥

સ શાર્દૂલો મહાસત્ત્વો રાજ્ઞઃ સ્વૈરકૃતવ્યથઃ ।
બલાદાકૃષ્ય તાં નારીમપાક્રમત સત્વરઃ ॥ ૧૯॥

વ્યાઘ્રેણાપહૃતાં નારીં વીક્ષ્ય વિપ્રોઽતિવિસ્મિતઃ ।
લૌકિકીં ગતિમાશ્રિત્ય રુરોદાતિ મુહુર્મુહુઃ ॥ ૨૦॥

રુદિત્વા ચિરકાલં ચ સ વિપ્રો માયયેશ્વરઃ ।
ભદ્રાયુષં મહીપાલં પ્રોવાચ મદહારકઃ ॥ ૨૧॥

દ્વિજેશ્વર ઉવાચ ।
રાજન્ ક્વ તે મહાસ્ત્રાણિ ક્વ તે ત્રાણં મહદ્ધનુઃ ।
ક્વ તે દ્વાદશસાહસ્રમહાનાગયુતં બલમ્ ॥ ૨૨॥

કિં તે ખડ્ગેન શઙ્ખેન કિં તે મન્ત્રાસ્ત્રવિદ્યયા ।
કિં સત્ત્વેન મહાસ્ત્રાણાં કિં પ્રભાવેણ ભૂયસા ॥ ૨૩॥

તત્સર્વં વિફલં જાતં યચ્ચાન્યત્ત્વયિ તિષ્ઠતિ ।
યસ્ત્વં વનૌકસાં ઘાતં ન નિવારયિતું ક્ષમઃ ॥ ૨૪॥

ક્ષત્રસ્યાયં પરો ધર્મો ક્ષતાચ્ચ પરિરક્ષણમ્ ।
તસ્મિન્કુલોચિતે ધર્મે નષ્ટે ત્વજ્જીવિતેન કિમ્ ॥ ૨૫॥

આર્તાનાં શરણાપ્તાનાં ત્રાણં કુર્વન્તિ પાર્થિવાઃ ।
પ્રાણૈરર્થૈશ્ચ ધર્મજ્ઞાસ્તદ્વિના ચ મૃતોપમાઃ ॥ ૨૬॥

આર્તત્રાણવિહીનાનાં જીવિતાન્મરણં વરમ્ ।
ધનિનાં દાનહીનાનાં ગાર્હસ્થ્યાદ્ભિક્ષુતા વરમ્ ॥ ૨૭॥

વરં વિષાશનં પ્રાજ્ઞૈર્વરમગ્નિપ્રવેશનમ્ ।
કૃપણાનામનાથાનાં દીનાનામપરક્ષણાત્ ॥ ૨૮॥

નન્દીશ્વર ઉવાચ ।
ઇત્થં વિલપિતં તસ્ય સ્વવીર્યસ્ય ચ ગર્હણમ્ ।
નિશમ્ય નૃપતિઃ શોકાદાત્મન્યેવમચિન્તયત્ ॥ ૨૯॥

અહો મે પૌરુષં નષ્ટમદ્ય દૈવવિપર્યયાત્ ।
અદ્ય કીર્તિશ્ચ મે નષ્ટા પાતકં પ્રાપ્તમુત્કટમ્ ॥ ૩૦॥

ધર્મઃ કુલોચિતો નષ્ટો મન્દભાગ્યસ્ય દુર્મતેઃ ।
નૂનં મે સમ્પદો રાજ્યમાયુષ્યં ક્ષયમેષ્યતિ ॥ ૩૧॥

અદ્ય ચૈનં દ્વિજન્માનં હતદારં શુચાર્દિતમ્ ।
હતશોકં કરિષ્યામિ દત્ત્વા પ્રાણાનતિપ્રિયાન્ ॥ ૩૨॥

ઇતિ નિશ્ચિત્ય મનસા સ ભદ્રાયુર્નૃપોત્તમઃ ।
પતિત્વા પાદયોસ્તસ્ય બભાષે પરિસાન્ત્વયન્ ॥ ૩૩॥

ભદ્રાયુરુવાચ ।
કૃપાં કૃત્વા મયિ બ્રહ્મન્ ક્ષત્રબન્ધૌ હતૌજસિ ।
શોકન્ત્યજ મહાપ્રાજ્ઞ દાસ્યામ્યદ્ય તુ વાઞ્છિતમ્ ॥ ૩૪॥

ઇદં રાજ્યમિયં રાજ્ઞી મમેદં ચ કલેવરમ્ ।
ત્વદધીનમિદં સર્વં કિન્તેઽભિલષિતં વરમ્ ॥ ૩૫॥

બ્રાહ્મણ ઉવાચ ।
કિમાદર્શેન ચાન્ધસ્ય કિં ગૃહેર્ભૈક્ષ્યજીવિનઃ ।
કિં પુસ્તકેન મૂઢસ્ય નિસ્ત્રીકસ્ય ધનેન કિમ્ ॥ ૩૬॥

અતોઽહં હતપત્નીકો ભુક્તભોગો ન કર્હિચિત્ ।
ઇમાન્તવાગ્રમહિષીં કામયે દીયતામિતિ ॥ ૩૭॥

ભદ્રાયુરુવાચ

દાતા રસાન્તવિત્તસ્ય રાજ્યસ્ય ગજવાજિનામ્ ।
આત્મદેહસ્ય કસ્યાપિ કલત્રસ્ય ન કર્હિચિત્ ॥ ૩૮॥

પરદારોપભોગેન યત્પાપં સમુપાર્જિતમ્ ।
ન તત્ક્ષાલયિતું શક્યં પ્રાયશ્ચિત્તશતૈરપિ ॥ ૩૯॥

બ્રાહ્મણ ઉવાચ ।
આસ્તાં બ્રહ્મવધં ઘોરમપિ મદ્યનિષેવણમ્ ।
તપસા વિધમિષ્યામિ કિં પુનઃ પારદારિકમ્ ॥ ૪૦॥

તસ્માત્પ્રયચ્છ ભાર્યાં સ્વામિયાં કામો ન મેઽપરઃ ।
અરક્ષણાદ્ભયાર્તાનાં ગન્તાસિ નિરયં ધ્રુવમ્ ॥ ૪૧॥

નન્દીશ્વર ઉવાચ ।
ઇતિ વિપ્રગિરા ભીતશ્ચિન્તયામાસ પાર્થિવઃ ।
અરક્ષણાન્મહાપાપં પત્નીદાનં તતો વરમ્ ॥ ૪૨॥

અતઃ પત્નીં દ્વિજાગ્ર્યાય દત્ત્વા નિર્મુક્તકિલ્બિષઃ ।
સદ્યો વહ્નિં પ્રવેક્ષ્યામિ કીર્તિશ્ચ વિદિતા ભવેત્ ॥ ૪૩॥

ઇતિ નિશ્ચિત્ય મનસા સમુજ્જ્વાલ્ય હુતાશનમ્ ।
તમાહૂય દ્વિજં ચક્રે પત્નીદાનં સહોદકમ્ ॥ ૪૪॥

સ્વયં સ્નાતઃ શુચિર્ભૂત્વા પ્રણમ્ય વિબુધેશ્વરાન્ ।
તમગ્નિં ત્રિઃ પરિક્રમ્ય શિવં દધ્યૌ સમાહિતઃ ॥ ૪૫॥

તમથાગ્નિં પતિષ્યન્તં સ્વપદાસક્તચેતસમ્ ।
પ્રત્યષેધત વિશ્વેશઃ પ્રાદુર્ભૂતો દ્વિજેશ્વરઃ ॥ ૪૬॥

તમીશ્વરં પઞ્ચમુખં ત્રિનેત્રં પિનાકિનં ચન્દ્રકલાવતંસમ્ ।
પ્રલમ્બપિઙ્ગાંશુજટાકલાપં મધ્યાહ્નસદ્ભાસ્કરકોટિતેજસમ્ ॥ ૪૭॥

મૃણાલગૌરં ગજચર્મવાસસં ગઙ્ગાતરઙ્ગોક્ષિતમૌલિદેશકમ્ ।
નાગેન્દ્રહારાવલિકણ્ઠભૂષણં કિરીટકાઞ્ચ્યઙ્ગદકઙ્કણોજ્જ્વલમ્ ॥ ૪૮॥

શૂલાસિખટ્વાઙ્ગકુઠારચર્મ-
મૃગાભયાષ્ટાઙ્ગપિનાકહસ્તમ્ ।
વૃષોપરિસ્થં શિતિકણ્ઠભૂષણં
પ્રોદ્ભૂતમગ્રે સ નૃપો દદર્શ ॥ ૪૯॥

તતોઽમ્બરાદ્ દ્રુતં પેતુર્દિવ્યાઃ કુસુમવૃષ્ટયઃ ।
પ્રણેદુર્દેવતૂર્યાણિ દેવ્યશ્ચ નનૃતુર્જગુઃ ॥ ૫૦॥

તત્રાજગ્મુઃ સ્તૂયમાના હરિર્બ્રહ્મા તથાસુરાઃ ।
ઇન્દ્રાદયો નારદાદ્યા મુનયશ્ચાપરેઽપિ ચ ॥ ૫૧॥

તદોત્સવો મહાનાસીત્તત્ર ભક્તિપ્રવર્ધનઃ ।
સતિ પશ્યતિ ભૂપાલે ભક્તિનમ્રીકૃતાઞ્જલૌ ॥ ૫૨॥

તદ્દર્શનાનન્દવિજૃમ્ભિતાશયઃ પ્રવૃદ્ધબાષ્પામ્બુવિલિપ્તગાત્રઃ ।
પ્રહૃષ્ટરોમા સ હિ ગદ્ગદાક્ષરસ્તુષ્ટાવ ગીર્ભિર્મુકુલીકૃતાઞ્જલિઃ ॥ ૫૩॥

તતસ્સ ભગવાન્ રાજ્ઞા સંસ્તુતઃ પરમેશ્વરઃ ।
પ્રસન્નઃ સહ પાર્વત્યા તમુવાચ દયાનિધિઃ ॥ ૫૪॥

રાજંસ્તે પરિતુષ્ટોઽહં ભક્ત્યા ત્વદ્ધર્મતોઽધિકમ્ ।
વરં બ્રૂહિ સપત્નીકમ્પ્રયચ્છામિ ન સંશયઃ ॥ ૫૫॥

તવ ભાવપરીક્ષાર્થં દ્વિજો ભૂત્વાહમાગતઃ ।
વ્યાઘ્રેણ યા પરિગ્રસ્તા સાક્ષાદ્દેવી શિવા હિ સા ॥ ૫૬॥

વ્યાઘ્રો માયામયો યસ્તે શરૈરક્ષત વિગ્રહઃ ।
ધીરતાન્ દ્રષ્ટુકામસ્તે પત્નીં યાચિતવાનહમ્ ॥ ૫૭॥

નન્દીશ્વર ઉવાચ ।
ઇત્યાકર્ણ્ય પ્રભોર્વાક્યં સ ભદ્રાયુર્મહીપતિઃ ।
પુનઃ પ્રણમ્ય સંસ્તૂય સ્વામિનં નતકોઽબ્રવીત્ ॥ ૫૮॥

ભદ્રાયુરુવાચ ।
એક એવ વરો નાથ યદ્ભવાન્પરમેશ્વરઃ ।
ભવતાપપ્રતપ્તસ્ય મમ પ્રત્યક્ષતાં ગતઃ ॥ ૫૯॥

યદ્દાસિ પુનર્નાથ વરં સ્વકૃપયા પ્રભો ।
વૃણેઽહં પરમં ત્વત્તો વરં હિ વરદર્ષભાત્ ॥ ૬૦॥

વજ્રબાહુઃ પિતા મે હિ સપત્નીકો મહેશ્વર ।
સપત્નીકસ્ત્વહં નાથ સદા ત્વત્પાદસેવકઃ ॥ ૬૧॥

વૈશ્યઃ પદ્માકરો નામ તત્પુત્રઃ સનયાભિધઃ ।
સર્વાનેતાન્મહેશાન સદા ત્વં પાર્શ્વગાન્કુરુ ॥ ૬૨॥

નન્દીશ્વર ઉવાચ ।
અથ રાજ્ઞી ચ તત્પત્ની પ્રમત્તા કીર્તિમાલિની ।
ભક્ત્યા પ્રસાદ્ય ગિરિશં યયાચે વરમુત્તમમ્ ॥ ૬૩॥

રાજ્ઞ્યુવાચ ।
ચન્દ્રાઙ્ગદો મમ પિતા માતા સીમન્તિની ચ મે ।
તયોર્યાચે મહાદેવ ત્વત્પાર્શ્વે સન્નિધિં મુદા ॥ ૬૪॥

નન્દીશ્વર ઉવાચ ।
એવમસ્ત્વિતિ ગૌરીશઃ પ્રસન્નો ભક્તવત્સલઃ ।
તયોઃ કામવરાન્દત્ત્વા ક્ષણાદન્તર્હિતોઽભવત્ ॥ ૬૫॥

ભદ્રાયુરપિ સુપ્રીત્યા પ્રસાદં પ્રાપ્ય શૂલિનઃ ।
સહિતઃ કીર્તિમાલિન્યા બુભુજે વિષયાન્બહૂન્ ॥ ૬૬॥

કૃત્વા વર્ષાયુતં રાજ્યમવ્યાહતપરાક્રમઃ ।
રાજ્યં વિક્ષિપ્ય તનયે જગામ શિવસન્નિધિમ્ ॥ ૬૭॥

ચન્દ્રાઙ્ગદોઽપિ રાજેન્દ્રો રાજ્ઞી સીમન્તિની ચ સા ।
ભક્ત્યા સમ્પૂજ્ય ગિરિશં જગ્મતુઃ શામ્ભવં પદમ્ ॥ ૬૮॥

દ્વિજેશ્વરાવતારસ્તે વર્ણિતઃ પરમો મયા ।
મહેશ્વરસ્ય ભદ્રાયુપરમાનન્દદઃ પ્રભો ॥ ૬૯॥

ઇદં ચરિત્રં પરમં પવિત્રં શિવાવતારસ્ય પવિત્રકીર્ત્તેઃ ।
દ્વિજેશસંજ્ઞસ્ય મહાદ્ભુતં હિ શ ृણ્વન્પઠન્ શમ્ભુપદં પ્રયાતિ ॥ ૭૦॥

ય ઇદં શ ृણુયાન્નિત્યં શ્રાવયેદ્વા સમાહિતઃ ।
ન શ્ચોતતિ સ્વધર્માત્સ પરત્ર લભતે ગતિમ્ ॥ ૭૧॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં દ્વિજેશાખ્યશિવાવતારવર્ણનં નામ સપ્તવિંશોઽધ્યાયઃ ॥ ૩.૨૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૨૮. અષ્ટાવિંશોઽધ્યાયઃ । યતિનાથબ્રહ્મહંસાહ્વયશિવાવતારચરિતવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
શ‍ૃણુ પ્રાજ્ઞ પ્રવક્ષ્યામિ શિવસ્ય પરમાત્મનઃ ।
અવતારં પરાનન્દં યતિનાથાહ્વયં મુને ॥ ૧॥

અર્બુદાચલસંજ્ઞે તુ પર્વતે ભિલ્લવંશજઃ ।
આહુકશ્ચ તદભ્યાશે વસતિ સ્મ મુનીશ્વર ॥ ૨॥

તત્પત્ની હ્યાહુકા નામ બભૂવ કિલ સુવ્રતા ।
ઉભાવપિ મહાશૈવાવાસ્તાં તૌ શિવપૂજકૌ ॥ ૩॥

કસ્મિંશ્ચિત્સમયે ભિલ્લઃ શિવભક્તિરતઃ સદા ।
આહારાર્થં સ્વપત્ન્યાશ્ચ સુદૂરં સ ગતો મુને ॥ ૪॥

એતસ્મિન્નન્તરે તત્ર ગેહે ભિલ્લસ્ય શઙ્કરઃ ।
ભૂત્વા યતિવપુઃ સાયં પરીક્ષાર્થં સમાયયૌ ॥ ૫॥

તસ્મિન્નવસરે તત્રાજગામ સ ગૃહાધિપઃ ।
પૂજનં ચ યતીશસ્ય ચકાર પ્રેમતઃ સુધીઃ ॥ ૬॥

તદ્ભાવસ્ય પરીક્ષાર્થં યતિરૂપઃ સ શઙ્કરઃ ।
મહાલીલાતરઃ પ્રીત્યા ભીતઃ પ્રોવાચ દીનગીઃ ॥ ૭॥

યતિનાથ ઉવાચ ।
અદ્ય સ્થલં નિવાસાર્થં દેહિ મે પ્રાતરેવ હિ ।
યાસ્યામિ સર્વથા ભિલ્લ સ્વસ્તિ સ્યાત્તવ સર્વદા ॥ ૮॥

ભિલ્લ ઉવાચ ।
સત્યં પ્રોક્તં ત્વયા સ્વામિન્ શ‍ૃણુ મદ્વચનં ચ તે ।
અતિ સ્વલ્પં સ્થલં મે હિ સ્યાન્નિવાસઃ કથં તવ ॥ ૯॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તઃ સ યતિસ્તેન ગમનાય મતિં દધે ।
તાવદ્ભિલ્લ્યા વચઃ પ્રોક્તં સ્વામિનં સંવિચાર્ય વૈ ॥ ૧૦॥

ભિલ્લ્યુવાચ ।
સ્વામિન્દેહિ યતેઃ સ્થાનં વિમુખં કુરુ માતિથિમ્ ।
ગૃહધર્મં વિચાર્ય ત્વમન્યથા ધર્મસઙ્ક્ષયઃ ॥ ૧૧॥

સ્થીયતાં તે ગૃહાભ્યન્તઃ સુખેન યતિના સહ ।
અહં બહિઃ સ્થિતિં કુર્યામાયુધાનિ બૃહન્ત્યપિ ॥ ૧૨॥

નન્દીશ્વર ઉવાચ ।
તસ્યાસ્તદ્વચનં શ્રુત્વા ભિલ્લ્યા ધર્માન્વિતં શિવમ્ ।
સ્વપત્ન્યા મનસા તેન ભિલ્લેન ચ વિચારિતમ્ ॥ ૧૩॥

સ્ત્રિયં બહિશ્ચ નિષ્કાસ્ય કથં સ્થેયં મયા ગૃહે ।
યતેરન્યત્ર ગમનમધર્મકરમાત્મનઃ ॥ ૧૪॥

દ્વયમપ્યુચિતં નૈવ સર્વથા ગૃહમેધિનઃ ।
યદ્ભાવિ તદ્ભવેદેવ મયા સ્થેયં ગૃહાદ્ બહિઃ ॥ ૧૫॥

ઇત્યાગ્રહં તદા કૃત્વા ગૃહાન્તઃ સ્થાપ્ય તૌ મુદા ।
સ્વાયુધાનિ ચ સંસ્થાપ્ય ભિલ્લોઽતિષ્ઠદ્ ગૃહાદ્ બહિઃ ॥ ૧૬॥

રાત્રૌ તં પશવઃ ક્રૂરાઃ હિંસકાઃ સમપીડયન્ ।
તેનાપિ ચ યથાશક્તિ કૃતો યત્નો મહાંસ્તદા ॥ ૧૭॥

એવં યત્નં પ્રકુર્વાણઃ સ ભિલ્લો બલવાનપિ ।
પ્રારબ્ધાત્પ્રેરિતૈર્હિંસ્રૈર્બલાદાસીચ્ચ ભક્ષિતઃ ॥ ૧૮॥

પ્રાતરુત્થાય સ યતિર્દૃષ્ટ્વા હિંસ્રૈશ્ચ ભક્ષિતમ્ ।
ભિલ્લં વનેચરં તં વૈ દુઃખિતોઽભૂદતીવ હિ ॥ ૧૯॥

દુખિતં તં યતિં દૃષ્ટ્વા ભિલ્લી સા દુઃખિતાપિ હિ ।
ધૈર્યાત્સ્વદુઃખં સંહૃત્ય વચનં ચેદમબ્રવીત્ ॥ ૨૦॥

ભિલ્લ્યુવાચ ।
કિમર્થં ક્રિયતે દુઃખં ભદ્રં જાતં યતેઽધુના ।
ધન્યોઽયં કૃતકૃત્યશ્ચ યજ્જાતો મૃત્યુરીદૃશઃ ॥ ૨૧॥

અહં ચૈનં ગમિષ્યામિ ભસ્મ ભૂત્વાનલે યતે ।
ચિતાં કારય સુપ્રીત્યા સ્ત્રીણાં ધર્મઃ સનાતનઃ ॥ ૨૨॥

ઇતિ તદ્વચનં શ્રુત્વા હિતં મત્વા સ્વયં યતિઃ ।
ચિતાં વ્યરચયત્સા હિ પ્રવિવેશ સ્વધર્મતઃ ॥ ૨૩॥

એતસ્મિન્નન્તરે સાક્ષાત્પુરઃ પ્રાદુરભૂચ્છિવઃ ।
ધન્યે ધન્યે ઇતિ પ્રીત્યા પ્રશંસસ્તાં હરોઽબ્રવીત્ ॥ ૨૪॥

હર ઉવાચ ।
વરં બ્રૂહિ પ્રસન્નોઽસ્મિ ત્વદાચરણતોઽનઘે ।
તવાદેયં ન વૈ કિઞ્ચિદ્ વશ્યોઽહં તે વિશેષતઃ ॥ ૨૫॥

નન્દીશ્વર ઉવાચ ।
તચ્છ્રુત્વા શમ્ભુવચનં પરમાનન્દદાયકમ્ ।
સુખં પ્રાપ્તં વિશેષેણ ન કિઞ્ચિત્સ્મરણં યયૌ ॥ ૨૬॥

તસ્યાસ્તદ્ગતિમાલક્ષ્ય સુપ્રસન્નો હરોઽભવત્ ।
ઉવાચ ચ પુનઃ શમ્ભુર્વરં બ્રૂહીતિ તાં પ્રભુઃ ॥ ૨૭॥

શિવ ઉવાચ ।
અયં યતિશ્ચ મદ્રૂપો હંસરૂપો ભવિષ્યતિ ।
પરજન્મનિ વાં પ્રીત્યા સંયોગં કારયિષ્યતિ ॥ ૨૮॥

ભિલ્લશ્ચ વીરસેનસ્ય નૈષધે નગરે વરે ।
મહાન્પુત્રો નલો નામ ભવિષ્યતિ ન સંશયઃ ॥ ૨૯॥

ત્વં સુતા ભીમરાજસ્ય વૈદર્ભે નગરેઽનઘે ।
દમયન્તી ચ વિખ્યાતા ભવિષ્યસિ ગુણાન્વિતા ॥ ૩૦॥

યુવાં ચોભૌ મિલિત્વા ચ રાજભોગં સુવિસ્તરમ્ ।
ભુક્ત્વા મુક્તિં ચ યોગીન્દ્રૈર્લપ્સ્યેથે દુર્લભાં ધ્રુવમ્ ॥ ૩૧॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા ચ સ્વયં શમ્ભુર્લિઙ્ગરૂપોઽભવત્તદા ।
તસ્માન્ન ચલિતો ધર્માદચલેશ ઇતિ સ્મૃતઃ ॥ ૩૨॥

સ ભિલ્લ આહુકશ્ચાપિ વીરસેનસુતોઽભવત્ ।
નૈષધે નગરે તાત નલનામા મહાનૃપઃ ॥ ૩૩॥

આહુકા સા મહાભિલ્લી ભીમસ્ય તનયાભવત્ ।
વૈદર્ભે નગરે રાજ્ઞો દમયન્તીતિ વિશ્રુતા ॥ ૩૪॥

યતિનાથાહ્વયઃ સોઽપિ હંસરૂપોઽભવચ્છિવઃ ।
વિવાહં કારયામાસ દમયન્ત્યા નલેન વૈ ॥ ૩૫॥

પૂર્વસત્કારરૂપેણ મહાપુણ્યેન શઙ્કરઃ ।
હંસરૂપં વિધાયૈવ તાભ્યાં સુખમદાત્પ્રભુઃ ॥ ૩૬॥

શિવો હંસાવતારો હિ નાનાવાર્તાવિચક્ષણઃ ।
દમયન્ત્યા નલસ્યાપિ પરમાનન્દદાયકઃ ॥ ૩૭॥

ઇદં ચરિતં પરમં પવિત્રં શિવાવતારસ્ય પવિત્રકીર્તેઃ ।
યતીશસંજ્ઞસ્ય મહાદ્ભુતં હિ હંસાહ્વયસ્યાપિ વિમુક્તિદં હિ ॥ ૩૮॥

યતીશબ્રહ્મહંસાખ્યાવતારચરિતં શુભમ્ ।
શ ृણુયાચ્છ્રાવયેદ્યો હિ સ લભેત પરાં ગતિમ્ ॥ ૩૯॥

ઇદમાખ્યાનમનઘં સર્વકામફલપ્રદમ્ ।
સ્વર્ગ્યં યશસ્યમાયુષ્યં ભક્તિવર્ધનમુત્તમમ્ ॥ ૪૦॥

શ્રુત્વૈતચ્ચરિતં શમ્ભોર્યતિહંસસ્વરૂપયોઃ ।
ઇહ સર્વસુખં ભુક્ત્વા સોઽન્તે શિવપુરં વ્રજેત્ ॥ ૪૧॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં યતિનાથબ્રહ્મહંસાહ્વયશિવાવતારચરિતવર્ણનં નામાષ્ટાવિંશોઽધ્યાયઃ ॥ ૩.૨૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૨૯. એકોનત્રિંશોઽધ્યાયઃ । કૃષ્ણદર્શનશિવાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
સનત્કુમાર શમ્ભોસ્ત્વવતારં પરમં શ ृણુ ।
નભગજ્ઞાનદં કૃષ્ણદર્શનાહ્વયમુત્તમમ્ ॥ ૧॥

ઇક્ષ્વાકુપ્રમુખા આસન્ શ્રાદ્ધદેવસુતાશ્ચ યે ।
નભગસ્તત્ર નવમો નાભાગસ્તત્સુતઃ સ્મૃતઃ ॥ ૨॥

અમ્બરીષઃ સુતસ્તસ્ય વિષ્ણુભક્તો બભૂવ સઃ ।
યસ્યોપરિ પ્રસન્નોઽભૂદ્દુર્વાસા બ્રહ્મભક્તિતઃ ॥ ૩॥

પિતામહોઽમ્બરીષસ્ય નભગો યઃ પ્રકીર્તિતઃ ।
તચ્ચરિતં શ ृણુ મુને યસ્મૈ જ્ઞાનમદાચ્છિવઃ ॥ ૪॥

નભગો મનુપુત્રસ્તુ પઠનાર્થં સુબુદ્ધિમાન્ ।

ચક્રે ગુરુકુલે વાસં બહુકાલં જિતેન્દ્રિયઃ ॥ ૫॥

એતસ્મિન્સમયે તે વૈ ઇક્ષ્વાકુપ્રમુખાઃ સુતાઃ ।
તસ્મૈ ભાગમકલ્પ્યૈવ ભેજુર્ભાગાન્નિજાન્ક્રમાત્ ॥ ૬॥

સ્વં સ્વં ભાગં ગૃહીત્વા તે બુભુજૂ રાજ્યમુત્તમમ્ ।
અવિષાદં મહાભાગાઃ પિત્રાદેશાત્સુબુદ્ધયઃ ॥ ૭॥

સ પશ્ચાદાગતસ્તત્ર બ્રહ્મચારી ગુરુસ્થલાત્ ।
નભગોઽધીત્ય સર્વાશ્ચ સાઙ્ગોપાઙ્ગાઃ શ્રુતીઃ ક્રમાત્ ॥ ૮॥

ભ્રાતૃન્વિલોક્ય નભગો વિભક્તાન્સકલાન્નિજાન્ ।
દાયાર્થી પ્રાહ તાન્સ્નેહાદિક્ષ્વાકુપ્રમુખાન્મુને ॥ ૯॥

નભગ ઉવાચ ।
ભ્રાતરોઽભક્તકં મહ્યં દાયં કૃત્વા યથાતથમ્ ।
સર્વે વિભક્તાઃ સુપ્રીત્યા સ્વદાયાર્થાગતાય ચ ॥ ૧૦॥

તદા વિસ્મૃતમસ્માભિરિદાનીં પિતરં તવ ।
વિભજામો વયં ભાગં તં ગૃહાણ ન સંશયઃ ॥ ૧૧॥

તચ્છ્રુત્વા ભ્રાતૃવચનં નભગઃ પરવિસ્મૃતઃ ।
તદોપકણ્ઠમાગત્ય પિતરં સમભાષત ॥ ૧૨॥

નભગ ઉવાચ ।
હે તાત ભ્રાતરઃ સર્વે ત્યક્ત્વા માં ન્યભજંશ્ચ તે ।
પઠનાર્થં ગતશ્ચાહં બ્રહ્મચારી ગુરોઃ કુલે ॥ ૧૩॥

તત આગત્ય મે પૃષ્ટા દાયદાનાર્થમાદરાત્ ।
તે ત્વામૂચુર્વિભાગં મે તદર્થમહમાગતઃ ॥ ૧૪॥

નન્દીશ્વર ઉવાચ ।
તદાકર્ણ્ય વચસ્તસ્ય પિતા તં પ્રાહ વિસ્મિતઃ ।
આશ્વાસ્ય શ્રાદ્ધદેવઃ સ સત્યધર્મરતં મુને ॥ ૧૫॥

મનુરુવાચ ।
તદુક્તં માદૃથાસ્તાત પ્રતારણકરં હિ તત્ ।
ન હ્યહં પરમં દાયં સર્વથા ભોગસાધનમ્ ॥ ૧૬॥

તથાપિ દાયભાવેન દત્તોઽહં તૈઃ પ્રતારિભિઃ ।

તવ વૈ જીવનોપાયં વદામિ શ ृણુ તત્ત્વતઃ ॥ ૧૭॥

સત્રમાઙ્ગિરસા વિપ્રાઃ કુર્વન્ત્યદ્ય સુમેધસઃ ।
તત્ર કર્મણિ મુહ્યન્તિ ષષ્ઠં ષષ્ઠમહઃ પ્રતિ ॥ ૧૮॥

તત્ર ત્વં ગચ્છ નભગ તાન્ સુશંસ મહાકવે ।
સૂક્તે દ્વે વૈશ્વદેવે હિ સત્રં શુદ્ધં હિ તદ્ભવેત્ ॥ ૧૯॥

તત્કર્મણિ સમાપ્તે હિ સ્વર્યાન્તો બ્રાહ્મણાશ્ચ તે ।
ધનં દાસ્યન્તિ તે તુષ્ટાઃ સ્વસત્રપરિશેષિતમ્ ॥ ૨૦॥

નન્દીશ્વર ઉવાચ ।
તદાકર્ણ્ય પિતુર્વાક્યં નભગઃ સત્યસારવાન્ ।
જગામ તત્ર સુપ્રીત્યા યત્ર તત્સત્રમુત્તમમ્ ॥ ૨૧॥

તદાહઃ કર્મણિ મુને સત્રે તસ્મિન્સ માનવઃ ।
સૂક્તે દ્વે વૈશ્વદેવે હિ પ્રોવાચ સ્પષ્ટતઃ સુધીઃ ॥ ૨૨॥

સમાપ્તે કર્મણિ તતો વિપ્રા આઙ્ગિરસાશ્ચ તે ।
તસ્મૈ દત્ત્વા યયુઃ સ્વર્ગં સ્વં સ્વં સત્રાવશેષિતમ્ ॥ ૨૩॥

તત્તદા સ્વીકરિષ્યન્તં સુસત્રપરિશેષિતમ્ ।
વિજ્ઞાય ગિરિશઃ સદ્ય આવિર્ભૂતઃ સદૂતિકૃત્ ॥ ૨૪॥

સર્વાઙ્ગસુન્દરઃ શ્રીમાન્પુરુષઃ કૃષ્ણદર્શનઃ ।
ભાવં સમીક્ષિતું ભાગં દાતું જ્ઞાનં પરં ચ તત્ ॥ ૨૫॥

અથો સ શઙ્કરઃ શમ્ભુઃ પરીક્ષાકર ઈશ્વરઃ ।
ઉવાચોત્તરતોઽભ્યેત્ય નભગં તં હિ માનવમ્ ॥ ૨૬॥

ઈશ્વર ઉવાચ ।
કસ્ત્વં ગૃહ્ણાસિ પુરુષ મમેદં વાસ્તુકં વસુ ।
પ્રેષિતઃ કેન તત્સર્વં સત્યં વદ મમાગ્રતઃ ॥ ૨૭॥

નન્દીશ્વર ઉવાચ ।
તચ્છ્રુત્વા તદ્વચસ્તાત માનવો નભગઃ કવિઃ ।
પ્રત્યુવાચ વિનીતાત્મા પુરુષં કૃષ્ણદર્શનમ્ ॥ ૨૮॥

નભગ ઉવાચ ।
મમેદમૃષિભિર્દત્તં વસુ યજ્ઞગતં ખલુ ।

કથં વારયસે માં ત્વં ગૃહ્ણતં કૃષ્ણદર્શન ॥ ૨૯॥

નન્દીશ્વર ઉવાચ ।
આકર્ણ્ય નાભગં વાક્યમિદં સત્યમુદીરિતમ્ ।
પ્રત્યુવાચ પ્રસન્નાત્મા પુરુષઃ કૃષ્ણદર્શનઃ ॥ ૩૦॥

કૃષ્ણદર્શન ઉવાચ ।
વિવાદેઽસ્મિન્હિ નૌ તાત પ્રમાણં જનકસ્તવ ।
યાહિ તં પૃચ્છ સ બ્રૂયાત્તત્પ્રમાણં તુ સત્યતઃ ॥ ૩૧॥

નન્દીશ્વર ઉવાચ ।
તદાકર્ણ્ય વચસ્તસ્ય નભગો માનવઃ કવિઃ ।
આગચ્છત્પિતરં પ્રીત્યા તદુક્તં પૃષ્ટવાન્મુને ॥ ૩૨॥

પુત્રોદિતં સમાકર્ણ્ય શ્રાદ્ધદેવઃ સ વૈ મનુઃ ।
સ્મૃત્વા શિવપદામ્ભોજં પ્રાપ્તસ્મૃતિરુવાચ તમ્ ॥ ૩૩॥

મનુરુવાચ ।
હે તાત શૃણુ મદ્વાક્યં સ દેવઃ પુરુષઃ શિવઃ ।
તસ્યૈવ સકલં વસ્તુ યજ્ઞપ્રાપ્તં વિશેષતઃ ॥ ૩૪॥

અધ્વરોર્વરિતં વસ્તુ રુદ્રભાગઃ પ્રકીર્તિતઃ ।
ઇત્યપિ પ્રાજ્ઞવાદો હિ ક્વચિજ્જાતસ્તદિચ્છયા ॥ ૩૫॥

સ દેવ ઈશ્વરઃ સર્વં વસ્ત્વર્હતિ ન સંશયઃ ।
યજ્ઞાવશિષ્ટં કિમુત પરે તસ્યેચ્છયા વિભોઃ ॥ ૩૬॥

અનુગ્રહાર્થમાયાતસ્તવ તદ્રૂપતઃ પ્રભુઃ ।
તત્ર ત્વં ગચ્છ નભગ પ્રસન્નં કુરુ સત્યતઃ ॥ ૩૭॥

ક્ષમાપય સ્વાપરાધં સુપ્રણમ્ય સ્તુતિં કુરુ ।
સર્વપ્રભુઃ સ એવેશો યજ્ઞાધીશોઽખિલેશ્વરઃ ॥ ૩૮॥

વિષ્ણુબ્રહ્માદયો દેવાઃ સિદ્ધાઃ સર્વર્ષયોઽપિ હિ ।
તદનુગ્રહતસ્તાત સમર્થાઃ સર્વકર્મણિ ॥ ૩૯॥

કિમ્બહૂક્ત્યાત્મજશ્રેષ્ઠ ગચ્છ તત્રાશુ માચિરમ્ ।
પ્રસાદય મહાદેવં સર્વથા સકલેશ્વરમ્ ॥ ૪૦॥

નન્દીશ્વર ઉવાચ ।

ઇત્યુક્ત્વા સ મનુઃ શ્રાદ્ધદેવશ્ચ તનયં દ્રુતમ્ ।
પ્રેષયામાસ નિકટં શમ્ભોઃ સોઽપિ સમેત્ય તમ્ ॥ ૪૧॥

નભગશ્ચ પ્રણમ્યાશુ સાઞ્જલિર્નતમસ્તકઃ ।
પ્રોવાચ સુપ્રસન્નાત્મા વિનયેન મહામતિઃ ॥ ૪૨॥

નભગ ઉવાચ ।
ઇદં તવેશ સર્વં હિ વસ્તુ ત્રિભુવને હિ યત્ ।
ઇત્યાહ મે પિતા નૂનં કિમુતાધ્વરશેષિતમ્ ॥ ૪૩॥

અજાનતા મયા નાથ યદુક્તં તદ્વચો ભ્રમાત્ ।
અપરાધં ત્વં ક્ષમસ્વ શિરસા ત્વાં પ્રસાદયે ॥ ૪૪॥

ઇત્યુક્ત્વા નભગઃ સોઽતિદીનધીસ્તુ કૃતાઞ્જલિઃ ।
તુષ્ટાવ તં મહેશાનં કૃષ્ણદર્શનમાનતઃ ॥ ૪૫॥

શ્રાદ્ધદેવોઽપિ શુદ્ધાત્મા નતકઃ સાઞ્જલિઃ સુધીઃ ।
તુષ્ટાવ તં પ્રભું નત્વા સ્વાપરાધં ક્ષમાપયન્ ॥ ૪૬॥

એતસ્મિન્નન્તરે તત્ર વિષ્ણુબ્રહ્માદયઃ સુરાઃ ।
વાસવાદ્યાઃ સમાજગ્મુઃ સિદ્ધાશ્ચ મુનયોઽપિ હિ ॥ ૪૭॥

મહોત્સવં પ્રકુર્વન્તઃ સુકૃતાઞ્જલયોઽખિલાઃ ।
તુષ્ટુવુર્નતકા ભક્ત્યા સુપ્રણમ્ય પૃથક્પૃથક્ ॥ ૪૮॥

અથ રુદ્રઃ પ્રસન્નાત્મા કૃપાદૃષ્ટ્યા વિલોક્ય તાન્ ।
ઉવાચ નભગં પ્રીત્યા સસ્મિતં કૃષ્ણદર્શનઃ ॥ ૪૯॥

કૃષ્ણદર્શન ઉવાચ ।
યત્તે પિતાવદદ્ધર્મ્યં વાક્યં તત્તુ તથૈવ હિ ।
ત્વયાપિ સત્યમુક્તં તત્ સાધુસ્ત્વં નાત્ર સંશયઃ ॥ ૫૦॥

અતોઽહં સુપ્રસન્નોઽસ્મિ સર્વથા સુવ્રતેન તે ।
દદામિ કૃપયા તે હિ જ્ઞાનં બ્રહ્મ સનાતનમ્ ॥ ૫૧॥

મહાજ્ઞાની ભવ ત્વં હિ સવિપ્રો નભગં દ્રુતમ્ ।
ગૃહાણ વસ્ત્વિદં સર્વં મદ્દત્તં કૃપયાધુના ॥ ૫૨॥

ઇહ સર્વસુખં ભુઙ્ક્ષ્વ નિર્વિકારં મહામતે ।
સુગતિં પ્રાપ્સ્યસિ ત્વં હિ સવિપ્રઃ કૃપયા મમ ॥ ૫૩॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા તાત ભગવાન્સ રુદ્રઃ સત્યવત્સલઃ ।
સર્વેષાં પશ્યતાં તેષાં તત્રૈવાન્તર્દધે હરઃ ॥ ૫૪॥

વિષ્ણુર્બ્રહ્માપિ દેવાદ્યાઃ સર્વે તે મુનિસત્તમ ।
સ્વં સ્વં ધામ યયુઃ પ્રીત્યા તસ્મૈ નત્વા દિશે મુદા ॥ ૫૫॥

સપુત્રઃ શ્રાદ્ધદેવોઽપિ સ્વસ્થાનમગમન્મુદા ।
ભુક્ત્વા ભોગાન્સુવિપુલાન્સોઽન્તે શિવપુરં યયૌ ॥ ૫૬॥

ઇત્થં તે કીર્તિતો બ્રહ્મન્નવતારઃ શિવસ્ય હિ ।
કૃષ્ણદર્શનનામા વૈ નભગાનન્દદાયકઃ ॥ ૫૭॥

ઇદમાખ્યાનમનઘં ભુક્તિમુક્તિપ્રદં સતામ્ ।
પઠતાં શ઼ૃણ્વતાં વાપિ સર્વકામફલપ્રદમ્ ॥ ૫૮॥

ય એતચ્ચરિતં પ્રાતઃ સાયં ચ સ્મરતે સુધીઃ ।
કવિર્ભવતિ મન્ત્રજ્ઞો ગતિમન્તે લભેત્પરામ્ ॥ ૫૯॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં નન્દીશ્વરસનત્કુમારસંવાદે કૃષ્ણદર્શનશિવાવતારવર્ણનં નામૈકોનત્રિંશોઽધ્યાયઃ ॥ ૩.૨૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૩૦. ત્રિંશોઽધ્યાયઃ । અવધૂતેશ્વરશિવાવતારચરિત્રવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
શ઼ૃણુ ત્વં બ્રહ્મપુત્રાદ્યાવતારં પરમેશિતુઃ ।
અવધૂતેશ્વરાહ્વં વૈ શક્રગર્વાપહારકમ્ ॥ ૧॥

શક્રઃ પુરા હિ સગુરુઃ સર્વદેવસમન્વિતઃ ।
દર્શનં કર્તુમીશસ્ય કૈલાસમગમન્મુને ॥ ૨॥

અથ ગુર્વિન્દ્રયોર્જ્ઞાત્વાગમનં શઙ્કરસ્તયોઃ ।
પરીક્ષિતું ચ તદ્ભાવં સ્વદર્શનરતાત્મનોઃ ॥ ૩॥

અવધૂતસ્વરૂપોઽભૂન્નાનાલીલાકરઃ પ્રભુઃ ।
દિગમ્બરો મહાભીમો જ્વલદગ્નિસમપ્રભઃ ॥ ૪॥

સોઽવધૂતસ્વરૂપો હિ માર્ગમારુધ્ય સદ્ગતિઃ ।
લમ્બમાનપટઃ શમ્ભુરતિષ્ઠચ્છોભિતાકૃતિઃ ॥ ૫॥

અથ તૌ ગુરુશક્રૌ ચ ગચ્છન્તૌ શિવ સન્નિધિમ્ ।
અદ્રાષ્ટાં પુરુષં ભીમં માર્ગમધ્યેઽદ્ભુતાકૃતિમ્ ॥ ૬॥

અથ શક્રો મુનેઽપૃચ્છત્સ્વાધિકારેણ દુર્મદઃ ।
પુરુષં તં સ્વમાર્ગાન્તઃ સ્થિતમજ્ઞાય શઙ્કરમ્ ॥ ૭॥

શક્ર ઉવાચ ।
કસ્ત્વં દિગમ્બરાકારાવધૂતઃ કુત આગતઃ ।
કિન્નામ તવ વિખ્યાતં તત્ત્વતો વદ મેઽચિરમ્ ॥ ૮॥

સ્વસ્થાને સંસ્થિતઃ શમ્ભુઃ કિં વાન્યત્ર ગતોઽધુના ।
દર્શનાર્થં હિ તસ્યાહં ગચ્છામિ સગુરુઃ સુરૈઃ ॥ ૯॥

નન્દીશ્વર ઉવાચ ।
શક્રેણેત્થં સ પૃષ્ટશ્ચ કિઞ્ચિન્નોવાચ પૂરુષઃ ।
લીલાગૃહીતદેહઃ સ શઙ્કરો મદહા પ્રભુઃ ॥ ૧૦॥

શક્રઃ પુનરપૃચ્છત્તં નોવાચ સ દિગમ્બરઃ ।
અવિજ્ઞાતગતિઃ શમ્ભુર્મહાકૌતુકકારકઃ ॥ ૧૧॥

પુનઃ પુરન્દરોઽપૃચ્છ્ત્ ત્રૈલોક્યાધિપતિઃ સ્વરાટ્ ।
તૂષ્ણીમાસ મહાયોગી મહાલીલાકરઃ સ વૈ ॥ ૧૨॥

ઇત્થં પુનઃ પુનઃ પૃષ્ટઃ શક્રેણ સ દિગમ્બરઃ ।
નોવાચ કિઞ્ચિદ્ભગવાન્ શક્રદર્પજિઘાંસયા ॥ ૧૩॥

અથ ચુક્રોધ દેવેશસ્ત્રૈલોક્યૈશ્વર્યગર્વિતઃ ।
ઉવાચ વચનં ક્રોધાત્તં નિર્ભર્ત્સ્ય જટાધરમ્ ॥ ૧૪॥

ઇન્દ્ર ઉવાચ ।
પૃચ્છમાનોઽપિ રે મૂઢ નોત્તરં દત્તવાનસિ ।
અતસ્ત્વાં હન્મિ વજ્રેણ કસ્તે ત્રાતાસ્તિ દુર્મતે ॥ ૧૫॥

ઇત્યુદીર્ય તતો વજ્રી સન્નિરીક્ષ્ય ક્રુધા હિ તમ્ ।

હન્તું દિગમ્બરં વજ્રમુદ્યતં સ ચકાર હ ॥ ૧૬॥

વજ્રહસ્તં ચ તં દૃષ્ટ્વા શક્રં શીઘ્રં સદાશિવઃ ।
ચકાર સ્તમ્ભનં તસ્ય વજ્રપાતસ્ય શઙ્કરઃ ॥ ૧૭॥

તતઃ સ પુરુષઃ ક્રુદ્ધઃ કરાલાક્ષો ભયઙ્કરઃ ।
દ્રુતમેવ પ્રજજ્વાલ તેજસા પ્રદહન્નિવ ॥ ૧૮॥

બાહુપ્રતિષ્ટમ્ભભુવા મન્યુનાન્તઃ શચીપતિઃ ।
સમદહ્યત ભોગીવ મન્ત્રરુદ્ધપરાક્રમઃ ॥ ૧૯॥

દૃષ્ટ્વા બૃહસ્પતિસ્ત્વેનં પ્રજ્વલન્તં સ્વતેજસા ।
પુરુષં તં ધિયામાસ પ્રણનામ હરં દ્રુતમ્ ॥ ૨૦॥

કૃતાઞ્જલિપુટો ભૂત્વા તતો ગુરુરુદારધીઃ ।
દણ્ડવત્કૌ પુનર્નત્વા પ્રભું તુષ્ટાવ ભક્તિતઃ ॥ ૨૧॥

ગુરુરુવાચ ।
દેવદેવ મહાદેવ શરણાગતવત્સલ ।
પ્રસન્નો ભવ ગૌરીશ સર્વેશ્વર નમોઽસ્તુ તે ॥ ૨૨॥

માયયા મોહિતાઃ સર્વે બ્રહ્મવિષ્ણ્વાદયોઽપિ તે ।
ત્વાં ન જાનન્તિ તત્ત્વેન જાનન્તિ ત્વદનુગ્રહાત્ ॥ ૨૩॥

નન્દીશ્વર ઉવાચ ।
બૃહસ્પતિરિતિ સ્તુત્વા સ તદા શઙ્કરં પ્રભુમ્ ।
પાદયોઃ પાતયામાસ તસ્યેશસ્ય પુરન્દરમ્ ॥ ૨૪॥

તતસ્તાત સુરાચાર્યઃ કૃતાઞ્જલિરુદારધીઃ ।
બૃહસ્પતિરુવાચેદં પ્રશ્રયાવનતઃ સુધીઃ ॥ ૨૫॥

બૃહસ્પતિરુવાચ ।
દીનાનાથ મહાદેવ પ્રણતં તવ પાદયોઃ ।
સમુદ્ધર ચ માં તત્ત્વં ક્રોધં ન પ્રણયં કુરુ ॥ ૨૬॥

તુષ્ટો ભવ મહાદેવ પાહીન્દ્રં શરણાગતમ્ ।
વહ્નિરેષ સમાયાતિ ભાલનેત્રસમુદ્ભવઃ ॥ ૨૭॥

નન્દીશ્વર ઉવાચ ।
ઇત્યાકર્ણ્ય ગુરોર્વાક્યમવધૂતાકૃતિઃ પ્રભુઃ ।

ઉવાચ કરુણાસિન્ધુર્વિહસન્ સ સદૂતિકૃત્ ॥ ૨૮॥

અવધૂત ઉવાચ ।
ક્રોધાચ્ચ નિસ્સૃતં તેજો ધારયામિ સ્વનેત્રતઃ ।
કથં હિ કઞ્ચુકીં સર્પઃ સન્ધત્તે ચોજ્ઝિતાં પુનઃ ॥ ૨૯॥

નન્દીશ્વર ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય શઙ્કરસ્ય બૃહસ્પતિઃ ।
ઉવાચ સાઞ્જલિર્ભૂયો ભયવ્યાકુલમાનસઃ ॥ ૩૦॥

બૃહસ્પતિરુવાચ ।
હે દેવ ભગવન્ભક્તા અનુકમ્પ્યાઃ સદૈવ હિ ।
ભક્તવત્સલનામેતિ સ્વં સત્યં કુરુ શઙ્કર ॥ ૩૧॥

ક્ષેમુમન્યત્ર દેવેશ સ્વતેજોઽત્યુગ્રમર્હસિ ।
ઉદ્ધર્તા સર્વભક્તાનાં સમુદ્ધર પુરન્દરમ્ ॥ ૩૨॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તો ગુરુણા રુદ્રો ભક્તવત્સલનામભાક્ ।
પ્રત્યુવાચ પ્રસન્નાત્મા સુરેજ્યં પ્રણતાર્તિહા ॥ ૩૩॥

રુદ્ર ઉવાચ ।
પ્રીતસ્તેઽહં સુરાચાર્ય દદામિ વરમુત્તમમ્ ।
ઇન્દ્રસ્ય જીવદાનેન જીવેતિ ત્વં પ્રથાં વ્રજ ॥ ૩૪॥

સમુદ્ભૂતોઽનલો યોઽયં ભાલનેત્રાત્સુરાસહઃ ।
એનં ત્યક્ષ્યામ્યહં દૂરે યથેન્દ્રં નૈવ પીડયેત્ ॥ ૩૫॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા સ કરે ધૃત્વા સ્વતેજોઽનલમદ્ભુતમ્ ।
ભાલનેત્રસમુદ્ભૂતં પ્રાક્ષિપલ્લવણામ્ભસિ ॥ ૩૬॥

અથો શિવસ્ય તત્તેજો ભાલનેત્રસમુદ્ભવમ્ ।
ક્ષિપ્તં ચ લવણામ્ભોધૌ સદ્યો બાલો બભૂવ હ ॥ ૩૭॥

સ જલન્ધરનામાભૂત્સિન્ધુપુત્રોઽસુરેશ્વરઃ ।
તં જઘાન મહેશાનો દેવપ્રાર્થનયા પ્રભુઃ ॥ ૩૮॥

ઇત્થં કૃત્વા સુચરિતં શઙ્કરો લોકશઙ્કરઃ ।

અવધૂતસ્વરૂપેણ તતશ્ચાન્તર્હિતોઽભવત્ ॥ ૩૯॥

બભૂવુઃ સકલા દેવાઃ સુખિનશ્ચાતિનિર્ભયાઃ ।
ગુરુશક્રૌ ભયાન્મુક્તૌ જગ્મતુઃ સુખમુત્તમમ્ ॥ ૪૦॥

યદર્થે ગમનોદ્યુક્તૌ દર્શનં પ્રાપ્ય તસ્ય તૌ ।
કૃતાર્થૌ ગુરુશક્રૌ હિ સ્વસ્થાનં જગ્મતુર્મુદા ॥ ૪૧॥

અવધૂતેશ્વરાહ્વોઽવતારસ્તે કથિતો મયા ।
પરમેશસ્ય પરમાનન્દદઃ ખલદણ્ડદઃ ॥ ૪૨॥

ઇદમાખ્યાનમનઘં યશસ્યં સ્વર્ગ્યમેવ ચ ।
ભુક્તિમુક્તિપ્રદં દિવ્યં સર્વકામફલપ્રદમ્ ॥ ૪૩॥

ય ઇદં શૃણુયાન્નિત્યં શ્રાવયેદ્વા સમાહિતઃ ।
ઇહ સર્વસુખં ભુક્ત્વા સોઽન્તે શિવગતિં લભેત્ ॥ ૪૪॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં નન્દીશ્વરસનત્કુમારસંવાદે અવધૂતેશ્વરશિવાવતારચરિત્રવર્ણનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૩.૩૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૩૧. એકત્રિંશોઽધ્યાયઃ । ભિક્ષુવર્યાહ્વશિવાવતાર ચરિત્રવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
અથ વક્ષ્યે મુનિશ્રેષ્ઠ શમ્ભોઃ શૃણ્વવતારકમ્ ।
સ્વભક્તદયયા વિપ્ર નારીસન્દેહભઞ્જકમ્ ॥ ૧॥

આસીત્સત્યરથો નામ્ના વિદર્ભવિષયે નૃપઃ ।
ધર્માત્મા સત્યશીલશ્ચ મહાશૈવજનપ્રિયઃ ॥ ૨॥

તસ્ય રાજ્ઞઃ સુધર્મેણ મહીં પાલયતો મુને ।
મહાન્કાલો વ્યતીયાય સુખેન શિવધર્મતઃ ॥ ૩॥

કદાચિત્તસ્ય રાજ્ઞસ્તુ શાલ્વૈશ્ચ પુરરોધિભિઃ ।
મહાન્ રણો બભૂવાથ બહુસૈન્યૈર્બલોદ્ધતૈઃ ॥ ૪॥

સ વિદર્ભનૃપઃ કૃત્વા સાર્ધં તૈર્દારુણં રણમ્ ।
પ્રનષ્ટોરુબલઃ શાલ્વૈર્નિહતો દૈવયોગતઃ ॥ ૫॥

તસ્મિન્નૃપે હતે યુદ્ધે શાલ્વૈસ્તુ ભયવિહ્વલાઃ ।
સૈનિકા હતશેષાશ્ચ મન્ત્રિભિઃ સહ દુદ્રુવુઃ ॥ ૬॥

અથ તસ્ય મહારાજ્ઞી રાત્રૌ સ્વપુરતો મુને ।
સંરુદ્ધા રિપુભિર્યત્નાદન્તર્વત્ની બહિર્યયૌ ॥ ૭॥

નિર્ગતા શોકસન્તપ્તા સા રાજમહિષી શનૈઃ ।
પ્રાચીં દિશં યયૌ દૂરં સ્મરન્તીશપદામ્બુજમ્ ॥ ૮॥

અથ પ્રભાતે સા રાજ્ઞી દદર્શ વિમલં સરઃ ।
અતીતા દૂરમધ્વાનં દયયા શઙ્કરસ્ય હિ ॥ ૯॥

તત્રાગત્ય પ્રિયા રાજ્ઞઃ સન્તપ્તા સુકુમારિણી ।
નિવાસાર્થં સરસ્તીરે છાયાવૃક્ષમુપાશ્રયત્ ॥ ૧૦॥

તત્ર દૈવવશાદ્રાજ્ઞી મુહૂર્ત્તે સદ્ગુણાન્વિતે ।
અસૂત તનયં દિવ્યં સર્વલક્ષણલક્ષિતમ્ ॥ ૧૧॥

અથ તજ્જનની દૈવાત્તૃષિતાતિ નૃપાઙ્ગના ।
સરોઽવતીર્ણા પાનાર્થં ગ્રસ્તા ગ્રાહેણ પાથસિ ॥ ૧૨॥

સ સુતો જાતમાત્રસ્તુ ક્ષુત્પિપાસાર્દિતો ભૃશમ્ ।
રુરોદ ચ સરસ્તીરે વિનષ્ટપિતૃમાતૃકઃ ॥ ૧૩॥

તસ્મિન્વને ક્રન્દમાને જાતમાત્રે સુતે મુને ।
કૃપાન્વિતો મહેશોઽભૂદન્તર્યામી સ રક્ષકઃ ॥ ૧૪॥

પ્રેરિતા મનસા કાચિદીશેન ત્રાસહારિણા ।
અકસ્માદાગતા તત્ર ભ્રમન્તી ભૈક્ષ્યજીવિની ॥ ૧૫॥

સા ત્વેકહાયનં બાલં વહન્તી વિધવા નિજમ્ ।
અનાથમેકં ક્રન્દન્તં શિશું તત્ર દદર્શ હ ॥ ૧૬॥

સા દૃષ્ટ્વા તત્ર તં બાલં વને નિર્મનુજે મુને ।
વિસ્મિતાતિ દ્વિજસ્ત્રી સા ચિચિન્ત હૃદયે બહુ ॥ ૧૭॥

અહો સુમહદાશ્ચર્યમિદં દૃષ્ટં મયાધુના ।
અસમ્ભાવ્યમકથ્યં ચ સર્વથા મનસા ગિરા ॥ ૧૮॥

અચ્છિન્નનાભિનાલોઽયં રસાયાં કેવલં શિશુઃ ।
શેતે માતૃવિહીનશ્ચ ક્રન્દંસ્તેજસ્વિનાં વરઃ ॥ ૧૯॥

અસ્ય પિત્રાદયઃ કેઽપિ ન સન્તીહ સહાયિનઃ ।
કારણં કિં બભૂવાથ હ્યહો દૈવબલં મહત્ ॥ ૨૦॥

ન જાને કસ્ય પુત્રોઽયમસ્ય જ્ઞાતાત્ર કોઽપિ ન ।
યતઃ પૃચ્છામ્યસ્ય જન્મ જાતા ચ કરુણા મયિ ॥ ૨૧॥

ઇચ્છામ્યેનં પોષિતું હિ બાલમૌરસપુત્રવત્ ।
સંસ્પ્રષ્ટું નોત્સહેઽજ્ઞાત્વા કુલજન્માદિ ચાસ્ય વૈ ॥ ૨૨॥

નન્દીશ્વર ઉવાચ ।
ઇતિ સઞ્ચિન્ત્યમાનાયાં તસ્યાં વિપ્રવરસ્ત્રિયામ્ ।
કૃપાં ચકાર મહતીં શઙ્કરો ભક્તવત્સલઃ ॥ ૨૩॥

દધ્રે ભિક્ષુસ્વરૂપં હિ મહાલીલો મહેશ્વરઃ ।
સર્વથા ભક્તસુખદો નિરુપાધિઃ સ્વયં સદા ॥ ૨૪॥

તત્રાજગામ સહસા સ ભિક્ષુઃ પરમેશ્વરઃ ।
યત્રાસ્તિ સન્દેહવતી દ્વિજસ્ત્રી જ્ઞાતુમિચ્છતી ॥ ૨૫॥

ભિક્ષુવર્યસ્વરૂપોઽસાવવિજ્ઞાતગતિઃ પ્રભુઃ ।
તામાહ વિપ્રવનિતાં વિહસ્ય કરુણાનિધિઃ ॥ ૨૬॥

ભિક્ષુવર્ય ઉવાચ ।
સન્દેહં કુરુ નો ચિત્તે વિપ્રભામિનિ મા ખિદ ।
રક્ષૈનં બાલકં પ્રીત્યા સુપવિત્રં સ્વપુત્રકમ્ ॥ ૨૭॥

અનેન શિશુના શ્રેયઃ પ્રાપ્સ્યસે ન ચિરાત્પરમ્ ।
પુષ્ણીહિ સર્વથા હ્યેનં મહાતેજસ્વિનં શિશુમ્ ॥ ૨૮॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તવન્તં તં ભિક્ષુસ્વરૂપં કરુણાનિધિમ્ ।
સા વિપ્રવનિતા શમ્ભું પ્રીત્યા પપ્રચ્છ સાદરમ્ ॥ ૨૯॥

વિપ્રવનિતોવાચ ।
ત્વદાજ્ઞયૈનં બાલં હિ રક્ષિષ્યામિ સ્વપુત્રવત્ ।

પોક્ષ્યામિ નાત્ર સન્દેહો મદ્ભાગ્યાત્ત્વમિહાગતઃ ॥ ૩૦॥

તથાપિ જ્ઞાતુમિચ્છામિ વિશેષેણ તુ તત્ત્વતઃ ।
કોઽયં કસ્ય સુતશ્ચાયં કસ્ત્વમત્ર સમાગતઃ ॥ ૩૧॥

મુહુર્મમ સમાયાતિ જ્ઞાનં ભિક્ષુવર પ્રભો ।
ત્વં શિવઃ કરુણાસિન્ધુસ્ત્વદ્ભક્તોઽયં શિશુઃ પુરા ॥ ૩૨॥

કેનચિત્કર્મદોષેણ સમ્પ્રાપ્તોઽયં દશામિમામ્ ।
તદ્ભુક્ત્વા પરમં શ્રેયઃ પ્રાપ્સ્યતે ત્વદનુગ્રહાત્ ॥ ૩૩॥

ત્વન્માયયૈવ સાહં વૈ માર્ગભ્રષ્ટા વિમોહિતા ।
આગતા પ્રેષિતા ત્વત્તો હ્યસ્ય રક્ષણહેતુતઃ ॥ ૩૪॥

નન્દીશ્વર ઉવાચ ।
ઇતિ તદ્દર્શનપ્રાપ્તવિજ્ઞાનાં વિપ્રકામિનીમ્ ।
જ્ઞાતુકામાં વિશેષેણ પ્રોચે ભિક્ષુતનુઃ શિવઃ ॥ ૩૫॥

ભિક્ષુવર્ય ઉવાચ ।
શ‍ૃણુ પ્રીત્યા વિપ્રપત્નિ બાલસ્યાસ્ય પુરેહિતમ્ ।
સર્વમન્યસ્ય સુપ્રીત્યા વક્ષ્યતે તત્ત્વતોઽનઘે ॥ ૩૬॥

સુતો વિદર્ભરાજસ્ય શિવભક્તસ્ય ધીમતઃ ।
અયં સત્યરથસ્યૈવ સ્વધર્મનિરતસ્ય હિ ॥ ૩૭॥

શ‍ૃણુ સત્યરથો રાજા હતઃ શાલ્વે રણે પરૈઃ ।
તત્પત્ની નિશિ સુવ્યગ્રા નિર્યયૌ સ્વગૃહાદ્ દ્રુતમ્ ॥ ૩૮॥

અસૂત તનયં ચૈનં સમાયાતા પ્રગેઽત્ર હિ ।
સરોઽવતીર્ણા તૃષયા ગ્રસ્તા ગ્રાહેણ દૈવતઃ ॥ ૩૯॥

નન્દીશ્વર ઉવાચ ।
ઇતિ તસ્ય સમુત્પત્તિં તત્પિતુઃ સઙ્ગરે મૃતિમ્ ।
તન્માતૃમરણં ગ્રાહાત્સર્વં તસ્યૈ ન્યવેદયત્ ॥ ૪૦॥

અથ સા બ્રાહ્મણી ચૈવ વિસ્મિતાતિ મુનીશ્વર ।
પુનઃ પપ્રચ્છ તં ભિક્ષું જ્ઞાનિનં સિદ્ધરૂપકમ્ ॥ ૪૧॥

બ્રાહ્મણ્યુવાચ ।
સ રાજોઽસ્ય પિતા ભિક્ષો વરભોગાન્તરૈવ હિ ।

કસ્માચ્છાલ્વૈઃ સ્વરિપુભિઃ સ્વલ્પેહૈશ્ચ વિઘાતિતઃ ॥ ૪૨॥

કસ્માદસ્ય શિશોર્માતા ગ્રાહેણાશુ સુભક્ષિતા ।
યસ્માદનાથોઽયં જાતો વિબન્ધુશ્ચૈવ જન્મતઃ ॥ ૪૩॥

કસ્માત્સુતો મમાપીહ સુદરિદ્રો હિ ભિક્ષુકઃ ।
ભવેત્કથં સુખં ભિક્ષો પુત્રયોરનયોર્વદ ॥ ૪૪॥

નન્દીશ્વર ઉવાચ ।
ઇતિ તસ્યા વચઃ શ્રુત્વા સ ભિક્ષુઃ પરમેશ્વરઃ ।
વિપ્રપત્ન્યાઃ પ્રસન્નાત્મા પ્રોવાચ વિહસઁશ્ચ તામ્ ॥ ૪૫॥

ભિક્ષુવર્ય ઉવાચ ।
વિપ્રપત્નિ વિશેષેણ સર્વપ્રશ્નાન્વદામિ તે ।
શ ૃણુ ત્વં સાવધાનેન ચરિત્રમિદમુત્તમમ્ ॥ ૪૬॥

અમુષ્ય બાલસ્ય પિતા સ વિદર્ભમહીપતિઃ ।
પૂર્વજન્મનિ પાણ્ડ્યોઽસૌ બભૂવ નૃપસત્તમઃ ॥ ૪૭॥

સ શૈવનૃપતિર્ધર્માત્પાલયન્નિખિલાં મહીમ્ ।
સ્વપ્રજાં રઞ્જયામાસ સર્વોપદ્રવનાશનઃ ॥ ૪૮॥

કદાચિત્સ હિ સર્વેશં પ્રદોષે પર્યપૂજયત્ ।
ત્રયોદશ્યાં નિરાહારો દિવાનક્તવ્રતી શિવમ્ ॥ ૪૯॥

તસ્ય પૂજયતઃ શમ્ભું પ્રદોષે ગિરિશં રતે ।
મહાન્ શબ્દો બભૂવાથ વિકટઃ સર્વથા પુરે ॥ ૫૦॥

તમાકર્ણ્ય રવં સોઽથ રાજા ત્યક્તશિવાર્ચનઃ ।
રિપ્વાગમનશઙ્કાતો નિર્યયૌ ભવનાદ્ બહિઃ ॥ ૫૧॥

એતસ્મિન્નેવ કાલે તુ તસ્યામાત્યો મહાબલી ।
ગૃહીતશત્રુસામન્તો રાજાન્તિકમુપાયયૌ ॥ ૫૨॥

તં દૃષ્ટ્વા શત્રુસામન્તં મહાક્રોધેન વિહ્વલઃ ।
અવિચાર્ય વૃષન્તસ્ય શિરશ્છેદમકારયત્ ॥ ૫૩॥

અસમાપ્યેશપૂજાં તામશુચિર્નષ્ટધીર્નૃપઃ ।
રાત્રૌ ચકાર સુપ્રીત્યા ભોજનં નષ્ટમઙ્ગલઃ ॥ ૫૪॥

વિદર્ભે સોઽભવદ્રાજા જન્મનીહ શિવવ્રતી ।

શિવાર્ચનાન્તરાયેણ પરૈર્ભોગાન્તરે હતઃ ॥ ૫૫॥

તત્પિતા યઃ પૂર્વભવે સોઽસ્મિઞ્જન્મનિ તત્સુતઃ ।
અયમેવ હતૈશ્વર્યઃ શિવપૂજાવ્યતિક્રમાત્ ॥ ૫૬॥

અસ્ય માતા પૂર્વભવે સપત્નીં છદ્મનાહરત્ ।
ભક્ષિતા તેન પાપેન ગ્રાહેણાસ્મિન્ ભવે હિ સા ॥ ૫૭॥

એષા પ્રવૃત્તિરેતેષાં ભવત્યૈ પરિકીર્તિતા ।
અનર્ચિતશિવા ભક્ત્યા પ્રાપ્નુવન્તિ દરિદ્રતામ્ ॥ ૫૮॥

એષ તે તનયઃ પૂર્વજન્મનિ બ્રાહ્મણોત્તમઃ ।
પ્રતિગ્રહૈર્વયો નિન્યે ન યજ્ઞાદ્યૈઃ સુકર્મભિઃ ॥ ૫૯॥

અતો દારિદ્ર્યમાપન્નઃ પુત્રસ્તે દ્વિજભામિનિ ।
તદ્દોષપરિહારાર્થં શરણં શઙ્કરં વ્રજ ॥ ૬૦॥

એતાભ્યાં ખલુ બાલાભ્યાં શિવપૂજા વિધીયતામ્ ।
ઉપવીતાનન્તરં હિ શિવઃ શ્રેયઃ કરિષ્યતિ ॥ ૬૧॥

નન્દીશ્વર ઉવાચ ।
ઇતિ તામુપદિશ્યાથ ભિક્ષુવર્યતનુઃ શિવઃ ।
સ્વરૂપં દર્શયામાસ પરમં ભક્તવત્સલઃ ॥ ૬૨॥

અથ સા વિપ્રવનિતા જ્ઞાત્વા તં શઙ્કરં પ્રભુમ્ ।
સુપ્રણમ્ય હિ તુષ્ટાવ પ્રેમ્ણા ગદ્ગદયા ગિરા ॥ ૬૩॥

તતઃ સ ભગવાન્ શમ્ભુર્ધૃતભિક્ષુતનુર્દ્રુતમ્ ।
પશ્યન્ત્યા વિપ્રપન્ત્યાસ્તુ તત્રૈવાન્તરધીયત ॥ ૬૪॥

અથ તસ્મિન્ ગતે ભિક્ષૌ વિશ્રબ્ધા બ્રાહ્મણી ચ સા ।
તમર્ભકં સમાદાય સસ્વપુત્રા ગૃહં યયૌ ॥ ૬૫॥

એકચક્રાહ્વયે રમ્યે ગ્રામ્યે કૃતનિકેતના ।
સ્વપુત્રં રાજપુત્રં ચ વરાન્નૈશ્ચ વ્યવર્ધયત્ ॥ ૬૬॥

બ્રાહ્મણૈઃ કૃતસંસ્કારૌ કૃતોપનયનૌ ચ તૌ ।
વવૃધાતે સ્વગેહે ચ શિવપૂજનતત્પરૌ ॥ ૬૭॥

તૌ શાણ્ડિલ્યમુનેસ્તાત નિદેશાન્નિયમસ્થિતૌ ।
પ્રદોષે ચક્રતુઃ શમ્ભોઃ પૂજાં કૃત્વા વ્રતં શુભમ્ ॥ ૬૮॥

કદાચિદ્ દ્વિજપુત્રેણ વિનાસૌ રાજનન્દનઃ ।
નદ્યાં સ્નાતું ગતઃ પ્રાપ નિધાનકલશં વરમ્ ॥ ૬૯॥

એવં પૂજયતોઃ શમ્ભું રાજદ્વિજકુમારયોઃ ।
સુખેનૈવ વ્યતીયાય તયોર્માસચતુષ્ટયમ્ ॥ ૭૦॥

એવમર્ચયતોઃ શમ્ભું ભૂયોઽપિ પરયા મુદા ।
સમ્વત્સરો વ્યતીયાય તસ્મિન્નેવ તયોર્ગૃહે ॥ ૭૧॥

સમ્વત્સરે વ્યતિક્રાન્તે સ રાજતનયો મુને ।
ગત્વા વનાન્તે વિપ્રેણ શિવસ્યાનુગ્રહાદ્વિભોઃ ॥ ૭૨॥

અકસ્માદાગતાં તત્ર દત્તાં તજ્જનકેન હ ।
વિવાહ્ય ગન્ધર્વસુતાં ચક્રે રાજ્યમકણ્ટકમ્ ॥ ૭૩॥

યા વિપ્રવનિતા પૂર્વં તમપુષ્ણાત્સ્વપુત્રવત્ ।
સૈવ માતાભવત્તસ્ય સ ભ્રાતા દ્વિજનન્દનઃ ॥ ૭૪॥

ઇત્થમારાધ્ય દેવેશં ધર્મગુપ્તાહ્વયઃ સ વૈ ।
વિદર્ભવિષયે રાજ્ઞ્યા તયા ભોગં ચકાર હ ॥ ૭૪॥

ભિક્ષુવર્યાવતારસ્તે વર્ણિતશ્ચ મયાધુના ।
શિવસ્ય ધર્મગુપ્તાહ્વનૃપબાલસુખપ્રદઃ ॥ ૭૬॥

એતદાખ્યાનમનઘં પવિત્રં પાવનં મહત્ ।
ધર્માર્થકામમોક્ષાણાં સાધનં સર્વકામદમ્ ॥ ૭૭॥

ય એતચ્છૃણુયાન્નિત્યં શ્રાવયેદ્વા સમાહિતઃ ।
સ ભુક્ત્વેહાખિલાન્કામાન્ સોઽન્તે શિવપુરં વ્રજેત્ ॥ ૭૮॥

ઇતિ શ્રી શિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં ભિક્ષુવર્યાહ્વશિવાવતાર ચરિત્રવર્ણનં નામૈકત્રિંશોઽધ્યાયઃ ॥ ૩.૩૧॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૩૨. દ્વાત્રિંશોઽધ્યાયઃ । નન્દીશ્વર ઉવાચ ।

શ‍ૃણુ તાત પ્રવક્ષ્યામિ શિવસ્ય પરમાત્મનઃ ।
સુરેશ્વરાવતારસ્તે ધૌમ્યાગ્રજહિતાવહમ્ ॥ ૧॥

વ્યાઘ્રપાદસુતો ધીમાનુપમન્યુઃ સતાં પ્રિયઃ ।
જન્માન્તરેણ સંસિદ્ધઃ પ્રાપ્તો મુનિકુમારતામ્ ॥ ૨॥

ઉવાસ માતુલગૃહે સ માત્રા શિશુરેવ હિ ।
ઉપમન્યુર્વ્યાઘ્રપાદિઃ સ્યાદ્દરિદ્રશ્ચ દૈવતઃ ॥ ૩॥

કદાચિત્ક્ષીરમત્યલ્પં પીતવાન્માતુલાશ્રમે ।
યયાચે માતરં પ્રીત્યા બહુશો દુગ્ધલાલસઃ ॥ ૪॥

તચ્છ્રુત્વા પુત્રવચનં તન્માતા ચ તપસ્વિની ।
સાન્તઃ પ્રવિશ્યાથ તદા શુભોપાયમરીરચત્ ॥ ૫॥

ઉઞ્છવૃત્ત્યર્જિતાન્બીજાન્પિષ્ટ્વાલોડ્ય જલેન તાન્ ।
ઉપલાલ્ય સુતં તસ્મૈ સા દદૌ કૃત્રિમં પયઃ ॥ ૬॥

પીત્વા ચ કૃત્રિમં દુગ્ધં માત્રા દત્તં સ બાલકઃ ।
નૈતત્ક્ષીરમિતિ પ્રાહ માતરં ચારુદત્પુનઃ ॥ ૭॥

શ્રુત્વા સુતસ્ય રુદિતં પ્રાહ સા દુઃખિતા સુતમ્ ।
સમ્માર્જ્ય નેત્રે પુત્રસ્ય કરાભ્યાં કમલાકૃતિઃ ॥ ૮॥

માતોવાચ ।
ક્ષીરમત્ર કુતોઽસ્માકં વને નિવસતાં સદા ।
પ્રસાદેન વિના શમ્ભોઃ પયઃ પ્રાપ્તિર્ભવેન્ન હિ ॥ ૯॥

પૂર્વજન્મનિ યત્કૃત્યં શિવમુદ્દિશ્ય હે સુત ।
તદેવ લભ્યતે નૂનં નાત્ર કાર્યા વિચારણા ॥ ૧૦॥

ઇતિ માતૃવચઃ શ્રુત્વા વ્યાઘ્રપાદિઃ સ બાલકઃ ।
પ્રત્યુવાચ વિશોકાત્મા માતરં માતૃવત્સલઃ ॥ ૧૧॥

શોકેનાલમિમં માતઃ શમ્ભુર્યદ્યસ્તિ શઙ્કરઃ ।
ત્યજ શોકં મહાભાગે સર્વં ભદ્રં ભવિષ્યતિ ॥ ૧૨॥

શ‍ૃણુ માતર્વચો મેઽદ્ય મહાદેવોઽસ્તિ ચેત્ક્વચિત્ ।
ચિરાદ્વા હ્યચિરાદ્વાપિ ક્ષીરોદં સાધયામ્યહમ્ ॥ ૧૩॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા સ શિશુઃ પ્રીત્યા શિવં મેઽસ્ત્વિત્યુદીર્ય ચ ।
વિસૃજ્ય તાં સુપ્રણમ્ય તપઃ કર્તું પ્રચક્રમે ॥ ૧૪॥

હિમવત્પર્વતગતઃ વાયુભક્ષઃ સમાહિતઃ ।
અષ્ટેષ્ટકાભિઃ પ્રાસાદં કૃત્વા લિઙ્ગં ચ મૃન્મયમ્ ॥ ૧૫॥

તત્રાવાહ્ય શિવં સામ્બં ભક્ત્યા પઞ્ચાક્ષરેણ હ ।
પત્રપુષ્પાદિભિર્વન્યૈઃ સમાનર્ચ શિશુઃ સ વૈ ॥ ૧૬॥

ધ્યાત્વા શિવં ચ તં સામ્બં જપન્પઞ્ચાક્ષરં મનુમ્ ।
સમભ્યર્ચ્ય ચિરં કાલં ચચાર પરમં તપઃ ॥ ૧૭॥

તપસા તસ્ય બાલસ્ય હ્યુપમન્યોર્મહાત્મનઃ ।
ચરાચરં ચ ભુવનં પ્રદીપિતમભૂન્મુને ॥ ૧૮॥

એતસ્મિન્નન્તરે શમ્ભુર્વિષ્ણ્વાદ્યૈઃ પ્રાર્થિતઃ પ્રભુઃ ।
પરીક્ષિતું ચ તદ્ભક્તિં શક્રરૂપોઽભવત્તદા ॥ ૧૯॥

શિવા શચીસ્વરૂપાભૂદ્ગણાઃ સર્વેઽભવન્સુરાઃ ।
ઐરાવતગજો નન્દી સર્વમેવ ચ તન્મયમ્ ॥ ૨૦॥

તતઃ સામ્બઃ શિવઃ શક્રસ્વરૂપઃ સગણો દ્રુતમ્ ।
જગામાનુગ્રહં કર્તુમુપમન્યોસ્તદાશ્રમમ્ ॥ ૨૧॥

પરીક્ષિતું ચ તદ્ભક્તિં શક્રરૂપધરો હરઃ ।
પ્રાહ ગમ્ભીરયા વાચા બાલકં તં મુનીશ્વર ॥ ૨૨॥

સુરેશ્વર ઉવાચ ।
તુષ્ટોઽસ્મિ તે વરં બ્રૂહિ તપસાનેન સુવ્રત ।
દદામિ ચેપ્સિતાન્કામાન્ સર્વાન્નાત્રાસ્તિ સંશયઃ ॥ ૨૩॥

એવમુક્તઃ સ વૈ તેન શક્રરૂપેણ શમ્ભુના ।
વરયામિ શિવે ભક્તિમિત્યુવાચ કૃતાઞ્જલિઃ ॥ ૨૪॥

તન્નિશમ્ય હરિઃ પ્રાહ માં ન જાનાસિ લેખપમ્ ।
ત્રૈલોક્યાધિપતિં શક્રં સર્વદેવનમસ્કૃતમ્ ॥ ૨૫॥

મદ્ભક્તો ભવ વિપ્રર્ષે મામેવાર્ચય સર્વદા ।

દદામિ સર્વં ભદ્રં તે ત્યજ રુદ્રં ચ નિર્ગુણમ્ ॥ ૨૬॥

રુદ્રેણ નિર્ગુણેનાલં કિં તે કાર્યં ભવિષ્યતિ ।
દેવજાતિબહિર્ભૂતો યઃ પિશાચત્વમાગતઃ ॥ ૨૭॥

નન્દીશ્વર ઉવાચ ।
તચ્છ્રુત્વા સ મુનેઃ પુત્રો જપન્પઞ્ચાક્ષરં મનુમ્ ।
મન્યમાનો ધર્મવિઘ્નં પ્રાહ તં કર્તુમાગતમ્ ॥ ૨૮॥

ઉપમન્યુરુવાચ ।
ત્વયૈવં કથિતં સર્વં ભવનિન્દારતેન વૈ ।
પ્રસઙ્ગાદ્દેવદેવસ્ય નિર્ગુણત્વં પિશાચતા ॥ ૨૯॥

ત્વં ન જાનાસિ વૈ રુદ્રં સર્વદેવેશ્વરેશ્વરમ્ ।
બ્રહ્મવિષ્ણુમહેશાનાં જનકં પ્રકૃતેઃ પરમ્ ॥ ૩૦॥

સદસદ્ વયક્તમવ્યક્તં યમાહુર્બ્રહ્મવાદિનઃ ।
નિત્યમેકમનેકં ચ વરં તસ્માદ્ વૃણોમ્યહમ્ ॥ ૩૧॥

હેતુવાદવિનિર્મુક્તં સાઙ્ખ્યયોગાર્થદં પરમ્ ।
યમુશન્તિ હિ તત્ત્વજ્ઞા વરં તસ્માદ્ વૃણોમ્યહમ્ ॥ ૩૨॥

નાસ્તિ શમ્ભોઃ પરં તત્ત્વં સર્વકારણકારણત્ ।
બ્રહ્મવિષ્ણ્વાદિદેવાનાં શ્રેષ્ઠો ગુણપરાદ્વિભોઃ ॥ ૩૩॥

નાહં વૃણે વરં ત્વત્તો ન વિષ્ણોર્બ્રહ્મણોઽપિ વા ।
નાન્યસ્માદમરાદ્વાપિ શઙ્કરો વરદોઽસ્તુ મે ॥ ૩૪॥

બહુનાત્ર કિમુક્તેન વચ્મિ તત્ત્વં મતં સ્વકમ્ ।
ન પ્રાર્થયે પશુપતેરન્યં દેવાદિકં સ્ફુટમ્ ॥ ૩૫॥

મદ્ભાવં શ◌ૃણુ ગોત્રારે મયાદ્યાનુમિતં ત્વિદમ્ ।
ભવાન્તરે કૃતં પાપં શ્રુતા નિન્દા ભવસ્ય ચેત્ ॥ ૩૬॥

શ્રુત્વા નિન્દાં ભવસ્યાથ તત્ક્ષણાદેવ સન્ત્યજેત્ ।
સ્વદેહં તન્નિહત્યાશુ શિવલોકં સ ગચ્છતિ ॥ ૩૭॥

આસ્તાં તાવન્મમેચ્છેયં ક્ષીરં પ્રતિ સુરાધમ ।
નિહત્ય ત્વાં શિવાસ્ત્રેણ ત્યજામ્યેતત્કલેવરમ્ ॥ ૩૮॥

નન્દીશ્વર ઉવાચ ।

એવમુક્ત્વોપમન્યુસ્તં મર્તું વ્યવસિતઃ સ્વયમ્ ।
ક્ષીરે વાઞ્છામપિ ત્યક્ત્વા નિહન્તું શક્રમુદ્યતઃ ॥ ૩૯॥

ભસ્માદાય તદાધારાદઘોરાસ્ત્રાભિમન્ત્રિતમ્ ।
વિસૃજ્ય શક્રમુદ્દિશ્ય નનાદ સ મુનિસ્તદા ॥ ૪૦॥

સ્મૃત્વા સ્વેષ્ટપદદ્વન્દ્વં સ્વદેહં દગ્ધુમુદ્યતઃ ।
આગ્નેયીં ધારણાં બિભ્રદુપમન્યુરવસ્થિતઃ ॥ ૪૧॥

એવં વ્યવસિતે વિપ્રે ભગવાન્ શક્રરૂપવાન્ ।
વારયામાસ સૌમ્યેન ધારણાં તસ્ય યોગિનઃ ॥ ૪૨॥

તદ્વિસૃષ્ટમઘોરાસ્ત્રં નન્દીશ્વરનિયોગતઃ ।
જગૃહે મધ્યતઃ ક્ષિપ્રં નન્દી શઙ્કરવલ્લભમ્ ॥ ૪૩॥

સ્વરૂપમેવ ભગવાનાસ્થાય પરમેશ્વરઃ ।
દર્શયામાસ વિપ્રાય બાલેન્દુકૃતશેખરમ્ ॥ ૪૪॥

ક્ષીરાર્ણવસહસ્રં ચ દધ્યાદેરર્ણવં તથા ।
ભક્ષ્યભોજ્યાર્ણવં તસ્મૈ દર્શયામાસ સ પ્રભુઃ ॥ ૪૫॥

એવં સ દદૃશે શમ્ભુર્દેવ્યા સાર્ધં વૃષોપરિ ।
ગણેશ્વરૈસ્ત્રિશૂલાદ્યૈર્દિવ્યાસ્ત્રૈરપિ સંવૃતઃ ॥ ૪૬॥

દિવિ દુન્દુભયો નેદુઃ પુષ્પવૃષ્ટિઃ પપાત હ ।
વિષ્ણુબ્રહ્મેન્દ્રપ્રમુખૈર્દેવૈશ્છન્ના દિશો દશ ॥ ૪૭॥

અથોપમન્યુરાનન્દસમુદ્રોર્મિભિરાવૃતઃ ।
પપાત દણ્ડવદ્ભૂમૌ ભક્તિનમ્રેણ ચેતસા ॥ ૪૮॥

એતસ્મિન્સમયે તત્ર સસ્મિતો ભગવાન્ભવઃ ।
એહ્યેહીતિ સમાહૂય મૂર્ધ્ન્યાઘ્રાય દદૌ વરાન્ ॥ ૪૯॥

શિવ ઉવાચ ।
વત્સોપમન્યો તુષ્ટોઽસ્મિ ત્વદાચરણતો વરાત્ ।
દૃઢભક્તોઽસિ વિપ્રર્ષે મયા જિજ્ઞાસિતોઽધુના ॥ ૫૦॥

ભક્ષ્યભોગાન્યથાકામં બાન્ધવૈર્ભુઙ્ક્ષ્વ સર્વદા ।
સુખી ભવ સદા દુઃખનિર્મુક્તો ભક્તિમાન્મમ ॥ ૫૧॥

ઉપમન્યો મહાભાગ તવામ્બૈષા હિ પાર્વતી ।

મયા પુત્રીકૃતો હ્યદ્ય કુમારત્વં સનાતનમ્ ॥ ૫૨॥

દુગ્ધદધ્યાજ્યમધુનામર્ણવાશ્ચ સહસ્રશઃ ।
ભક્ષ્યભોજ્યાદિવસ્તૂનામર્ણવાશ્ચાખિલાસ્તથા ॥ ૫૩॥

તુભ્યં દત્તા મયા પ્રીત્યા ત્વં ગૃહ્ણીષ્વ મહામુને ।
અમરત્વં તથા દત્તં ગાણપત્યં ચ શાશ્વતમ્ ॥ ૫૪॥

પિતાહં તે મહાદેવો માતા તે જગદમ્બિકા ।
વરાન્વરય સુપ્રીત્યા મનોઽભિલષિતાન્પરાન્ ॥ ૫૫॥

અજરશ્ચામરશ્ચૈવ ભવ ત્વં દુઃખવર્જિતઃ ।
યશસ્વી વરતેજસ્વી દિવ્યજ્ઞાની મહાપ્રભુઃ ॥ ૫૬॥

અથ શમ્ભુઃ પ્રસન્નાત્મા સ્મૃત્વા તસ્ય તપો મહત્ ।
પુનર્દશ વરાન્દિવ્યાન્મુનયે હ્યૂપમન્યવે ॥ ૫૭॥

વ્રતં પાશુપતં જ્ઞાનં વ્રતયોગં ચ તત્ત્વતઃ ।
દદૌ તસ્મૈ પ્રવક્તૃત્વં પાટવં ચ નિજં પદમ્ ॥ ૫૮॥

એવં દત્ત્વા મહાદેવઃ કરાભ્યામુપગૃહ્ય તમ્ ।
મૂર્ધ્ન્યાઘ્રાય સુતસ્તેઽયમિતિ દેવ્યૈ ન્યવેદયત્ ॥ ૫૯॥

દેવી ચ શ઼ૃણ્વતી પ્રીત્યા મૂર્ધ્નિ દેશે કરામ્બુજમ્ ।
વિન્યસ્ય પ્રદદૌ તસ્મૈ કુમારપદમક્ષયમ્ ॥ ૬૦॥

ક્ષીરાબ્ધિમપિ સાકારં ક્ષીરસ્વાદુકરોદધિઃ ।
ઉપાસ્થાય દદૌ તસ્મૈ પિણ્ડીભૂતમનશ્વરમ્ ॥ ૬૧॥

યોગૈશ્વર્યં સદા તુષ્ટં બ્રહ્મવિદ્યામનશ્વરામ્ ।
સમૃદ્ધિં પરમાં તસ્મૈ દદૌ સન્તુષ્ટમાનસઃ ॥ ૬૨॥

સોઽપિ લબ્ધ્વા વરાન્દિવ્યાન્કુમારત્વં ચ સર્વદા ।
તસ્માચ્છિવાચ્ચ તસ્યાશ્ચ શિવાયા મુદિતોઽભવત્ ॥ ૬૩॥

તતઃ પ્રસન્નચેતસ્કઃ સુપ્રણમ્ય કૃતાઞ્જલિઃ ।
યયાચે સ વરં પ્રીત્યા દેવદેવાન્મહેશ્વરાત્ ॥ ૬૪॥

ઉપમન્યુરુવાચ ।
પ્રસીદ દેવદેવેશ પ્રસીદ પરમેશ્વર ।
સ્વભક્તિં દેહિ પરમાં દિવ્યામવ્યભિચારિણીમ્ ॥ ૬૫॥

શ્રદ્ધાં દેહિ મહાદેવ સ્વસમ્બન્ધિષુ મે સદા ।
સ્વદાસ્યં પરમં સ્નેહં સ્વસાન્નિધ્યં ચ સર્વદા ॥ ૬૬॥

નન્દીશ્વર ઉવાચ ।
એવમુક્ત્વા પ્રસન્નાત્મા હર્ષગદ્ગદયા ગિરા ।
તુષ્ટાવ સ મહાદેવમુપમન્યુર્દ્વિજોત્તમઃ ॥ ૬૭॥

એવમુક્તઃ શિવસ્તેન સર્વેષાં શ ૃણ્વતાં પ્રભુઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મોપમન્યું સકલેશ્વરઃ ॥ ૬૮॥

શિવ ઉવાચ ।
વત્સોપમન્યો ધન્યસ્ત્વં મમ ભક્તો વિશેષતઃ ।
સર્વં દત્તં મયા તે હિ યદ્ વૃતં ભવતાનઘ ॥ ૬૯॥

અજરશ્ચામરશ્ચ ત્વં સર્વદા દુઃખવર્જિતઃ ।
સર્વપૂજ્યો નિર્વિકારી ભક્તાનાં પ્રવરો ભવ ॥ ૭૦॥

અક્ષયા બાન્ધવાશ્ચૈવ કુલં ગોત્રં ચ તે સદા ।
ભવિષ્યતિ દ્વિજશ્રેષ્ઠ મયિ ભક્તિશ્ચ શાશ્વતી ॥ ૭૧॥

સાન્નિધ્યં ચાશ્રયે નિત્યં કરિષ્યામિ મુને તવ ।
તિષ્ઠ વત્સ યથાકામં નોત્કણ્ઠાં ચ કરિષ્યસિ ॥ ૭૨॥

નન્દીશ્વર ઉવાચ ।
એવમુક્ત્વા સ ભગવાંસ્તસ્મૈ દત્ત્વા વરાન્વરાન્ ।
સામ્બશ્ચ સગણઃ સદ્યસ્તત્રૈવાન્તર્દધે પ્રભુઃ ॥ ૭૩॥

ઉપમન્યુઃ પ્રસન્નાત્મા પ્રાપ્ય શમ્ભોર્વરાન્વરાન્ ।
જગામ જનનીસ્થાનં માત્રે સર્વમવર્ણયત્ ॥ ૭૪॥

તચ્છ્રુત્વા તસ્ય જનની મહાહર્ષમવાપ સા ।
સર્વપૂજ્યોઽભવત્સોઽપિ સુખં પ્રાપાધિકં સદા ॥ ૭૫॥

ઇત્થં તે વર્ણિતસ્તાત શિવસ્ય પરમાત્મનઃ ।
સુરેશ્વરાવતારો હિ સર્વદા સુખદઃ સતામ્ ॥ ૭૬॥

ઇદમાખ્યાનમનઘં સર્વકામફલપ્રદમ્ ।
સ્વર્ગ્યં યશસ્યમાયુષ્યં ભુક્તિમુક્તિપ્રદં સતામ્ ॥ ૭૭॥

ય એતચ્છૃણુયાદ્ભક્ત્યા શ્રાવયેદ્વા સમાહિતઃ ।
ઇહ સર્વસુખં ભુક્ત્વા સોઽન્તે શિવગતિં લભેત્ ॥ ૭૮॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં સુરેશ્વરાખ્યશિવાવતાર ચરિત્રવર્ણનં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૩.૩૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૩૩. ત્રયોત્રિંશોઽધ્યાયઃ । બ્રહ્મચારિશિવાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
સનત્કુમાર સુપ્રીત્યા શિવસ્ય પરમાત્મનઃ ।
અવતારં શ◌ૃણુ વિભોર્જટિલાહ્વં સુપાવનમ્ ॥ ૧॥

પુરા સતી દક્ષકન્યા ત્યક્ત્વા દેહં પિતુર્મખે ।
સ્વપિત્રાનાદૃતા જજ્ઞે મેનાયાં હિમભૂધરાત્ ॥ ૨॥

સા ગત્વા ગહનેઽરણ્યે તેપે સુવિમલં તપઃ ।
શઙ્કરં પતિમિચ્છન્તી સખીભ્યાં સંયુતા શિવા ॥ ૩॥

તત્તપઃ સુપરીક્ષાર્થં સપ્તર્ષીન્પ્રૈષયચ્છિવઃ ।
તપઃસ્થાનં તુ પાર્વત્યા નાનાલીલાવિશારદઃ ॥ ૪॥

તે ગત્વા તત્ર મુનયઃ પરીક્ષાં ચક્રુરાદરાત્ ।
તસ્યાઃ સુયત્નતો નૈવ સમર્થા હ્યભવંશ્ચ તે ॥ ૫॥

તત્રાગત્ય શિવં નત્વા વૃત્તાન્તં ચ નિવેદ્ય તત્ ।
તદાજ્ઞાં સમનુપ્રાપ્ય સ્વર્લોકં જગ્મુરાદરાત્ ॥ ૬॥

ગતેષુ તેષુ મુનિષુ સ્વસ્થાનં શઙ્કરઃ સ્વયમ્ ।
પરીક્ષિતું શિવાવૃત્તમૈચ્છત્સૂતિકરઃ પ્રભુઃ ॥ ૭॥

સુપ્રસન્નસ્તપસ્વીચ્છાશમનાદયમીશ્વરઃ ।
બ્રહ્મચર્યસ્વરૂપોઽભૂત્તદાદ્ભુતતરઃ પ્રભુઃ ॥ ૮॥

અતીવ સ્થવિરો વિપ્રદેહધારી સ્વતેજસા ।

પ્રજ્વલન્મનસા હૃષ્ટો દણ્ડી છત્રી મહોજ્જ્વલઃ ॥ ૯॥

ધૃત્વૈવં જાટિલં રૂપં જગામ ગિરિજાવનમ્ ।
અતિપ્રીતિયુતઃ શમ્ભુઃ શઙ્કરો ભક્તવત્સલઃ ॥ ૧૦॥

તત્રાપશ્યત્ સ્થિતાં દેવીં સખીભિઃ પરિવારિતામ્ ।
વેદિકોપરિ શુદ્ધાન્તાં શિવામિવ વિધોઃ કલામ્ ॥ ૧૧॥

શમ્ભુર્નિરીક્ષ્ય તાં દેવીં બ્રહ્મચારિસ્વરૂપવાન્ ।
ઉપકણ્ઠં યયૌ પ્રીત્યા ચોત્સુકી ભક્તવત્સલઃ ॥ ૧૨॥

આગતં સા તદા દૃષ્ટ્વા બ્રાહ્મણં તેજસાદ્ભુતમ્ ।
અઙ્ગેષુ લોમશં શાન્તં દણ્ડચર્મસમન્વિતમ્ ॥ ૧૩॥

બ્રહ્મચર્યધરં વૃદ્ધં જટિલં સકમણ્ડલુમ્ ।
અપૂજયત્પરપ્રીત્યા સર્વપૂજોપહારકૈઃ ॥ ૧૪॥

તતઃ સા પાર્વતી દેવી પૂજિતં પરયા મુદા ।
કુશલં પર્યપૃચ્છત્તં બ્રહ્મચારિણમાદરાત્ ॥ ૧૫॥

બ્રહ્મચારિસ્વરૂપેણ કસ્ત્વં હિ કુત આગતઃ ।
ઇદં વનં ભાસયસિ વદ વેદવિદાં વર ॥ ૧૬॥

નન્દીશ્વર ઉવાચ ।
ઇતિ પૃષ્ટસ્તુ પાર્વત્યા બ્રહ્મચારી સ વૈ દ્વિજઃ ।
પ્રત્યુવાચ દ્રુતં પ્રીત્યા શિવાભાવપરીક્ષયા ॥ ૧૭॥

બ્રહ્મચાર્યુવાચ ।
અહમિચ્છાભિગામી ચ બ્રહ્મચારી દ્વિજોઽસ્મિ વૈ ।
તપસ્વી સુખદોઽન્યેષામુપકારી ન સંશયઃ ॥ ૧૮॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા બ્રહ્મચારી સ શઙ્કરો ભક્તવત્સલઃ ।
તસ્થિવાનુપકણ્ઠં સ ગોપાયન્ રૂપમાત્મનઃ ॥ ૧૯॥

બ્રહ્મચાર્યુવાચ ।
કિં બ્રવીમિ મહાદેવિ કથનીયં ન વિદ્યતે ।
મહાનર્થકરં વૃત્તં દૃશ્યતે વિકૃતં મહત્ ॥ ૨૦॥

નવે વયસિ સદ્ભોગસાધને સુખકારણે ।

મહોપચારસદ્ભોગૈર્વૃથૈવ ત્વં તપસ્યસિ ॥ ૨૧॥

કા ત્વં કસ્યાસિ તનયા કિમર્થં વિજને વને ।
તપશ્ચરસિ દુર્ધર્ષં મુનિભિઃ પ્રયતાત્મભિઃ ॥ ૨૨॥

નન્દીશ્વર ઉવાચ ।
ઇતિ તદ્વચનં શ્રુત્વા પ્રહસ્ય પરમેશ્વરી ।
ઉવાચ વચનં પ્રીત્યા બ્રહ્મચારિણમુત્તમમ્ ॥ ૨૩॥

પાર્વત્યુવાચ ।
શ ૃણુ વિપ્ર બ્રહ્મચારિન્ મદ્વૃત્તમખિલં મુને ।
જન્મ મે ભારતે વર્ષે સામ્પ્રતં હિમવદ્ગૃહે ॥ ૨૪॥

પૂર્વં દક્ષગૃહે જન્મ સતી શઙ્કરકામિની ।
યોગેન ત્યક્તદેહાહં તાતેન પતિનિન્દિના ॥ ૨૫॥

અત્ર જન્મનિ સમ્પ્રાપ્તઃ સુપુણ્યેન શિવો દ્વિજ ।
માં ત્યક્ત્વા ભસ્મસાત્કૃત્વા મન્મથં સ જગામ હ ॥ ૨૬॥

પ્રયાતે શઙ્કરે તાપાદ્ વ્રીડિતાહં પિતુર્ગૃહાત્ ।
આગચ્છમત્ર તપસે ગુરુવાક્યેન સંયતા ॥ ૨૭॥

મનસા વચસા સાક્ષાત્કર્મણા પતિભાવતઃ ।
સત્યં બ્રવીમિ નોઽસત્યં સંવૃતઃ શઙ્કરો મયા ॥ ૨૮॥

જાનામિ દુર્લભં વસ્તુ કથં પ્રાપ્યં મયા ભવેત્ ।
તથાપિ મનસૌત્સુક્યાત્તપ્યતે મે તપોઽધુના ॥ ૨૯॥

હિત્વેન્દ્રપ્રમુખાન્દેવાન્વિષ્ણું બ્રહ્માણમપ્યહમ્ ।
પતિં પિનાકપાણિં વૈ પ્રાપ્તુમિચ્છામિ સત્યતઃ ॥ ૩૦॥

નન્દીશ્વર ઉવાચ ।
ઇત્યેવં વચનં શ્રુત્વા પાર્વત્યા હિ સુનિશ્ચિતમ્ ।
મુને સ જટિલો રુદ્રો વિહસન્વાક્યમબ્રવીત્ ॥ ૩૧॥

જટિલ ઉવાચ ।
હિમાચલસુતે દેવિ કા બુદ્ધિઃ સ્વીકૃતા ત્વયા ।
રુદ્રાર્થં વિબુધાન્હિત્વા કરોષિ વિપુલં તપઃ ॥ ૩૨॥

જાનામ્યહં ચ તં રુદ્રં શ ૃણુ ત્વં પ્રવદામિ તે ।

વૃષધ્વજઃ સ રુદ્રો હિ વિકૃતાત્મા જટાધરઃ ॥ ૩૩॥

એકાકી ચ સદા નિત્યં વિરાગી ચ વિશેષતઃ ।
તસ્માત્ત્વં તેન રુદ્રેણ મનો યોક્તું ન ચાર્હસિ ॥ ૩૪॥

સર્વં વિરુદ્ધં રૂપાદિ તવ દેવિ હરસ્ય ચ ।
મહ્યં ન રોચતે હ્યેતદ્યદીચ્છસિ તથા કુરુ ॥ ૩૫॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા ચ પુના રુદ્રો બ્રહ્મચારિસ્વરૂપવાન્ ।
નિનિન્દ બહુધાત્માનં તદગ્રે તાં પરીક્ષિતુમ્ ॥ ૩૬॥

તચ્છ્રુત્વા પાર્વતી દેવી વિપ્રવાક્યં દુરાસદમ્ ।
પ્રત્યુવાચ મહાક્રુદ્ધા શિવનિન્દાપરં ચ તમ્ ॥ ૩૭॥

એતાવદ્ધિ મયા જ્ઞાતં કશ્ચિદ્ ધન્યો ભવિષ્યતિ ।
પરન્તુ સકલં જ્ઞાતમવધ્યો દૃશ્યતેઽધુના ॥ ૩૮॥

બ્રહ્મચારિસ્વરૂપેણ કશ્ચિત્ત્વં ધૂર્ત આગતઃ ।
શિવનિન્દા કૃતા મૂઢ ત્વયા મન્યુરભૂન્મમ ॥ ૩૯॥

શિવં ત્વં ચ ન જાનાસિ શિવાત્ત્વં હિ બહિર્મુખઃ ।
ત્વત્પૂજા ચ કૃતા યન્મે તસ્માત્તાપયુતાભવમ્ ॥ ૪૦॥

શિવનિન્દાં કરોતીહ તત્ત્વમજ્ઞાય યઃ પુમાન્ ।
આજન્મસઞ્ચિતં પુણ્યં તસ્ય ભસ્મીભવત્યુત ॥ ૪૧॥

શિવવિદ્વેષિણં સ્પૃષ્ટ્વા પ્રાયશ્ચિત્તં સમાચરેત્ ॥ ૪૨॥

રે રે દુષ્ટ ત્વયા પ્રોક્તમહં જાનામિ શઙ્કરમ્ ।
નિશ્ચયેન ન વિજ્ઞાતઃ શિવ એવ પરઃ પ્રભુઃ ॥ ૪૩॥

યથા તથા ભવેદ્રુદ્રો માયયા બહુરૂપવાન્ ।
મમાભીષ્ટપ્રદોઽત્યન્તં નિર્વિકારઃ સતાં પ્રિયઃ ॥ ૪૪॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા તં શિવા દેવી શિવતત્ત્વં જગાદ સા ।
યત્ર બ્રહ્મતયા રુદ્રઃ કથ્યતે નિર્ગુણોઽવ્યયઃ ॥ ૪૫॥

તદાકર્ણ્ય વચો દેવ્યા બ્રહ્મચારી સ વૈ દ્વિજઃ ।
પુનર્વચનમાદાતું યાવદેવ પ્રચક્રમે ॥ ૪૬॥

પ્રોવાચ ગિરિજા તાવત્સ્વસખીં વિજયાં દ્રુતમ્ ।
શિવાસક્તમનોવૃત્તિઃ શિવનિન્દાપરાઙ્મુખી ॥ ૪૭॥

ગિરિજોવાચ ।
વારણીયઃ પ્રયત્નેન સખ્યયં હિ દ્વિજાધમઃ ।
પુનર્વક્તુમનાશ્ચાયં શિવનિન્દાં કરિષ્યતિ ॥ ૪૮॥

ન કેવલં ભવેત્પાપં નિન્દાકર્તુઃ શિવસ્ય હિ ।
યો વૈ શ‍ૃણોતિ તન્નિન્દાં પાપભાક્સ ભવેદિહ ॥ ૪૯॥

શિવનિન્દાકરો વધ્યઃ સર્વથા શિવકિઙ્કરૈઃ ।
બ્રાહ્મણશ્ચેત્સ વૈ ત્યાજ્યો ગન્તવ્યં તત્સ્થલાદ્દ્રુતમ્ ॥ ૫૦॥

અયં દુષ્ટઃ પુનર્નિન્દાં કરિષ્યતિ શિવસ્ય હિ ।
બ્રાહ્મણત્વાદવધ્યશ્ચ ત્યાજ્યોઽદૃશ્યશ્ચ સર્વથા ॥ ૫૧॥

સ્થલમેતદ્ દ્રુતં હિત્વા યાસ્યામોઽન્યત્ર મા ચિરમ્ ।
યથા સમ્ભાષણં ન સ્યાદનેનાવિદુષા પુનઃ ॥ ૯૨॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા ચોમયા યાવત્પદમુત્ક્ષિપ્યતે મુને ।
અસૌ તાવચ્છિવઃ સાક્ષાદાલલમ્બે પટં સ્વયમ્ ॥ ૫૩॥

કૃત્વા સ્વરૂપં દિવ્યં ચ શિવાધ્યાનં યથા તથા ।
દર્શયિત્વા શિવાયૈ તામુવાચાવાઙ્મુખીં શિવઃ ॥ ૫૪॥

શિવ ઉવાચ ।
કુત્ર ત્વં યાસિ માં હિત્વા ન ત્વં ત્યાજ્યા મયા શિવે ।
મયા પરીક્ષિતાસિ ત્વં દૃઢભક્તાસિ મેઽનઘે ॥ ૫૫॥

બ્રહ્મચારિસ્વરૂપેણ ભાવમિચ્છુસ્ત્વદીયકમ્ ।
તવોપકણ્ઠમાગત્ય પ્રાવોચં વિવિધં વચઃ ॥ ૫૬॥

પ્રસન્નોઽસ્મિ દૃઢં ભક્ત્યા શિવે તવ વિશેષતઃ ।
ચિત્તેપ્સિતં વરં બ્રૂહિ નાદેયં વિદ્યતે તવ ॥ ૫૭॥

અદ્યપ્રભૃતિ તે દાસસ્તપોભિઃ પ્રેમનિર્ભરે ।
કૃતોઽસ્મિ તવ સૌન્દર્યાત્ક્ષણ એકો યુગાયતે ॥ ૫૮॥

ત્યજયતાં ચ ત્વયા લજ્જા મમ પત્ની સનાતની ।
એહિ પ્રિયે ત્વયા સાકં દ્રુતં યામિ સ્વકં ગિરિમ્ ॥ ૫૯॥

ઇત્યુક્તવતિ દેવેશે શિવાતિમુદમાપ સા ।
તપોદુઃખં તુ યત્સર્વં તજ્જહૌ દ્રુતમેવ હિ ॥ ૬૦॥

તતઃ પ્રહૃષ્ટા સા દૃષ્ટ્વા દિવ્યરૂપં શિવસ્ય તત્ ।
પ્રત્યુવાચ પ્રભું પ્રીત્યા લજ્જયાધોમુખી શિવા ॥ ૬૧॥

શિવોવાચ ।
યદિ પ્રસન્નો દેવેશ કરોષિ ચ કૃપાં મયિ ।
પતિર્મે ભવ દેવેશ ઇત્યુક્તઃ શિવયા શિવઃ ॥ ૬૨॥

નન્દીશ્વર ઉવાચ
ગૃહીત્વા વિધિવત્પાણિં કૈલાસં સ તયા યયૌ ।
પતિં તં ગિરિજા પ્રાપ્ય દેવકાર્યં ચકાર સા ॥ ૬૩॥

ઇતિ પ્રોક્તસ્તુ તે તાત બ્રહ્મચારિસ્વરૂપકઃ ।
શિવાવતારો હિ મયા શિવાભાવપરીક્ષકઃ ॥ ૬૪॥

ઇદમાખ્યાનમનઘં પરમં વ્યાહૃતં મયા ।
ય એતચ્છૃણુયાત્પ્રીત્યા સ સુખી ગતિમાપ્નુયાત્ ॥ ૬૫॥

ઇતિ શ્રી શિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં બ્રહ્મચારિશિવાવતારવર્ણનં નામ ત્રયોત્રિંશોઽધ્યાયઃ ॥ ૩.૩૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૩૪. ચતુસ્ત્રિંશોઽધ્યાયઃ । સુનર્તકનટાહ્વશિવાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ શિવસ્ય પરમાત્મનઃ ।
અવતારં શ઼ૃણુ વિભોઃ સુનર્તકનટાહ્વયમ્ ॥ ૧॥

યદા હિ કાલિકા દેવી પાર્વતી હિમવત્સુતા ।

તેપે તપઃ સુવિમલં વનં ગત્વા શિવાપ્તયે ॥ ૨॥

તદા શિવઃ પ્રસન્નોઽભૂત્તસ્યાઃ સુતપસો મુને ।
તદ્વૃત્તસુપરીક્ષાર્થં વરં દાતું મુદા યયૌ ॥ ૩॥

સ્વરૂપં દર્શયામાસ તસ્યૈ સુપ્રીતમાનસઃ ।
વરં બ્રૂહીતિ ચોવાચ તાં શિવાં શઙ્કરો મુને ॥ ૪॥

તચ્છ્રુત્વા શમ્ભુવચનં દૃષ્ટ્વા તદ્રૂપમુત્તમમ્ ।
સુજહર્ષ શિવાતીવ પ્રાહ તં સુપ્રણમ્ય સા ॥ ૫॥

પાર્વત્યુવાચ ।
યદિ પ્રસન્નો દેવેશ મહ્યં દેયો વરો યદિ ।
પતિર્ભવ મમેશાન કૃપાં કુરુ મમોપરિ ॥ ૬॥

પિતુર્ગૃહે મયા સમ્યગ્ગમ્યતે ત્વદનુજ્ઞયા ।
ગન્તવ્યં ભવતા નાથ મત્પિતુઃ પાર્શ્વતઃ પ્રભો ॥ ૭॥

યાચસ્વ માં તતો ભિક્ષુઃ ખ્યાપયંશ્ચ યશઃ શુભમ્ ।
પિતુર્મે સફલં સર્વં કુરુ પ્રીત્યા ગૃહાશ્રમમ્ ॥ ૮॥

તતો યથોક્તવિધિના કર્તુમર્હસિ ભો પ્રભો ।
વિવાહં ત્વં મહેશાન દેવાનાં કાર્યસિદ્ધયે ॥ ૯॥

કામં મે પૂરય વિભો નિર્વિકારો ભવાન્સદા ।
ભક્તવત્સલનામા હિ તવ ભક્તાસ્મ્યહં સદા ॥ ૧૦॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તઃ સ તયા શમ્ભુર્મહેશો ભક્તવત્સલઃ ।
તથાસ્ત્વિતિ વચઃ પ્રોચ્યાન્તર્હિતઃ સ્વગિરિં યયૌ ॥ ૧૧॥

પાર્વત્યપિ તતઃ પ્રીત્યા સ્વસખીભ્યાં સમન્વિતા ।
જગામ સ્વપિતુર્ગેહં રૂપં કૃત્વા તુ સાર્થકમ્ ॥ ૧૨॥

પાર્વત્યાગમનં શ્રુત્વા મેનયા સ હિમાચલઃ ।
પરિવારયુતો દ્રષ્ટું સ્વસુતાં તાં યયૌ મુદા ॥ ૧૩॥

દૃષ્ટ્વા તાં સુપ્રસન્નાસ્યામાનયામાસતુર્ગૃહમ્ ।
કારયામાસતુઃ પ્રીત્યા મહાનન્દૌ મહોત્સવમ્ ॥ ૧૪॥

ધનં દદૌ દ્વિજાદિભ્યો મેના ગિરિવરસ્તથા ।

મઙ્ગલં કારયામાસ સવેદધ્વનિમાદરાત્ ॥ ૧૫॥

તતઃ સ્વકન્યયા સાર્ધમુવાસ પ્રાઙ્ગણે મુદા ।
મેના ચ હિમવાઞ્છૈલઃ સ્નાતું ગઙ્ગાં જગામ સઃ ॥ ૧૬॥

એતસ્મિન્નન્તરે શમ્ભુઃ સુલીલો ભક્તવત્સલઃ ।
સુનર્તકનટો ભૂત્વા મેનકાસન્નિધિં યયૌ ॥ ૧૭॥

શૃઙ્ગં વામે કરે ધૃત્વા દક્ષિણે ડમરું તથા ।
પૃષ્ઠે કન્થાં રક્તવાસા નૃત્યગાનવિશારદઃ ॥ ૧૮॥

તતસ્તુ નટરૂપોઽસૌ મેનકાપ્રાઙ્ગણે મુદા ।
ચક્રે સ નૃત્યં વિવિધં ગાનં ચાતિ મનોહરમ્ ॥ ૧૯॥

શૃઙ્ગઞ્ચ ડમરું તત્ર વાદયામાસ સુધ્વનિમ્ ।
મહોતિં વિવિધાં પ્રીત્યા સ ચકાર મનોહરામ્ ॥ ૨૦॥

તં દ્રષ્ટું નાગરાઃ સર્વે પુરુષાશ્ચ સ્ત્રિયસ્તથા ।
આજગ્મુઃ સહસા તત્ર બાલા વૃદ્ધા અપિ ધ્રુવમ્ ॥ ૨૧॥

શ્રુત્વા સુગીતં તં દૃષ્ટ્વા સુનૃત્યં ચ મનોહરમ્ ।
સહસા મુમુહુઃ સર્વે મેનાપિ ચ તદા મુને ॥ ૨૨॥

તતો મેનાશુ રત્નાનિ સ્વર્ણપાત્રસ્થિતાનિ ચ ।
તસ્મૈ દાતું યયૌ પ્રીત્યા તદ્દૂતિપ્રીતમાનસા ॥ ૨૩॥

તાનિ ન સ્વીચકારાસૌ ભિક્ષાં કાઙ્ક્ષે શિવાં ચ તામ્ ।
પુનઃ સુનૃત્યં ગાનં ચ કૌતુકાત્કર્તુમુદ્યતઃ ॥ ૨૪॥

મેના તદ્વચનં શ્રુત્વા ચુકોપાતિ સુવિસ્મિતા ।
ભિક્ષુકં ભર્ત્સયામાસ બહિષ્કર્તુમિયેષ સા ॥ ૨૫॥

એતસ્મિન્નન્તરે તત્ર ગઙ્ગાતો ગિરિરાડ્ યયૌ ।
દદર્શ પુરતો ભિક્ષું પ્રાઙ્ગણસ્થં નરાકૃતિમ્ ॥ ૨૬॥

શ્રુત્વા મેનામુખાદ્ વૃત્તં તત્સર્વં સુચુકોપ સઃ ।
આજ્ઞાં ચકારાનુચરાન્બહિઃ કર્તું ચ ભિક્ષુકમ્ ॥ ૨૭॥

મહાગ્નિમિવ દુઃસ્પર્શં પ્રજ્વલન્તં સુતેજસમ્ ।
ન શશાક બહિઃ કર્તું કોઽપિ તં મુનિસત્તમ ॥ ૨૮॥

તતઃ સ ભિક્ષુકસ્તાત નાનાલીલાવિશારદઃ ।
દર્શયામાસ શૈલાય સ્વપ્રભાવમનન્તકમ્ ॥ ૨૯॥

શૈલો દદર્શ તં તત્ર વિષ્ણુરૂપધરં દ્રુતમ્ ।
તતો બ્રહ્મસ્વરૂપં ચ સૂર્યરૂપં તતઃ ક્ષણાત્ ॥ ૩૦॥

તતો દદર્શ તં તાત રુદ્રરૂપં મહાદ્ભુતમ્ ।
પાર્વતીસહિતં રમ્યં વિહસન્તં સુતેજસમ્ ॥ ૩૧॥

એવં સુબહુરૂપાણિ તસ્ય તત્ર દદર્શ સઃ ।
સુવિસ્મિતો બભૂવાશુ પરમાનન્દસમ્પ્લુતઃ ॥ ૩૨॥

અથાસૌ ભિક્ષુવર્યો હિ તસ્માત્તસ્યાશ્ચ સૂતિકૃત્ ।
ભિક્ષાં યયાચે દુર્ગાં તાં નાન્યજ્જગ્રાહ કિઞ્ચન ॥ ૩૩॥

તતશ્ચાન્તર્દધે ભિક્ષુસ્વરૂપઃ પરમેશ્વરઃ ।
સ્વાલયં સ જગામાશુ દુર્ગાવાક્યપ્રણોદિતઃ ॥ ૩૪॥

તદા બભૂવ સુજ્ઞાનં મેનાશૈલેશયોરપિ ।
આવાં શિવો વઞ્ચયિત્વા ગતવાન્સ્વાલયં વિભુઃ ॥ ૩૫॥

અસ્મૈ દેયા સ્વકન્યેયં પાર્વતી સુતપસ્વિની ।
એવં વિચાર્ય ચ તયોઃ શિવે ભક્તિરભૂત્પરા ॥ ૩૬॥

અતો રુદ્રો મહોતીશ્ચ કૃત્વા ભક્તમુદાવહમ્ ।
વિવાહં કૃતવાન્પ્રીત્યા પાર્વત્યા સ વિધાનતઃ ॥ ૩૭॥

ઇતિ પ્રોક્તસ્તુ તે તાત સુનર્તકનટાહ્વયઃ ।
શિવાવતારો હિ મયા શિવાવાક્યપ્રપૂરકઃ ॥ ૩૮॥

ઇદમાખ્યાનમનઘં પરમં વ્યાહૃતં મયા ।
ય એતચ્છૃણુયાત્પ્રીત્યા સ સુખી ગતિમાપ્નુયાત્ ॥ ૩૯॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં સુનર્તકનટાહ્વશિવાવતારવર્ણનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૩.૩૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૩૫. પઞ્ચત્રિંશોઽધ્યાયઃ । સાધુદ્વિજશિવાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ શિવસ્ય પરમાત્મનઃ ।
અવતારં શ‍ृણુ વિભોઃ સાધુવેષદ્વિજાહ્વયમ્ ॥ ૧॥

મેનાહિમાલયોર્ભક્તિં શિવે જ્ઞાત્વા મહોત્તમામ્ ।
ચિન્તામાપુઃ સુરાઃ સર્વે મન્ત્રયામાસુરાદરાત્ ॥ ૨॥

એકાન્તભક્ત્યા શૈલશ્ચેત્કન્યાં દાસ્યતિ શમ્ભવે ।
ધ્રુવં નિર્વાણતાં સદ્યઃ સમ્પ્રાપ્સ્યતિ શિવસ્ય વૈ ॥ ૩॥

અનન્તરત્નાધારોઽસૌ ચેત્પ્રયાસ્યતિ મોક્ષતામ્ ।
રત્નગર્ભાભિધા ભૂમિર્મિથ્યૈવ ભવિતા ધ્રુવમ્ ॥ ૪॥

સ્થાવરત્વં પરિત્યજ્ય દિવ્યરૂપં વિધાય સઃ ।
કન્યાં શૂલભૃતે દત્ત્વા શિવલોકં ગમિષ્યતિ ॥ ૫॥

મહાદેવસ્ય સારૂપ્યં પ્રાપ્ય શમ્ભોરનુગ્રહાત્ ।
તત્ર ભુક્ત્વા મહાભોગાંસ્તતો મોક્ષમવાપ્સ્યતિ ॥ ૬॥

ઇત્યાલોચ્ય સુરાઃ સર્વે જગ્મુર્ગુરુગૃહં મુને ।
ચક્રુર્નિવેદનં ગત્વા ગુરવે સ્વાર્થસાધકાઃ ॥ ૭॥

દેવા ઊચુઃ ।
ગુરો હિમાલયગૃહં ગચ્છાસ્મત્કાર્યસિદ્ધયે ।
કૃત્વા નિન્દાં મહેશસ્ય ગિરિભક્તિં નિવારય ॥ ૮॥

સ્વશ્રદ્ધયા સુતાં દત્ત્વા શિવાય સ ગિરિર્ગુરો ।
લભેત મુક્તિમત્રૈવ ધરણ્યાં સ હિ તિષ્ઠતુ ॥ ૯॥

ઇતિ દેવવચઃ શ્રુત્વા પ્રોવાચ ચ વિચાર્ય તાન્ ॥ ૧૦॥

ગુરુરુવાચ ।
કશ્ચિન્મધ્યે ચ યુષ્માકં ગચ્છેચ્છૈલાન્તિકં સુરાઃ ।
સમ્પાદયેત્સ્વાભિમતમહં તત્કર્તુમક્ષમઃ ॥ ૧૧॥

અથવા ગચ્છત સુરા બ્રહ્મલોકં સવાસવાઃ ।
તસ્મૈ વૃત્તં કથય સ્વં સ વઃ કાર્યં કરિષ્યતિ ॥ ૧૨॥

નન્દીશ્વર ઉવાચ ।
તચ્છ્રુત્વા તે સમાલોચ્ય જગ્મુર્વિધિસભાં સુરાઃ ।
સર્વં નિવેદયામાસુસ્તદ્વૃત્તં પુરતો વિધેઃ ॥ ૧૩॥

અવોચત્તાન્વિધિઃ શ્રુત્વા તદ્વચઃ સુવિચિન્ત્ય વૈ ।
નાહં કરિષ્યે તન્નિન્દાં દુઃખદાં કહરાં સદા ॥ ૧૪॥

સુરા ગચ્છત કૈલાસં સન્તોષયત શઙ્કરમ્ ।
પ્રસ્થાપયત તં દેવં હિમાલયગૃહં પ્રતિ ॥ ૧૫॥

સ ગચ્છેદથ શૈલેશમાત્મનિન્દાં કરોતુ વૈ ।
પરનિન્દા વિનાશાય સ્વનિન્દા યશસે મતા ॥ ૧૬॥

નન્દીશ્વર ઉવાચ ।
તતસ્તે પ્રયયુઃ શીઘ્રં કૈલાસં નિખિલાઃ સુરાઃ ।
સુપ્રણમ્ય શિવં ભક્ત્યા તદ્વૃત્તં નિખિલા જગુઃ ॥ ૧૭॥

તચ્છ્રુત્વા દેવવચનં સ્વીચકાર મહેશ્વરઃ ।
દેવાન્સુયાપયામાસ તાનાશ્વાસ્ય વિહસ્ય સઃ ॥ ૧૮॥

તતઃ સ ભગવાઞ્છમ્ભુર્મહેશો ભક્તવત્સલઃ ।
ગન્તુમૈચ્છચ્છૈલમૂલં માયેશો ન વિકારવાન્ ॥ ૧૯॥

દણ્ડી છત્રી દિવ્યવાસા બિભ્રત્તિલકમુજ્જ્વલમ્ ।
કરે સ્ફટિકમાલાં ચ શાલગ્રામં ગલે દધત્ ॥ ૨૦॥

જપન્નામ હરેર્ભક્ત્યા સાધુવેષધરો દ્વિજઃ ।
હિમાચલં જગામાશુ બન્ધુવર્ગૈઃ સર્મન્વિતમ્ ॥ ૨૧॥

તં ચ દૃષ્ટ્વા સમુત્તસ્થૌ સગણોઽપિ હિમાલયઃ ।
નનામ દણ્ડવદ્ભૂમૌ સાષ્ટાઙ્ગં વિધિપૂર્વકમ્ ॥ ૨૨॥

તતઃ પપ્રચ્છ શૈલેશસ્તં દ્વિજં કો ભવાનિતિ ।
ઉવાચ શીઘ્રં વિપ્રેન્દ્રઃ સ યોગ્યદ્રિં મહાદરાત્ ॥ ૨૩॥

સાધુદ્વિજ ઉવાચ ।
સાધુદ્વિજાહ્વઃ શૈલાહં વૈષ્ણવઃ પરમાર્થદૃક્ ।
પરોપકારી સર્વજ્ઞઃ સર્વગામી ગુરોર્બલાત્ ॥ ૨૪॥

મયા જ્ઞાતં સ્વવિજ્ઞાનાત્સ્વસ્થાને શૈલસત્તમ ।

તચ્છૃણુ પ્રીતિતો વચ્મિ હિત્વા દમ્ભં તવાન્તિકમ્ ॥ ૨૫॥

શઙ્કરાય સુતાં દાતું ત્વમિચ્છસિ નિજોદ્ભવામ્ ।
ઇમાં પદ્માસમાં રમ્યામજ્ઞાતકુલશીલિને ॥ ૨૬॥

ઇયં મતિસ્તે શૈલેન્દ્ર ન યુક્તા મઙ્ગલપ્રદા ।
નિબોધ જ્ઞાનિનાં શ્રેષ્ઠ નારાયણકુલોદ્ભવ ॥ ૨૭॥

પશ્ય શૈલાધિપત્વં ચ ન તસ્યૈકોઽસ્તિ બાન્ધવઃ ।
બાન્ધવાન્સ્વાન્પ્રયત્નેન પૃચ્છ મેનાં ચ સ્વપ્રિયામ્ ॥ ૨૮॥

સર્વાન્સમ્પૃચ્છ યત્નેન મેનાદીન્પાર્વતીં વિના ।
રોગિણે નૌષધં શૈલ કુપથ્યં રોચતે સદા ॥ ૨૯॥

ન તે પાત્રાનુરૂપશ્ચ પાર્વતીદાનકર્મણિ ।
મહાજનઃ સ્મેરમુખઃ શ્રુતિમાત્રાદ્ભવિષ્યતિ ॥ ૩૦॥

નિરાશ્રયઃ સદાસઙ્ગો વિરૂપો નિર્ગુણોઽવ્યયઃ ।
સ્મશાનવાસી વિકટો વ્યાલગ્રાહી દિગમ્બરઃ ॥ ૩૧॥

વિભૂતિભૂષણો વ્યાલવરાવેષ્ટિતમસ્તકઃ ।
સર્વાશ્રમપરિભ્રષ્ટસ્ત્વવિજ્ઞાતગતિસ્સદા ॥ ૩૨॥

બ્રહ્મોવાચ ।
ઇત્યાદ્યુક્ત્વા વચસ્તથ્યં શિવનિન્દાપરં સ હિ ।
જગામ સ્વાલયં શીઘ્રં નાનાલીલાકરઃ શિવઃ ॥ ૩૩॥

તચ્છ્રુત્વા વિપ્રવચનમભૂતાં ચ તનૂ તયોઃ ।
વિપરીતાનર્થપરે કિં કરિષ્યાવહે ધ્રુવમ્ ॥ ૩૪॥

તતો રુદ્રો મહોતિં ચ કૃત્વા ભક્તમુદાવહામ્ ।
વિવાહયિત્વા ગિરિજાં દેવકાર્યં ચકાર સઃ ॥ ૩૫॥

ઇતિ પ્રોક્તસ્તુ તે તાત સાધુવેષો દ્વિજાહ્વયઃ ।
શિવાવતારો હિ મયા દેવકાર્યકરઃ પ્રભો ॥ ૩૬॥

ઇદમાખ્યાનમનઘં સ્વર્ગ્યમાયુષ્યમુત્તમમ્ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ સ સુખી ગતિમાપ્નુયાત્ ॥ ૩૭॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં સાધુદ્વિજશિવાવતારવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૩.૩૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૩૬. ષટ્ત્રિંશોઽધ્યાયઃ । અશ્વત્થામશિવાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ શિવસ્ય પરમાત્મનઃ ।
અવતારં શ‍ૃણુ વિભોરશ્વત્થામાહ્વયં પરમ્ ॥ ૧॥

બૃહસ્પતેર્મહાબુદ્ધેર્દેવર્ષેરંશતો મુને ।
ભરદ્વાજાત્સમુત્પન્નો દ્રોણોઽયોનિજ આત્મવાન્ ॥ ૨॥

ધનુર્ભૃતાં વરઃ શૂરો વિપ્રર્ષિઃ સર્વશાસ્ત્રવિત્ ।
બૃહત્કીર્તિર્મહાતેજા યઃ સર્વાસ્ત્રવિદુત્તમઃ ॥ ૩॥

ધનુર્વેદે ચ વેદે ચ નિષ્ણાતં યં વિદુર્બુધાઃ ।
વરિષ્ઠં ચિત્રકર્માણં દ્રોણં સ્વકુલવર્ધનમ્ ॥ ૪॥

કૌરવાણાં સ આચર્ય આસીત્સ્વબલતો દ્વિજ ।
મહારથિષુ વિખ્યાતઃ ષટ્સુ કૌરવમધ્યતઃ ॥ ૫॥

સાહાય્યાર્થં કૌરવાણાં સ તેપે વિપુલં તપઃ ।
શિવમુદ્દિશ્ય પુત્રાર્થં દ્રોણાચાર્યો દ્વિજોત્તમઃ ॥ ૬॥

તતઃ પ્રસન્નો ભગવાચ્છઙ્કરો ભક્તવત્સલઃ ।
આવિર્બભૂવ પુરતો દ્રોણસ્ય મુનિસત્તમ ॥ ૭॥

તં દૃષ્ટ્વા સ દ્વિજો દ્રોણસ્તુષ્ટાવાશુ પ્રણમ્ય તમ્ ।
મહાપ્રસન્નહૃદયો નતકઃ સુકૃતાઞ્જલિઃ ॥ ૮॥

તસ્ય સ્તુત્યા ચ તપસા સન્તુષ્ટઃ શઙ્કરઃ પ્રભુઃ ।
વરં બ્રૂહીતિ ચોવાચ દ્રોણં તં ભક્તવત્સલઃ ॥ ૯॥

તચ્છ્રુત્વા શમ્ભુવચનં દ્રોણઃ પ્રાહાથ સન્નતઃ ।
સ્વાંશજં તનયં દેહિ સર્વાજેયં મહાબલમ્ ॥ ૧૦॥

તચ્છ્રુત્વા દ્રોણવચનં શમ્ભુઃ પ્રોચે તથાસ્ત્વિતિ ।
અભૂદન્તર્હિતસ્તાત કૌતુકી સુખકૃન્મુને ॥ ૧૧॥

દ્રોણોઽપગચ્છત્સ્વં ધામ મહાહૃષ્ટો ગતભ્રમઃ ।
સ્વપત્ન્યૈ કથયામાસ તદ્વૃતં સકલં મુદા ॥ ૧૨॥

અથાવસરમાસાદ્ય રુદ્રઃ સર્વાન્તકઃ પ્રભુઃ ।
સ્વાંશેન તનયો જજ્ઞે દ્રોણસ્ય સ મહાબલઃ ॥ ૧૩॥

અશ્વત્થામેતિ વિખ્યાતઃ સ બભૂવ ક્ષિતૌ મુને ।
પ્રવીરઃ કઞ્જપત્રાક્ષઃ શત્રુપક્ષક્ષયઙ્કરઃ ॥ ૧૪॥

યો ભારતે રણે ખ્યાતઃ પિતુરાજ્ઞામવાપ્ય ચ ।
સહાયકૃદ્ બભૂવાત કૌરવાણાં મહાબલઃ ॥ ૧૫॥

યમાશ્રિત્ય મહાવીરં કૌરવાઃ સુમહાબલાઃ ।
ભીષ્માદયો બભૂવુસ્તેઽજેયા અપિ દિવૌકસામ્ ॥ ૧૬॥

યદ્ભયાત્પાણ્ડવાઃ સર્વે કૌરવાઞ્જેતુમક્ષમાઃ ।
આસન્નષ્ટા મહાવીરા અપિ સર્વે ચ કોવિદાઃ ॥ ૧૭॥

કૃષ્ણોપદેશતઃ શમ્ભોસ્તપઃ કૃત્વાતિદારુણમ્ ।
પ્રાપ્ય ચાસ્ત્રં શમ્ભુવરાજ્જિગ્યે તાનર્જુનસ્તતઃ ॥ ૧૮॥

અશ્વત્થામા મહાવીરો મહાદેવાંશજો મુને ।
તથાપિ તદ્ભક્તિવશઃ સ્વપ્રતાપમદર્શયત્ ॥ ૧૯॥

વિનાશ્ય પાણ્ડવસુતાન્ શિક્ષિતાનપિ યત્નતઃ ।
કૃષ્ણાદિભિર્મહાવીરૈરનિવાર્યબલઃ પરૈઃ ॥ ૨૦॥

પુત્રશોકેન વિકલમાપતન્તં તમર્જુનમ્ ।
રથેનાચ્યુતવન્તં હિ દૃષ્ટ્વા સ ચ પરાદ્રવત્ ॥ ૨૧॥

અસ્ત્રં બ્રહ્મશિરો નામ તદુપર્યસૃજત્સ હિ ।
તતઃ પ્રાદુરભૂત્તેજઃ પ્રચણ્ડં સર્વતો દિશમ્ ॥ ૨૨॥

પ્રાણાપદમભિપ્રેક્ષ્ય સોઽર્જુનઃ ક્લેશસંયુતઃ ।
ઉવાચ કૃષ્ણં વિક્લાન્તો નષ્ટતેજા મહાભયઃ ॥ ૨૩॥

અર્જુન ઉવાચ ।
કિમિદં સ્વિત્કુતો વેતિ કૃષ્ણ કૃષ્ણ ન વેદ્મ્યહમ્ ।

સર્વતોમુખમાયાતિ તેજશ્ચેદં સુદુસ્સહમ્ ॥ ૨૪॥

નન્દીશ્વર ઉવાચ ।
શ્રુત્વાર્જુનવચશ્ચેદં સ કૃષ્ણઃ શૈવસત્તમઃ ।
દધ્યૌ શિવં સદારં ચ પ્રત્યાહાર્જુનમાદરાત્ ॥ ૨૫॥

શ્રીકૃષ્ણ ઉવાચ ।
વેત્થેદં દ્રોણપુત્રસ્ય બ્રાહ્મમસ્ત્રં મહોલ્બણમ્ ।
ન હ્યસ્યાન્યતમં કિઞ્ચિદસ્ત્રં પ્રત્યવકર્શનમ્ ॥ ૨૬॥

શિવં સ્મર દ્રુતં શમ્ભું સ્વપ્રભું ભક્તરક્ષકમ્ ।
યેન દત્તં હિ તે સ્વાસ્ત્રં સર્વકાર્યકરં પરમ્ ॥ ૨૭॥

જહ્યસ્ત્રતેજ ઉન્નદ્ધં ત્વં તચ્છૈવાસ્ત્રતેજસા ।
ઇત્યુક્ત્વા ચ સ્વયં કૃષ્ણઃ શિવં દધ્યૌ તદર્થકઃ ॥ ૨૮॥

તચ્છ્રુત્વા કૃષ્ણવચનં પાર્થઃ સ્મૃત્વા શિવં હૃદિ ।
સ્પૃષ્ટ્વાપસ્તં પ્રણમ્યાશુ ચિક્ષેપાસ્ત્રં તતો મુને ॥ ૨૯॥

યદ્યપ્યસ્ત્રં બ્રહ્મશિરસ્ત્વમોઘં ચાપ્રતિક્રિયમ્ ।
શૈવાસ્ત્રતેજસા સદ્યઃ સમશામ્યન્મહામુને ॥ ૩૦॥

મા મંસ્થા હ્યેતદાશ્ચર્યં સર્વચિત્રમયે શિવે ।
યઃ સ્વશક્ત્યાખિલં વિશ્વં સૃજત્યવતિ હન્ત્યજઃ ॥ ૩૧॥

અશ્વત્થામા તતો જ્ઞાત્વા વૃત્તમેતચ્છિવાંશજઃ ।
શૈવં ન વિવ્યથે કિઞ્ચિચ્છિવેચ્છાતુષ્ટધીર્મુને ॥ ૩૨॥

અથ દ્રૌણિરિદં વિશ્વં કૃત્સ્નં કર્તુમપાણ્ડવમ્ ।
ઉત્તરાગર્ભગં બાલં નાશિતું મન આદધે ॥ ૩૩॥

બ્રહ્માસ્ત્રમનિવાર્યં તદન્યૈરસ્ત્રૈર્મહાપ્રભમ્ ।
ઉત્તરાગર્ભમુદ્દિશ્ય ચિક્ષેપ સ મહાપ્રભુઃ ॥ ૩૪॥

તતશ્ચ સોત્તરા જિષ્ણુવધૂર્વિકલમાનસા ।
કૃષ્ણં તુષ્ટાવ લક્ષ્મીશં દહ્યમાના તદસ્ત્રતઃ ॥ ૩૫॥

તતઃ કૃષ્ણઃ શિવં ધ્યાત્વા હૃદા નુત્વા પ્રણમ્ય ચ ।
અપાણ્ડવમિદં કર્તું દ્રૌણેરસ્ત્રમબુધ્યત ॥ ૩૬॥

સ્વરક્ષાર્થેન્દ્રદત્તેન તદસ્ત્રેણ સુવર્ચસા ।

સુદર્શનેન તસ્યાશ્ચ વ્યધાદ્રક્ષાં શિવાજ્ઞયા ॥ ૩૭॥

સ્વરૂપં શઙ્કરાદેશાત્કૃતં શૈવવરેણ હ ।
કૃષ્ણેન ચરિતં જ્ઞાત્વા વિમનસ્કઃ શનૈરભૂત્ ॥ ૩૮॥

તતઃ સ કૃષ્ણઃ પ્રીતાત્મા પાણ્ડવાન્સકલાનપિ ।
અપાતયત્તદઙ્ઘ્યોસ્તુ તુષ્ટયે તસ્ય શૈવરાટ્ ॥ ૩૯॥

અથ દ્રૌણિઃ પ્રસન્નાત્મા પાણ્ડવાન્કૃષ્ણમેવ ચ ।
નાનાવરાન્દદૌ પ્રીત્યા સોઽશ્વત્થામાનુગૃહ્ય ચ ॥ ૪૦॥

ઇત્થં મહેશ્વરસ્તાત ચક્રે લીલાં પરાં પ્રભુઃ ।
અવતીર્ય ક્ષિતૌ દ્રૌણિરૂપેણ મુનિસત્તમ ॥ ૪૧॥

શિવાવતારોઽશ્વત્થામા મહાબલપરાક્રમઃ ।
ત્રૈલોક્યસુખદોઽદ્યાપિ વર્તતે જાહ્નવીતટે ॥ ૪૨॥

અશ્વત્થામાવતારસ્તે વર્ણિતઃ શઙ્કરપ્રભોઃ ।
સર્વસિદ્ધિકરશ્ચાપિ ભક્તાભીષ્ટફલપ્રદઃ ॥ ૪૩॥

ય ઇદં શ‍ૃણુયાદ્ભક્ત્યા કીર્તયેદ્વા સમાહિતઃ ।
સ સિદ્ધિં પ્રાપ્નુયાદિષ્ટામન્તે શિવપુરં વ્રજેત્ ॥ ૪૪॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયામશ્વત્થામશિવાવતારવર્ણનં નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૩.૩૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૩૭. સપ્તત્રિંશોઽધ્યાયઃ । વ્યાસોપદેશવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
શ‍ૃણુ પ્રાજ્ઞ કિરાતાખ્યમવતારં પિનાકિનઃ ।
મૂકં ચ હતવાન્પ્રીતો યોઽર્જુનાય વરં દદૌ ॥ ૧॥

સુયોધનજિતાસ્તે વૈ પાણ્ડવાઃ પ્રવરાશ્ચ તે ।
દ્રૌપદ્યા ચ તયા સાધ્વ્યા દ્વૈતાખ્યં વનમાયયુઃ ॥ ૨॥

તત્રૈવ સૂર્યદત્તાં વૈ સ્થાલીં ચાશ્રિત્ય તે તદા ।

કાલં ચ વાહયામાસુઃ સુખેન કિલ પાણ્ડવાઃ ॥ ૩॥

છલાર્થં પ્રેરિતસ્તેન દુર્વાસા મુનિપુઙ્ગવઃ ।
સુયોધનેન વિપ્રેન્દ્ર પાણ્ડવાન્તિકમાદરાત્ ॥ ૪॥

છાત્રૈઃ સ્વૈર્વાયુતૈઃ સાર્ધં યયાચે તત્ર તાન્મુદા ।
ભોજ્યં ચિત્તેપ્સિતં વૈ સ તેભ્યશ્ચૈવ સમાગતઃ ॥ ૫॥

સ્વીકૃત્ય પાણ્ડવૈસ્તૈસ્તૈઃ સ્નાનાર્થં પ્રેષિતાસ્તદા ।
દુર્વાસઃપ્રમુખાશ્ચૈવ મુનયશ્ચ તપસ્વિનઃ ॥ ૬॥

અથ તે પાણ્ડવાઃ સર્વે અન્નાભાવાન્મુનીશ્વર ।
દુઃખિતાશ્ચ તદા પ્રાણાંસ્ત્યક્તું ચિત્તે સમાદધુઃ ॥ ૭॥

દ્રૌપદ્યા ચ સ્મૃતઃ કૃષ્ણ આગતસ્તત્ક્ષણાદપિ ।
શાકં ચ ભક્ષયિત્વા તુ તેષાં તૃપ્તિં સમાદધત્ ॥ ૮॥

દુર્વાસાશ્ચ તદા શિષ્યાંસ્તૃપ્તાન્ જ્ઞાત્વા યયૌ પુનઃ ।
પાણ્ડવાઃ કૃચ્છ્રનિર્મુક્તાઃ કૃષ્ણસ્ય કૃપયા તદા ॥ ૯॥

અથ તે પાણ્ડવાઃ કૃષ્ણં પપ્રચ્છુઃ કિં ભવિષ્યતિ ।
બલવાન્ શત્રુરુત્પન્નઃ કિં કાર્યં તદ્વદ પ્રભો ॥ ૧૦॥

નન્દીશ્વર ઉવાચ ।
ઇતિ પૃષ્ટસ્તદા તૈસ્તુ શ્રીકૃષ્ણઃ પાણ્ડવૈર્મુને ।
સ્મૃત્વા શિવપદામ્ભોજૌ પાણ્ડવાનિદમબ્રવીત્ ॥ ૧૧॥

શ્રીકૃષ્ણ ઉવાચ ।
શ્રૂયતાં પાણ્ડવાઃ શ્રેષ્ઠાઃ શ્રુત્વા કર્તવ્યમેવ હિ ।
મદ્વૃત્તાન્તં વિશેષેણ શિવસેવાસમન્વિતમ્ ॥ ૧૨॥

દ્વારકાં ચ મયા ગત્વા શત્રૂણાં વિજિગીષયા ।
વિચાર્ય ચોપદેશાંશ્ચ હ્યુપમન્યોર્મહાત્મનઃ ॥ ૧૩॥

મયા હ્યારાધિતઃ શમ્ભુઃ પ્રસન્નઃ પરમેશ્વરઃ ।
બટુકે પર્વતશ્રેષ્ઠે સપ્તમાસં સુસેવિતઃ ॥ ૧૪॥

ઇષ્ટાન્કામાનદાન્મહ્યં વિશ્વેશશ્ચ સ્વયં સ્થિતઃ ।
તત્પ્રભાવાન્મયા સર્વસામર્થ્યં લબ્ધમુત્તમમ્ ॥ ૧૫॥

ઇદાનીં સેવ્યતે દેવો ભુક્તિમુક્તિફલપ્રદઃ ।

યૂયં સેવત તં શમ્ભુમપિ સર્વસુખાવહમ્ ॥ ૧૬॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વાન્તર્દધે કૃષ્ણ આશ્વાસ્યાથ ચ પાણ્ડવાન્ ।
દ્વારકામગમચ્છીઘ્રં સ્મરન્ શિવપદામ્બુજમ્ ॥ ૧૭॥

પાણ્ડવા અથ ભિલ્લં ચ પ્રેષયામાસુરોજસા ।
ગુણાનાં ચ પરીક્ષાર્થં તસ્ય દુર્યોધનસ્ય ચ ॥ ૧૮॥

સોઽપિ સર્વં ચ તત્રત્યં દુર્યોધનગુણોદયમ્ ।
સમીચીનં ચ તજ્જ્ઞાત્વા પુનઃ પ્રાપ પ્રભૂન્પ્રતિ ॥ ૧૯॥

તદુક્તં તે નિશમ્યૈવં દુઃખં પ્રાપુર્મુનીશ્વર ।
પરસ્પરં સમૂચુસ્તે પાણ્ડવા અતિદુઃખિતાઃ ॥ ૨૦॥

કિં કર્તવ્યં ક્વ ગન્તવ્યમસ્માભિરધુના યુધિ ।
સમર્થા અપિ વૈ સર્વે સત્યપાશેન યન્ત્રિતાઃ ॥ ૨૧॥

નન્દીશ્વર ઉવાચ ।
એતસ્મિન્સમયે વ્યાસો ભસ્મભૂષિતમસ્તકઃ ।
રુદ્રાક્ષાભરણશ્ચાયાજ્જટાજૂટવિભૂષિતઃ ॥ ૨૨॥

પઞ્ચાક્ષરં જપન્મન્ત્રં શિવપ્રેમસમાકુલઃ ।
તેજસાં ચ સ્વયંરાશિઃ સાક્ષાદ્ધર્મ ઇવાપરઃ ॥ ૨૩॥

તં દૃષ્ટ્વા તે તદા પ્રીતા ઉત્થાય પુરતઃ સ્થિતાઃ ।
દત્ત્વાસનં તદા તસ્મૈ કુશાજિનસુશોભિતમ્ ॥ ૨૪॥

તત્રોપવિષ્ટં તં વ્યાસં પૂજયન્તિ સ્મ હર્ષિતાઃ ।
સ્તુતિં ચ વિવિધાં કૃત્વા ધન્યાઃ સ્મ ઇતિ વાદિનઃ ॥ ૨૫॥

તપશ્ચૈવ સુસન્તપ્તં દાનાનિ વિવિધાનિ ચ ।
તત્સર્વં સફલં જાતં તૃપ્તાસ્તે દર્શનાત્પ્રભો ॥ ૨૬॥

દુઃખં ચ દૂરતો જાતં દર્શનાત્તે પિતામહ ।
દુષ્ટૈશ્ચૈવ મહાદુઃખં દત્તં નઃ ક્રૂરકર્મભિઃ ॥ ૨૭॥

શ્રીમતાં દર્શને જાતે દુઃખં ચૈવ ગમિષ્યતિ ।
કદાચિન્ન ગતં તત્ર નિશ્ચયોઽયં વિચારિતઃ ॥ ૨૮॥

મહતામાશ્રમે પ્રાપ્તે સમર્થે સર્વકર્મણિ ।

યદિ દુઃખં ન ગચ્છેત્તુ દૈવમેવાત્ર કારણમ્ ॥ ૨૯॥

નિશ્ચયેનૈવ ગચ્છેત્તુ દારિદ્યં દુઃખકારણમ્ ।
મહતાં ચ સ્વભાવોઽયં કલ્પવૃક્ષસમો મતઃ ॥ ૩૦॥

તદ્ગુણાનેવ ગણયન્મહતો વસ્તુમાત્રતઃ ।
આશ્રયસ્ય વશાદેવ પુંસો વૈ જાયતે પ્રભો ॥ ૩૧॥

લઘુત્વં ચ મહત્ત્વં ચ નાત્ર કાર્યા વિચારણા ।
ઉત્તમાનાં સ્વભાવોઽયં યદ્દીનપ્રતિપાલનમ્ ॥ ૩૨॥

રઙ્કસ્ય લક્ષણં લોકે હ્યતિશ્રેયસ્કરં મતમ્ ।
પુરોઽસ્ય પરયત્નો વૈ સુજનાનાં ચ સેવનમ્ ॥ ૩૩॥

અતઃ પરં ચ ભાગ્યં વૈ દોષશ્ચૈવ ન દીયતામ્ ।
એતસ્માત્કારણાત્સ્વામિંસ્ત્વયિ દૃષ્ટો શુભં તદા ॥ ૩૪॥

ત્વદાગમનમાત્રેણ સન્તુષ્ટાનિ મનાંસિ નઃ ।
દિશોપદેશં યેનાશુ દુઃખં નષ્ટં ભવેચ્ચ નઃ ॥ ૩૫॥

નન્દીશ્વર ઉવાચ ।
ઇત્યેતદ્વચનં શ્રુત્વા પાણ્ડવાનાં મહામુનિઃ ।
પ્રસન્નમાનસો ભૂત્વા વ્યાસશ્ચૈવાબ્રવીદિદમ્ ॥ ૩૬॥

હે પાણ્ડવાશ્ચ યૂયં વૈ ન કષ્ટં કર્તુમર્હથ ।
ધન્યાઃ સ્થ કૃતકૃત્યાઃ સ્થ સત્યં નૈવ વિલોપિતમ્ ॥ ૩૭॥

સુજનાનાં સ્વભાવોઽયં પ્રાણાન્તેઽપિ સુશોભનઃ ।
ધર્મં ત્યજન્તિ નૈવાત્ર સત્યં સફલભાજનમ્ ॥ ૩૮॥

અસ્માકં ચૈવ યૂયં ચ તે ચાપિ સમતાં ગતાઃ ।
તથાપિ પક્ષપાતો વૈ ધર્મિષ્ઠાનાં મતો બુધૈઃ ॥ ૩૯॥

ધૃતરાષ્ટ્રેન દુષ્ટેન પ્રથમં ચ હ્યચક્ષુષા ।
ધર્મસ્ત્યક્તઃ સ્વયં લોભાદ્યુષ્માકં રાજ્યમાહૃતમ્ ॥ ૪૦॥

તસ્ય યૂયં ચ તે ચાપિ પુત્રા એવ ન સંશયઃ ।
પિતર્યપરતે બાલા અનુકમ્પ્યા મહાત્મનઃ ॥ ૪૧॥

પશ્ચાત્પુત્રશ્ચ તેનૈવ વારિતો ન કદાચન ।
અનર્થો નૈવ જાયેત યચ્ચૈવં ચ કૃતં તદા ॥ ૪૨॥

અતઃ પરં ચ યજ્જાતં તજ્જાતં નાન્યથા ભવેત્ ।
અયં દુષ્ટો ભવન્તશ્ચ ધર્મિષ્ઠાઃ સત્યવાદિનઃ ॥ ૪૩॥

તસ્માદન્તે ચ તસ્યૈવાશુભં હિ ભવિતા ધ્રુવમ્ ।
યચ્ચૈવ વાપિતં બીજં તત્પ્રરોહો ભવેદિહ ॥ ૪૪॥

તસ્માદ્દુઃખં ન કર્તવ્યં ભવદ્ભિઃ સર્વથા ધ્રુવમ્ ।
ભવિષ્યતિ શુભં વો હિ નાત્ર કાર્યા વિચારણા ॥ ૪૫॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા પાણ્ડવાઃ સર્વે તેન વ્યાસેન પ્રીણિતાઃ ।
યુધિષ્ઠિરમુખાસ્તે ચ પુનરેવાબ્રુવન્વચઃ ॥ ૪૬॥

પાણ્ડવા ઊચુઃ ।
સત્યમુક્તં ત્વયા નાથ દુષ્ટૈર્દુઃખં નિરન્તરમ્ ।
દુષ્ટાત્મભિર્વને ચાપિ દીયતે હિ મુહુર્મુહુઃ ॥ ૪૭॥

તન્નાશયાશુભં મેઽદ્ય કિઞ્ચિદ્દેયં શુભં વિભો ।
કૃષ્ણેન કથિતં પૂર્વમારાધ્યઃ શઙ્કરઃ સદા ॥ ૪૮॥

પ્રમાદશ્ચ કૃતોઽસ્માભિસ્તદ્વચઃ શિથિલીકૃતમ્ ।
સ દેવમાર્ગસ્તુ પુનરિદાનીમુપદિશ્યતામ્ ॥ ૪૯॥

નન્દીશ્વર ઉવાચ ।
ઇત્યેતદ્વચનં શ્રુત્વા વ્યાસો હર્ષસમન્વિતઃ ।
ઉવાચ પાણ્ડવાન્પ્રીત્યા સ્મૃત્વા શિવપદામ્બુજમ્ ॥ ૫૦॥

વ્યાસ ઉવાચ ।
શ્રૂયતાં વચનં મેઽદ્ય પાણ્ડવા ધર્મબુદ્ધયઃ ।
સત્યમુક્તં તુ કૃષ્ણેન મયા સંસેવ્યતે શિવઃ ॥ ૫૧॥

ભવદ્ભિઃ સેવ્યતાં પ્રીત્યા સુખં સ્યાદતુલં સદા ।
સર્વદુઃખં ભવત્યેવ શિવાસેવાત એવ હિ ॥ ૫૨॥

નન્દીશ્વર ઉવાચ ।
અથ પઞ્ચસુ તેષ્વેવ વિચાર્ય શિવપૂજને ।
અર્જુનં યોગ્યમુચ્ચાર્ય વ્યાસો મુનિવરસ્તથા ॥ ૫૩॥

તપઃસ્થાનં વિચાર્યૈવં તતઃ સ મુનિસત્તમઃ ।
પાણ્ડવાન્ધર્મસન્નિષ્ઠાન્પુનરેવાબ્રવીદિદમ્ ॥ ૫૪॥

વ્યાસ ઉવાચ ।
શ્રૂયતાં પાણ્ડવાઃ સર્વે કથયામિ હિતં સદા ।
શિવં સર્વ પરં દૃષ્ટ્વા પરં બ્રહ્મ સતાં ગતિમ્ ॥ ૫૫॥

બ્રહ્માદિત્રિપરાર્દ્ધાન્તં યત્કિઞ્ચિદ્ દૃશ્યતે જગત્ ।
તત્સર્વં શિવરૂપં ચ પૂજ્યં ધ્યેયં ચ તત્પુનઃ ॥ ૫૬॥

સર્વેષાં ચૈવ સેવ્યોઽસૌ શઙ્કરઃ સર્વદુઃખહા ।
શિવઃ સ્વલ્પેન કાલેન સમ્પ્રસીદતિ ભક્તિતઃ ॥ ૫૭॥

સુપ્રસન્નો મહેશો હિ ભક્તેભ્યઃ સકલપ્રદઃ ।
ભુક્તિં મુક્તિમિહામુત્ર યચ્છતીતિ સુનિશ્ચિતમ્ ॥ ૫૮॥

તસ્માત્સેવ્યઃ સદા શમ્ભુર્ભુક્તિમુક્તિફલેપ્સુભિઃ ।
પુરુષઃ શઙ્કરઃ સાક્ષાદ્ દૃષ્ટહન્તા સતાં ગતિઃ ॥ ૫૯॥

પરન્તુ પ્રથમં શક્રવિદ્યાં દૃઢમના જપેત્ ।
ક્ષત્રિયસ્ય પરાખ્યસ્ય ચેદમેવ સમાહિતમ્ ॥ ૬૦॥

અતોઽર્જુનશ્ચ પ્રથમં શક્રવિદ્યાં જપેદ્ દૃઢઃ ।
કરિષ્યતિ પરીક્ષાં પ્રાક્ સન્તુષ્ટસ્તદ્ભવિષ્યતિ ॥ ૬૧॥

સુપ્રસન્નશ્ચ વિઘ્નાનિ સંહરિષ્યતિ સર્વદા ।
પુનશ્ચૈવં શિવસ્યૈવ વરં મન્ત્રં પ્રદાસ્યતિ ॥ ૬૨॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વાર્જુનમાહૂયોપેન્દ્રવિદ્યામુપાદિશત્ ।
સ્નાત્વા ચ પ્રાઙ્મુખો ભૂત્વા જગ્રાહાર્જુન ઉગ્રધીઃ ॥ ૬૩॥

પાર્થિવસ્ય વિધાનં ચ તસ્મૈ મુનિવરો દદૌ ।
પ્રત્યુવાચ ચ તં વ્યાસો ધનઞ્જયમુદારધીઃ ॥ ૬૪॥

વ્યાસ ઉવાચ ।
ઇતો ગચ્છાધુના પાર્થ ઇન્દ્રકીલે સુશોભને ।
જાહ્નવ્યાશ્ચ સમીપે વૈ સ્થિત્વા સમ્યક્ તપઃ કુરુ ॥ ૬૫॥

અદૃશ્યા ચૈવ વિદ્યા સ્યાત્સદા તે હિતકારિણી ।

ઇત્યાશિષં દદૌ તસ્મૈ તતઃ પ્રોવાચ તાન્મુનિઃ ॥ ૬૬॥

ધર્મમાસ્થાય સર્વે વૈ તિષ્ઠન્તુ નૃપસત્તમાઃ ।
સિદ્ધિઃ સ્યાત્સર્વથા શ્રેષ્ઠા નાત્ર કાર્યા વિચારણા ॥ ૬૭॥

નન્દીશ્વર ઉવાચ ।
ઇતિ દત્ત્વાશિષં તેભ્યઃ પાણ્ડવેભ્યો મુનીશ્વરઃ ।
સ્મૃત્વા શિવપદામ્ભોજં વ્યાસશ્ચાન્તર્દધે ક્ષણાત્ ॥ ૬૮॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં કિરાતાવતારવર્ણન પ્રસઙ્ગેઽર્જુનાય વ્યાસોપદેશવર્ણનં નામ સપ્તત્રિંશોઽધ્યાયઃ ॥ ૩.૩૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૩૮. અષ્ટત્રિંશોઽધ્યાયઃ । કિરાતાવતારવર્ણનપ્રસઙ્ગેઽર્જુનતપોવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
અર્જુનોઽપિ તદા તત્ર દીપ્યમાનો વ્યદૃશ્યત ।
મન્ત્રેણ શિવરૂપેણ તેજશ્ચાતુલમાવહન્ ॥ ૧॥

તે સર્વે ચાર્જુનં દૃષ્ટ્વા પાણ્ડવા નિશ્ચયં ગતાઃ ।
જયોઽસ્માકં ધ્રુવં જાતં તેજશ્ચ વિપુલં યતઃ ॥ ૨॥

ઇદં કાર્યં ત્વયા સાધ્યં નાન્યેન ચ કદાચન ।
વ્યાસસ્ય વચનાદ્ભાતિ સફલં કુરુ જીવિતમ્ ॥ ૩॥

ઇતિ પ્રોચ્યાર્જુનં તે વૈ વિરહૌત્સુક્યકાતરાઃ ।
અનિચ્છન્તોઽપિ તત્રૈવ પ્રેષયામાસુરાદરાત્ ॥ ૪॥

દ્રૌપદી દુઃખસંયુક્તા નેત્રાશ્રૂણિ નિરુધ્ય ચ ।
પ્રેષયન્તી શુભં વાક્યં તદોવાચ પતિવ્રતા ॥ ૫॥

દ્રૌપદ્યુવાચ ।
વ્યાસોપદિષ્ટં યદ્રાજંસ્ત્વયા કાર્યં પ્રયત્નતઃ ।
શુભપ્રદોઽસ્તુ તે પન્થાઃ શકરઃ શં કરોતુ વૈ ॥ ૬॥

તે સર્વે ચાવસંસ્તત્ર વિસૃજ્યાર્જુનમાદરાત્ ।
અત્યન્તદુઃખમાપન્ના મિલિત્વા પઞ્ચ એવ ચ ॥ ૭॥

સ્થિતાસ્તત્ર વદન્તિ સ્મ શ્રૂયતામૃષિસત્તમ ।
દુઃખેઽપિ પ્રિયસઙ્ગો વૈ ન દુઃખાય પ્રજાયતે ॥ ૮॥

વિયોગે દ્વિગુણં તસ્ય દુઃખં ભવતિ નિત્યશઃ ।
તત્ર ધૈર્યધરસ્યાપિ કથં ધૈર્યં ભવેદિહ ॥ ૯॥

નન્દીશ્વર ઉવાચ ।
કુર્વત્સ્વેવ તદા દુઃખમ્પાણ્ડવેષુ મુનીશ્વરઃ ।
કૃપાસિન્ધુશ્ચ સ વ્યાસ ઋષિવર્યઃ સમાગત ॥ ૧૦॥

તં તદા પાણ્ડવાસ્તે વૈ નત્વા સમ્પૂજ્ય ચાદરાત્ ।
દત્ત્વાસનં હિ દુઃખાઢ્યાઃ કરૌ બધ્વા વચોઽબ્રુવન્ ॥ ૧૧॥

પાણ્ડવા ઊચુઃ ।
શ્રૂયતામૃષભશ્રેષ્ઠ દુઃખદગ્ધા વયં પ્રભો ।
દર્શનં તેઽદ્ય સમ્પ્રાપ્ય હ્યાનન્દં પ્રાપ્નુમો મુને ॥ ૧૨॥

કિયત્કાલં વસાત્રૈવ દુઃખનાશાય નઃ પ્રભો ।
દર્શનાત્તવ વિપ્રર્ષે સર્વં દુઃખં વિલીયતે ॥ ૧૩॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તઃ સ ઋષિશ્રેષ્ઠો ન્યવસત્તત્સુખાય વૈ ।
કથાભિર્વિવિધાભિશ્ચ તદ્દુઃખં નોદયંસ્તદા ॥ ૧૪॥

વાર્તાયાં ક્રિયમાણાયાં તેન વ્યાસેન સન્મુને ।
સુપ્રણમ્ય વિનીતાત્મા ધર્મરાજોઽબ્રવીદિદમ્ ॥ ૧૫॥

ધર્મરાજ ઉવાચ ।
શૃણુ ત્વં હિ ઋષિશ્રેષ્ઠ દુઃખશાન્તિર્મતા મમ ।
પૃચ્છામિ ત્વાં મહાપ્રાજ્ઞ કથનીયં ત્વયા પ્રભો ॥ ૧૬॥

ઈદૃશં ચૈવ દુઃખં ચ પુરા પ્રાપ્તશ્ચ કશ્ચન ।
વયમેવ પરં દુઃખં પ્રાપ્તા વૈ નૈવ કશ્ચન ॥ ૧૭॥

વ્યાસ ઉવાચ ।
રાજ્ઞસ્તુ નલનામ્નો વૈ નિષધાધિપતેઃ પુરા ।

ભવદ્દુઃખાધિકં દુઃખં જાતં તસ્ય મહાત્મનઃ ॥ ૧૮॥

હરિશ્ચન્દ્રસ્ય નૃપતેર્જાતં દુઃખં મહત્તરમ્ ।
અકથ્યં તદ્વિશેષેણ પરશોકાવહં તથા ॥ ૧૯॥

દુઃખં તથૈવ વિજ્ઞેયં રામસ્યાપ્યથ પાણ્ડવ ।
યચ્છ્રુત્વા સ્ત્રીનરાણાં ચ ભવેન્મોહો મહત્તરઃ ॥ ૨૦॥

તસ્માદ્વર્ણયિતું નૈવ શક્યતે હિ મયા પુનઃ ।
શરીરં દુઃખરાશિં ચ મત્વા ત્યાજ્યં ત્વયાધુના ॥ ૨૧॥

યેનેદં ચ ધૃતં તેન વ્યાપ્તમેવ ન સંશયઃ ।
પ્રથમં માતૃગર્ભે વૈ જન્મ દુઃખસ્ય કારણમ્ ॥ ૨૨॥

કૌમારેઽપિ મહાદુઃખં બાલલીલાનુસારિ યત્ ।
તતોઽપિ યૌવને કામાન્ભુઞ્જાનો દુઃખરૂપિણઃ ॥ ૨૩॥

ગતાગતૈર્દિનાનાં હિ કાર્યભારૈરનેકશઃ ।
આયુશ્ચ ક્ષીયતે નિત્યં ન જાનાતિ હ તત્પુનઃ ॥ ૨૪॥

અન્તે ચ મરણં ચૈવ મહાદુઃખમતઃ પરમ્ ।
નાનાનરકપીડાશ્ચ ભુજ્યન્તેઽજ્ઞૈર્નરૈસ્તદા ॥ ૨૫॥

તસ્માદિદમસત્યં ચ ત્વન્તુ સત્યં સમાચર ।
યેનૈવ તુષ્યતે શમ્ભુસ્તથા કાર્યં નરેણ ચ ॥ ૨૬॥

નન્દીશ્વર ઉવાચ ।
એવં વિવિધવાર્તાભિઃ કાલનિર્યાપણન્તદા ।
ચક્રુસ્તે ભ્રાતરઃ સર્વે મનોરથપથૈઃ પુનઃ ॥ ૨૭॥

અર્જુનોઽપિ સ્વયં ગચ્છન્દુર્ગાદ્રિષુ દૃઢવ્રતઃ ।
યક્ષં લબ્ધ્વા ચ તેનૈવ દસ્યૂન્નિઘ્નન્નનેકશઃ ॥ ૨૮॥

મનસા હર્ષસંયુક્તો જગામાચલમુત્તમમ્ ।
તત્ર ગત્વા ચ ગઙ્ગાયાઃ સમીપં સુન્દરં સ્થલમ્ ॥ ૨૯॥

અશોકકાનનં યત્ર તિષ્ઠતિ સ્વર્ગ ઉત્તમઃ ।
તત્ર તસ્થૌ સ્વયં સ્નાત્વા નત્વા ચ ગુરુમુત્તમમ્ ॥ ૩૦॥

યથોપદિષ્ટં વેષાદિ તથા ચૈવાકરોત્સ્વયમ્ ।
ઇન્દ્રિયાણ્યપકૃષ્યાદૌ મનસા સંસ્થિતોઽભવત્ ॥ ૩૧॥

પુનશ્ચ પાર્થિવં કૃત્વા સુન્દરં સમસૂત્રકમ્ ।
તદગ્રે પ્રણિદધ્યૌ સ તેજોરાશિમનુત્તમમ્ ॥ ૩૨॥

ત્રિકાલં ચૈવ સુસ્નાતઃ પૂજનં વિવિધં તદા ।
ચકારોપાસનં તત્ર હરસ્ય ચ પુનઃ પુનઃ ॥ ૩૩॥

તસ્યૈવ શિરસસ્તેજો નિસ્સૃતં તચ્ચરાસ્તદા ।
દૃષ્ટ્વા ભયં સમાપન્નાઃ પ્રવિષ્ટશ્ચ કદા હ્યયમ્ ॥ ૩૪॥

પુનસ્તે ચ વિચાર્યૈવં કથનીયં વિડૌજસે ।
ઇત્યુક્ત્વા તુ ગતાસ્તે વૈ શક્રસ્યાન્તિકમઞ્જસા ॥ ૩૫॥

ચરા ઊચુઃ ।
દેવો વાથ ઋષિશ્ચૈવ સૂર્યો વાથ વિભાવસુઃ ।
તપશ્ચરતિ દેવેશ ન જાનીમો વને ચ તમ્ ॥ ૩૬॥

તસ્યૈવ તેજસા દગ્ધા આગતાસ્તવ સન્નિધૌ ।
નિવેદિતઞ્ચરિત્રં તત્ક્રિયતામુચિતં તુ યત્ ॥ ૩૭॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તસ્તૈશ્ચરૈઃ સર્વં જ્ઞાત્વા પુત્રચિકીર્ષિતમ્ ।
સ ગોત્રપાન્વિસૃજ્યૈવ તત્ર ગન્તું મનો દધે ॥ ૩૮॥

સ વૃદ્ધબ્રાહ્મણો ભૂત્વા બ્રહ્મચારી શચીપતિઃ ।
જગામ તત્ર વિપ્રેન્દ્ર પરીક્ષાર્થં હિ તસ્ય વૈ ॥ ૩૯॥

તમાગતં તદા દૃષ્ટ્વાકાર્ષીત્પૂજાં ચ પાણ્ડવઃ ।
સ્થિતોઽગ્રે ચ સ્તુતિં કૃત્વા ક્વાયાતોઽસિ વદાધુના ॥ ૪૦॥

ઇત્યુક્તસ્તેન દેવેશો ધૈર્યાર્થં તસ્ય પ્રીતિતઃ ।
પરીક્ષાગર્ભિતં વાક્યં પાણ્ડવન્તં તતોઽબ્રવીત્ ॥ ૪૧॥

બ્રાહ્મણ ઉવાચ ।
નવે વયસિ વૈ તાત કિન્તપસ્યસિ સામ્પ્રતમ્ ।
મુક્ત્યર્થં વા જયાર્થં કિં સર્વથૈતત્તપસ્તવ ॥ ૪૨॥

નન્દીશ્વર ઉવાચ ।
ઇતિ પૃષ્ટસ્તદા તેન સર્વં સંવેદિતં પુનઃ ।

તચ્છ્રુત્વા સ પુનર્વાક્યમુવાચ બ્રાહ્મણસ્તદા ॥ ૪૩॥

બ્રાહ્મણ ઉવાચ ।
યુક્તં ન ક્રિયતે વીર સુખં પ્રાપ્તું ચ યત્તપઃ ।
ક્ષાત્રધર્મેણ ક્રિયતે મુક્ત્યર્થં કુરુસત્તમ ॥ ૪૪॥

ઇન્દ્રસ્તુ સુખદાતા વૈ મુક્તિદાતા ભવેન્ન હિ ।
તસ્માત્ત્વં સર્વથા શ્રેષ્ઠ કર્તુમર્હસિ સત્તપઃ ।
નન્દીશ્વર ઉવાચ ।
ઇદં તદ્વચનં શ્રુત્વા ક્રોધં ચક્રેઽર્જુનસ્તદા ।
પ્રત્યુવાચ વિનીતાત્મા તદનાદૃત્ય સુવ્રતઃ ॥ ૪૬॥

અર્જુન ઉવાચ ।
રાજ્યાર્થં ન ચ મુક્ત્યર્થ કિમર્થં ભાષસે ત્વિદમ્ ।
વ્યાસસ્ય વચનેનૈવ ક્રિયતે તપ ઇદૃશમ્ ॥ ૪૭॥

ઇતો ગચ્છ બ્રહ્મચારિન્માં પાતયિતુમિચ્છસિ ।
પ્રયોજનં કિમત્રાસ્તિ તવ વૈ બ્રહ્મચારિણઃ ॥ ૪૮॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તઃ સ પ્રસન્નોઽભૂત્સુન્દરં રૂપમદ્ભુતમ્ ।
સ્વોપસ્કરણસંયુક્તં દર્શયામાસ વૈ નિજમ્ ॥ ૪૯॥

શક્રરૂપં તદા દૃષ્ટ્વા લજ્જિતશ્ચાર્જુનસ્તદા ।
સ ઇન્દ્રસ્તં સમાશ્વાસ્ય પુનરેવ વચોઽબ્રવીત્ ॥ ૫૦॥

ઇન્દ્ર ઉવાચ ।
વરં વૃણીષ્વ હે તાત ધનઞ્જય મહામતે ।
યદિચ્છસિ મનોઽભીષ્ટં નાદેયં વિદ્યતે તવ ॥ ૫૧॥

તચ્છ્રુત્વા શક્રવચનં પ્રત્યુવાચાર્જુનસ્તદા ।
વિજયં દેહિ મે તાત શત્રુક્લિષ્ટસ્ય સર્વથા ॥ ૫૨॥

શક્ર ઉવાચ ।
બલિષ્ઠાઃ શત્રવસ્તે ચ દુર્યોધનપુરઃસરાઃ ।
દ્રોણો ભીમશ્ચ કર્ણશ્ચ સર્વે તે દુર્જયા ધ્રુવમ્ ॥ ૫૩॥

અશ્વત્થામા દ્રોણપુત્રો રૌદ્રોંઽશો દુર્જયોઽતિ સઃ ।
મયાસાધ્યા ભવેયુસ્તે સર્વથા સ્વહિતં શ‍ૃણુ ॥ ૫૪॥

એતદ્વીર જયં કર્તું ન શક્તઃ કશ્ચનાધુના ।
વર્તતે હિ શિવો વર્યસ્તસ્માચ્છમ્ભોર્જપોઽધુના ॥ ૫૫॥

શઙ્કરઃ સર્વલોકેશશ્ચરાચરપતિઃ સ્વરાટ્ ।
સર્વં કર્તું સમર્થોઽસ્તિ ભુક્તિમુક્તિફલપ્રદઃ ॥ ૫૬॥

અહમ્મન્યે ચ બ્રહ્માદ્યા વિષ્ણુઃ સર્વવરપ્રદઃ ।
અન્યે જિગીષવો યે ચ તે સર્વે શિવપૂજકાઃ ॥ ૫૭॥

અદ્યપ્રભૃતિ તન્મન્ત્રં હિત્વા ભક્ત્યા શિવં ભજ ।
પાર્થિવેન વિધાનેન ધ્યાનેનૈવ શિવસ્ય ચ ॥ ૫૮॥

ઉપચારૈરનેકૈશ્ચ સર્વભાવેન ભારત ।
સિદ્ધિઃ સ્યાદચલા તેઽદ્ય નાત્ર કાર્યા વિચારણા ॥ ૫૯॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા ચ ચરાન્સર્વાન્સમાહૂયાબ્રવીદિદમ્ ।
સાવધાનેન વૈ સ્થેયમેતત્સંરક્ષણે સદા ॥ ૬૦॥

પ્રબોધ્ય સ્વચરાનિન્દ્રોઽર્જુનસંરક્ષણાદિકમ્ ।
વાત્સલ્યપૂર્ણહૃદયઃ પુનરૂચે કપિધ્વજમ્ ॥ ૬૧॥

ઇન્દ્ર ઉવાચ ।
રાજ્યં ત્વયા પ્રમાદાદ્વૈ ન કર્તવ્યં કદાચન ।
શ્રેયસે ભદ્ર વિદ્યેયં ભવેત્તવ પરન્તપ ॥ ૬૨॥

ધૈર્યં ધાર્યં સાધકેન સર્વથા રક્ષકઃ શિવઃ ।
સમ્પત્તીશ્ચ ફલં તુભ્યં દાસ્યતે નાત્ર સંશયઃ ॥ ૬૩॥

નન્દીશ્વર ઉવાચ ।
ઇતિ દત્ત્વા વરં તસ્ય ભારતસ્ય સુરેશ્વરઃ ।
સ્મરઞ્છિવપદામ્ભોજં જગામ ભવનં સ્વકમ્ ॥ ૬૪॥

અર્જુનોઽપિ મહાવીરઃ સુપ્રણમ્ય સુરેશ્વરમ્ ।
તપસ્તેપે સંયતાત્મા શિવમુદ્દિશ્ય તદ્વિધમ્ ॥ ૬૫॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં કિરાતાવતારવર્ણનપ્રસઙ્ગેઽર્જુનતપોવર્ણનં નામાષ્ટત્રિંશોઽધ્યાયઃ ॥ ૩.૩૮॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૩૯. એકોનચત્વારિંશોઽધ્યાયઃ । કિરાતાવતારવર્ણને મૂકદૈત્યવધઃ ।

નન્દીશ્વર ઉવાચ ।
સ્નાનં સ વિધિવત્કૃત્વા ન્યાસાદિ વિધિવત્તથા ।
ધ્યાનં શિવસ્ય સદ્ભક્ત્યા વ્યાસોક્તં યત્તથાકરોત્ ॥ ૧॥

એકપાદતલેનૈવ તિષ્ઠન્મુનિવરો યથા ।
સૂર્યે દૃષ્ટિં નિબધ્યૈકાં મન્ત્રમાવર્તયન્ સ્થિતઃ ॥ ૨॥

તપસ્તેપેતિ સમ્પ્રીત્યા સંસ્મરન્મનસા શિવમ્ ।
પઞ્ચાક્ષરં મનું શમ્ભોર્જપન્સર્વોત્તમોત્તમમ્ ॥ ૩॥

તપસસ્તેજ એવાસીદ્યથા દેવા વિસિસ્મિયુઃ ।
પુનશ્ચૈવ શિવં યાતાઃ પ્રત્યૂચુસ્તે સમાહિતાઃ ॥ ૪॥

દેવા ઊચુઃ ।
નરેણૈકેન સર્વેશ ત્વદર્થે તપ આહિતમ્ ।
યદિચ્છતિ નરઃ સોઽયં કિન્ન યચ્છતિ તત્પ્રભો ॥ ૫॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા તુ સ્તુતિં ચક્રુર્વિવિધાં તે તદા સુરાઃ ।
તત્પાદયોર્દૃશઃ કૃત્વા તત્ર તસ્થુઃ સ્થિરાધયઃ ॥ ૬॥

શિવસ્તુ તદ્વચઃ શ્રુત્વા મહાપ્રભુરુદારધીઃ ।
સુવિહસ્ય પ્રસન્નાત્મા સુરાન્વચનમબ્રવીત્ ॥ ૭॥

શિવ ઉવાચ ।
સ્વસ્થાનં ગચ્છત સુરાઃ સર્વે સત્યં ન સંશયઃ ।
સર્વથાહં કરિષ્યામિ કાર્યં વો નાત્ર સંશય ॥ ૮॥

નન્દીશ્વર ઉવાચ ।
તચ્છ્રુત્વા શમ્ભુવચનં નિશ્ચયં પરમં ગતાઃ ।
પરાવૃત્ય ગતાઃ સર્વે સ્વસ્થાનં તે હિ નિર્જરાઃ ॥ ૯॥

એતસ્મિન્નન્તરે દૈત્યો મૂકનામાગતસ્તદા ।
સૌકરં રૂપમાસ્થાય પ્રેષિતશ્ચ દુરાત્મના ॥ ૧૦॥

દુર્યોધનેન વિપ્રેન્દ્ર માયિના ચાર્જુનં તદા ।
યત્રાર્જુનઃ સ્થિતશ્ચાસીત્તેન માર્ગેણ વૈ તદા ॥ ૧૧॥

શ‌ૃઙ્ગાણિ પર્વતસ્યૈવ ચ્છિન્દન્વૃક્ષાનનેકશઃ ।
શબ્દં ચ વિવિધં કુર્વન્નતિવેગેન સંયુતઃ ॥ ૧૨॥

અર્જુનોઽપિ ચ તં દૃષ્ટ્વા મૂકનામાસુરં તદા ।
સ્મૃત્વા શિવપદામ્ભોજં વિચારે તત્પરોઽભવત્ ॥ ૧૩॥

અર્જુન ઉવાચ ।
કોઽયં વા કુત આયાતિ ક્રૂરકર્મા ચ દૃશ્યતે ।
મમાનિષ્ટં ધ્રુવં કર્તું સમાગચ્છત્યસંશયમ્ ॥ ૧૪॥

મમૈવં મન આયાતિ શત્રુરેવ ન સંશયઃ ।
મયા વિનિહતાઃ પૂર્વમનેકે દૈત્યદાનવાઃ ॥ ૧૫॥

તદીયઃ કશ્ચિદાયાતિ વૈરં સાધયિતું પુનઃ ।
અથવા ચ સખા કશ્ચિદ્ દુર્યોધનહિતાવહઃ ॥ ૧૬॥

યસ્મિન્દૃષ્ટે પ્રસીદેત્સ્વં મનઃ સ હિતકૃદ્ ધ્રુવમ્ ।
યસ્મિન્દૃષ્ટે તદેવ સ્યાદાકુલં શત્રુરેવ સઃ ॥ ૧૭॥

આચારઃ કુલમાખ્યાતિ વપુરાખ્યાતિ ભોજનમ્ ।
વચનં શ્રુતમાખ્યાતિ સ્નેહમાખ્યાતિ લોચનમ્ ॥ ૧૮॥

આકારેણ તથા ગત્યા ચેષ્ટયા ભાષિતૈરપિ ।
નેત્રવક્ત્રવિકારાભ્યાં જ્ઞાયતેઽન્તર્હિતં મનઃ ॥ ૧૯॥

ઉજ્જ્વલં સરસં ચૈવ વક્રમારક્તકં તથા ।
નેત્રં ચતુર્વિધં પ્રોક્તં તસ્ય ભાવં પૃથગ્બુધાઃ ॥ ૨૦॥

ઉજ્જ્વલં મિત્રસંયોગે સરસં પુત્રદર્શને ।
વક્રં ચ કામિનીયોગે આરક્તં શત્રુદર્શને ॥ ૨૧॥

અસ્મિન્મમ તુ સર્વાણિ કલુષાનીન્દ્રિયાણિ ચ ।
અયં શત્રુર્ભવેદેવ મારણીયો ન સંશયઃ ॥ ૨૨॥

ગુરોશ્ચ વચનં મેઽદ્ય વર્તતે દુઃખદસ્ત્વયા ।
હન્તવ્યઃ સર્વથા રાજન્નાત્ર કાર્યા વિચારણા ॥ ૨૩॥

એતદર્થં ત્વાયુધાનિ મમ ચૈવ ન સંશયઃ ।
વિચાર્યેતિ ચ તત્રૈવ બાણં સંસ્થાય સંસ્થિતઃ ॥ ૨૪॥

એતસ્મિન્નન્તરે તત્ર રક્ષાર્થં હ્યર્જુનસ્ય વૈ ।
તદ્ભક્તેશ્ચ પરીક્ષાર્થં શઙ્કરો ભક્તવત્સલઃ ॥ ૨૫॥

વિદગ્ધભિલ્લરૂપં હિ ગણૈઃ સાર્ધં મહાદ્ભુતમ્ ।
તસ્ય દૈત્યસ્ય નાશાર્થં દ્રુતં કૃત્વા સમાગતઃ ॥ ૨૬॥

બદ્ધ્કચ્છશ્ચ વલ્લીભિર્બદ્ધ્વા કેશાન્ હરસ્તદા ।
શરીરે શ્વેતરેખાશ્ચ ધનુર્બાણયુતઃ સ્વયમ્ ॥ ૨૭॥

બાણાનાં તૂણકં પૃષ્ઠે ધૃત્વા વૈ સ જગામ હ ।
ગણશ્ચૈવ તથા જાતો ભિલ્લરાજોઽભવચ્છિવઃ ॥ ૨૮॥

શબ્દાંશ્ચ વિવિધાન્કૃત્વા નિર્યયૌ વાહિનીપતિઃ ।
સૂકરસ્ય સસારાથ શબ્દશ્ચ પ્રદિશો દશ ॥ ૨૯॥

વનેચરેણ શબ્દેન વ્યાકુલશ્ચાર્જુનસ્તદા ।
પર્વતાદ્યાશ્ચ તૈઃ શબ્દૈસ્તે સર્વે વ્યાકુલાસ્તદા ॥ ૩૦॥

અહો કિન્નુ ભવેદેષ શિવઃ શુભકરસ્ત્વિહ ।
મયા ચૈવ શ્રુતં પૂર્વં કૃષ્ણેન કથિતં પુનઃ ॥ ૩૧॥

વ્યાસેન કથિતં ચૈવ સ્મૃત્વા દેવૈસ્તથા પુનઃ ।
શિવઃ શુભકરઃ પ્રોક્તઃ શિવઃ સુખકરસ્તથા ॥ ૩૨॥

મુક્તિદશ્ચ સ્વયં પ્રોક્તો મુક્તિદાનાન્ન સંશયઃ ।
તન્નામસ્મરણાત્પુંસાં કલ્યાણં જાયતે ધ્રુવમ્ ॥ ૩૩॥

ભજતાં સર્વભાવેન દુઃખં સ્વપ્નેઽપિ નો ભવેત્ ।
યદા કદાચિજ્જાયેત તદા કર્મસમુદ્ભવમ્ ॥ ૩૪॥

ભાવિતદ્બહ્વપિ જ્ઞેયં નૂનમલ્પં ન સંશયઃ ।
પ્રારબ્ધસ્યાથ વા દોષો નૂનં જ્ઞેયો વિશેષતઃ ॥ ૩૫॥

અથવા બહુ ચાલ્પં હિ ભોગ્યં નિસ્તીર્ય શઙ્કરઃ ।
કદાચિદિચ્છયા તસ્ય દૂરીકુર્યાન્ન સંશયઃ ॥ ૩૬॥

વિષં ચૈવામૃતં કુર્યાદમૃતં વિષમેવ વા ।
યદિચ્છતિ કરોત્યેવ સમર્થઃ કિન્નિષિધ્યતે ॥ ૩૭॥

ઇત્થં વિચાર્યમાણેઽપિ ભક્તૈરન્યૈઃ પુરાતનૈઃ ।
ભાવિભિશ્ચ સદા ભક્તૈરિહાનીય મનઃ સ્થિરમ્ ॥ ૩૮॥

લક્ષ્મીર્ગચ્છેચ્ચાવતિષ્ઠેન્મરણં નિકટે પુરઃ ।
નિન્દાં વાથ પ્રકુર્વન્તુ સ્તુતિં વા દુઃખસઙ્ક્ષયમ્ ॥ ૩૯॥

જાયતે પુણ્યપાપાભ્યાં શઙ્કરઃ સુખદઃ સદા ।
કદાચિચ્ચ પરીક્ષાર્થં દુઃખં યચ્છતિ વૈ શિવઃ ॥ ૪૦॥

અન્તે ચ સુખદઃ પ્રોક્તો દયાલુત્વાન્ન સંશયઃ ।
યથા ચૈવ સુવર્ણં ચ શોધિતં શુદ્ધતાં વ્રજેત્ ॥ ૪૧॥

એવં ચૈવ મયા પૂર્વં શ્રુતં મુનિમુખાત્તથા ।
અતસ્તદ્ભજનેનૈવ લપ્સ્યેઽહં સુખમુત્તમમ્ ॥ ૪૨॥

ઇત્યેવં તુ વિચારં સ કરોતિ યાવદેવ હિ ।
તાવચ્ચ સૂકરઃ પ્રાપ્તો બાણસમ્મોચનાવધિઃ ॥ ૪૩॥

શિવોઽપિ પૃષ્ઠતો લગ્નો હ્યાયાતઃ શૂકરસ્ય હિ ।
તયોર્મધ્યે તદા સોઽયં દૃશ્યતે શૃઙ્ગમદ્ભુતમ્ ॥ ૪૪॥

તસ્ય પ્રોક્તં ચ માહાત્મ્યં શિવઃ શીઘ્રતરં ગતઃ ।
અર્જુનસ્ય ચ રક્ષાર્થં શઙ્કરો ભક્તવત્સલઃ ॥ ૪૫॥

એતસ્મિન્સમયે તાભ્યાં કૃતં બાણવિમોચનમ્ ।
શિવબાણસ્તુ પુચ્છે વૈ હ્યર્જુનસ્ય મુખે તથા ॥ ૪૬॥

શિવસ્ય પુચ્છતો ગત્વા મુખાન્નિસ્સૃત્ય શીઘ્રતઃ ।
ભૂમૌ વિલીનઃ સંયાતસ્તસ્ય વૈ પુચ્છતો ગતઃ ॥ ૪૭॥

પપાત પાર્શ્વતશ્ચૈવ બાણશ્ચૈવાર્જુનસ્ય ચ ।
સૂકરસ્તત્ક્ષણં દૈત્યો મૃતો ભૂમૌ પપાત હ ॥ ૪૮॥

દેવા હર્ષં પરં પ્રાપુઃ પુષ્પવૃષ્ટિં ચ ચક્રિરે ।
જયપૂર્વં સ્તુતિકરાઃ પ્રણમ્ય ચ પુનઃ પુનઃ ॥ ૪૯॥

શિવસ્તુષ્ટમના આસીદર્જુનઃ સુખમાગતઃ ।

દૈત્યસ્ય ચ તદા દૃષ્ટ્વા ક્રૂરં રૂપં ચ તૌ તદા ॥ ૫૦॥

અર્જુનસ્તુ વિશેષેણ સુખિના પ્રાહ ચેતસા ।
અહો દૈત્યવરશ્ચાયં રૂપં તુ પરમાદ્ભુતમ્ ॥ ૫૧॥

કૃત્વાગતો મદ્વધાર્થં શિવેનાહં સુરક્ષિતઃ ।
ઈશ્વરેણ મમાદ્યૈવ બુદ્ધિર્દત્તા ન સંશયઃ ॥ ૫૨॥

વિચાર્યેત્યર્જુનસ્તત્ર જગૌ શિવ શિવેતિ ચ ।
પ્રણનામ શિવં ભૂયસ્તુષ્ટાવ ચ પુનઃ પુનઃ ॥ ૫૩॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં કિરાતાવતારવર્ણને મૂકદૈત્યવધો નામૈકોનચત્વારિંશોઽધ્યાયઃ ॥ ૩.૩૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૪૦. ચત્વારિંશોઽધ્યાયઃ । કિરાતાવતારવર્ણને ભિલ્લાર્જુનસંવાદઃ ।

નન્દીશ્વર ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ શ‍ૃણુ લીલાં પરાત્મનઃ ।
ભક્તવાત્સલ્યસંયુક્તાં તદ્ દૃઢત્વવિદર્ભિતામ્ ॥ ૧॥

શિવોઽપ્યથ સ્વભૃત્યં વૈ પ્રેષયામાસ સ દ્રુતમ્ ।
બાણાર્થં ચ તદા તત્રાર્જુનોઽપિ સમગાત્તતઃ ॥ ૨॥

એકસ્મિન્ સમયે પ્રાપ્તૌ બાણાર્થં તદ્ગણાર્જુનૌ ।
અર્જુનસ્તં પરાભર્ત્સ્ય સ્વબાણં ચાગ્રહીત્તદા ॥ ૩॥

ગણઃ પ્રોવાચ તં તત્ર કિમર્થં ગૃહ્યતે શરઃ ।
બાણશ્ચૈવાસ્મદીયો વૈ મુચ્યતાં ઋષિસત્તમ ॥ ૪॥

ઇત્યુક્તસ્તેન ભિલ્લસ્ય ગણેન મુનિસત્તમ ।
સોઽર્જુનઃ શઙ્કરં સ્મૃત્વા વચનં ચ તમબ્રવીત્ ॥ ૫॥

અર્જુન ઉવાચ ।
અજ્ઞાત્વા કિં ચ વદસિ મૂર્ખોઽસિ ત્વં વનેચર ।

બાણશ્ચ મોચિતો મેઽદ્ય ત્વદીયશ્ચ કથં પુનઃ ॥ ૬॥

રેખારૂપં ચ પિચ્છાનિ મન્નામાઙ્કિત એવ ચ ।
ત્વદીયશ્ચ કથં જાતઃ સ્વભાવો દુસ્ત્યજસ્તવ ॥ ૭॥

નન્દીશ્વર ઉવાચ ।
ઇત્યેવં તદ્વચઃ શ્રુત્વા વિહસ્ય સ ગણેશ્વરઃ ।
અર્જુનં ઋષિરૂપં તં ભિલ્લો વાક્યમુપાદદે ॥ ૮॥

તાપસ શ્રૂયતાં રે ત્વં ન તપઃ ક્રિયતે ત્વયા ।
વેષતશ્ચ તપસ્વી ત્વં ન યથાર્થં છલાયતે ॥ ૯॥

તપસ્વી ચ કથં મિથ્યા ભાષણં કુરુતે નરઃ ।
નૈકાકિનં ચ માં ત્વં ચ જાનીહિ વાહિનીપતિમ્ ॥ ૧૦॥

બહુભિર્વનભિલ્લૈશ્ચ યુક્તઃ સ્વામી સ આસતે ।
સમર્થઃ સર્વથા કર્તું વિગ્રહાનુગ્રહૌ પુનઃ ॥ ૧૧॥

વર્તતે તસ્ય બાણોઽયં યો નીતશ્ચ ત્વયાધુના ।
અયં બાણશ્ચ તે પાર્શ્વે ન સ્થાસ્યતિ કદાચન ॥ ૧૨॥

તપઃફલં કથં ત્વં ચ હાતુમિચ્છસિ તાપસ ।
ચૌર્યાચ્છલાદર્દ્ધમાનાદ્ વિસ્મયાત્સત્યભઞ્જનાત્ ॥ ૧૩॥

તપસા ક્ષીયતે સત્યમેતદેવ મયા શ્રુતમ્ ।
તસ્માચ્ચ તપસસ્તેઽદ્ય ભવિષ્યતિ ફલં કુતઃ ॥ ૧૪॥

તસ્માદમુક્તબાણો હિ કૃતઘ્નસ્ત્વં ભવિષ્યસિ ।
મમૈવ સ્વામિના બાણસ્તવાર્થે મોચિતો ધ્રુવમ્ ॥ ૧૫॥

શત્રુશ્ચ મારિતસ્તેન પુનર્બાણશ્ચ રક્ષિતઃ ।
અત્યન્તં ચ કૃતઘ્નોઽસિ તપોઽશુભકરસ્તથા ॥ ૧૬॥

સત્યં ન ભાષસે ત્વં ચ કિમતઃ સિદ્ધિમિચ્છસિ ।
પ્રયોજનં ચેદ્ બાણેન સ્વામી ચ યાચ્યતાં મમ ॥ ૧૭॥

ઈદૃશાંશ્ચ બહૂન્બાણાંસ્તદા દાતું ક્ષમઃ સ્વયમ્ ।
રાજા ચ વર્તતે મેઽદ્ય કિં ત્વેવં યાચ્યતે ત્વયા ॥ ૧૮॥

ઉપકારં પરિત્યજ્ય હ્યપકારં સમીહસે ।
નૈતદ્યુક્તં ત્વયાદ્યૈવ ક્રિયતે ત્યજ ચાપલમ્ ॥ ૧૯॥

નન્દીશ્વર ઉવાચ ।
ઇત્યેવં વચનં તસ્ય શ્રુત્વા પાર્થોઽર્જુનસ્તદા ।
ક્રોધં કૃત્વા શિવં સ્મૃત્વા મિતં વાક્યમથાબ્રવીત્ ॥ ૨૦॥

અર્જુન ઉવાચ ।
શ઼ૃણુ ભિલ્લ પ્રવક્ષ્યામિ ન સત્યં તવ ભાષણમ્ ।
યથા જાતિસ્તથા ત્વાં ચ જાનામિ હિ વનેચર ॥ ૨૧॥

અહં રાજા ભવાન્ ચૌરઃ કથં યુદ્ધપ્રયુક્તતા ।
યુદ્ધં મે સબલૈઃ કાર્યં નાધમૈર્હિ કદાચન ॥ ૨૨॥

તસ્માત્તે ચ તથા સ્વામી ભવિષ્યતિ ભવાદૃશઃ ।
દાતારશ્ચ વયં પ્રોક્તાશ્ચૌરા યૂયં વનેચરાઃ ॥ ૨૩॥

કથં યાચ્યો મયા ભિલ્લરાજ એવં ચ સામ્પ્રતમ્ ।
ત્વમેવ યાચસે નૈવ બાણં માં કિં વનેચર ॥ ૨૪॥

દદામિ તે તથા બાણાન્ સન્તિ મે બહવો ધ્રુવમ્ ।
રાજા ચ ગ્રહણં ચૈવ ન દાસ્યતિ તથા ભવેત્ ॥ ૨૫॥

કિં પુનશ્ચ તથા બાણાન્પ્રયચ્છામિ વનેચર ।
યદિ મે યા ચિકીર્ષા સ્યાત્કથં નાગમ્યતેઽધુના ॥ ૨૬॥

યથાગચ્છત્તુ તે ભર્તા કિમર્થં ભાષતેઽધુના ।
આગત્ય ચ મયા સાર્ધં જિત્વા યુદ્ધે ચ માં પુનઃ ॥ ૨૭॥

નીત્વા બાણમિમં ભિલ્લસ્વામી તે વાહિનીપતિઃ ।
નિજાલયં સુખં યાતુ વિલમ્બઃ ક્રિયતે કથમ્ ॥ ૨૮॥

નન્દીશ્વર ઉવાચ ।
મહેશ્વરકૃપાપ્રાપ્તસદ્બલસ્યાર્જુનસ્ય હિ ।
ઇત્યેતદ્વચનં શ્રુત્વા ભિલ્લો વાક્યમથાબ્રવીત્ ॥ ૨૯॥

ભિલ્લ ઉવાચ ।
અજ્ઞોઽસિ ત્વં ઋષિર્નાસિ મરણં ત્વીહસે કથમ્ ।
દેહિ બાણં સુખં તિષ્ઠ ત્વન્યથા ક્લેશભાગ્ભવેઃ ॥ ૩૦॥

નન્દીશ્વર ઉવાચ ।

ઇત્યુક્તસ્તેન ભિલ્લેન શિવસચ્છક્તિશોભિના ।
ગણેન પાણ્ડવસ્તં ચ પ્રાહ સ્મૃત્વા ચ શઙ્કરમ્ ॥ ૩૧॥

અર્જુન ઉવાચ ।
મદ્વાક્યં તત્ત્વતો ભિલ્લ શ‍ૃણુ ત્વં ચ વનેચર ।
આગમિષ્યતિ તે સ્વામી દર્શયિષ્યે ફલં તદા ॥ ૩૨॥

ન શોભતે ત્વયા યુદ્ધં કરિષ્યે સ્વામિના તવ ।
ઉપહાસકરં જ્ઞેયં યુદ્ધં સિંહશ‍ૃગાલયોઃ ॥ ૩૩॥

શ્રુતં ચ મદ્વચસ્તેઽદ્ય દ્રક્ષ્યસિ ત્વં મહાબલમ્ ।
ગચ્છસ્વ સ્વામિનં ભિલ્લ યથેચ્છસિ તથા કુરુ ॥ ૩૪॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તસ્તુ ગતસ્તત્ર ભિલ્લઃ પાર્થેન વૈ મુને ।
શિવાવતારો યત્રાસ્તે કિરાતો વાહિનીપતિઃ ॥ ૩૫॥

અથાર્જુનસ્ય વચનં ભિલ્લનાથાય વિસ્તરાત્ ।
સર્વં નિવેદયામાસ તસ્મૈ ભિલ્લપરાત્મને ॥ ૩૬॥

સ કિરાતેશ્વરઃ શ્રુત્વા તદ્વચો હર્ષમાગતઃ ।
આજગામ સ્વસૈન્યેન શઙ્કરો ભિલ્લરૂપધૃક્ ॥ ૩૭॥

અર્જુનશ્ચ તદા સેનાં કિરાતસ્ય ચ પાણ્ડવઃ ।
દૃષ્ટ્વા ગૃહીત્વા સશરં ધનુઃ સમ્મુખ આયયૌ ॥ ૩૮॥

અથો કિરાતશ્ચ પુનઃ પ્રેષયામાસ તં ચરમ્ ।
તન્મુખેન જગૌ વાક્યં ભારતાય મહાત્મને ॥ ૩૯॥

કિરાત ઉવાચ ।
પશ્ય સૈન્યં તપસ્વિસ્ત્વં મુઞ્ચ બાણં વ્રજાધુના ।
મરણં સ્વલ્પકાર્યાર્થં કથમિચ્છસિ સામ્પ્રતમ્ ॥ ૪૦॥

ભ્રાતરસ્તવ દુઃખાર્તાઃ કલત્રં ચ તતઃ પરમ્ ।
પૃથિવી હસ્તતસ્તેઽદ્ય યાસ્યતીતિ મતિર્મમ ॥ ૪૧॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તં પરમેશેન પાર્થદાર્ઢ્યપરીક્ષયા ।
સર્વથાર્જુનરક્ષાર્થં ધૃતરૂપેણ શમ્ભુના ॥ ૪૨॥

ઇત્યુક્તસ્તુ તદાગત્ય સ ગણઃ શાઙ્કરશ્ચ તત્ ।
વિસ્તરાદ્ વૃત્તમખિલમર્જુનાય ન્યવેદયત્ ॥ ૪૩॥

તચ્છ્રુત્વા તુ પુનઃ પ્રાહ પ્રાર્થસ્તં દૂતમાગતમ્ ।
વાહિનીપતયે વાચ્યં વિપરીતં ભવિષ્યતિ ॥ ૪૪॥

યદ્યહં ચૈવ તે બાણં યચ્છામિ ચ મદીયકમ્ ।
કુલસ્ય દૂષણં ચાહં ભવિષ્યામિ ન સંશયઃ ॥ ૪૫॥

ભ્રાતરશ્ચૈવ દુઃખાર્તાઃ ભવન્તુ ચ તથા ધ્રુવમ્ ।
વિદ્યાશ્ચ નિષ્ફલા મે સ્યુસ્તસ્માદાગચ્છ વૈ ધ્રુવમ્ ॥ ૪૬॥

સિંહશ્ચૈવ શ‍ૃગાલાદ્વા ભીતો નૈવ મયા શ્રુતઃ ।
તથા વનેચરાદ્રાજા ન બિભેતિ કદાચન ॥ ૪૭॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તસ્તં પુનર્ગત્વા સ્વામિનં પાણ્ડવેન સઃ ।
સર્વં નિવેદયામાસ તદુક્તં હિ વિશેષતઃ ॥ ૪૮॥

અથ સોઽપિ કિરાતાહ્વો મહાદેવઃ સસૈન્યકઃ ।
તચ્છ્રુત્વા સૈન્યસંયુક્તો હ્યર્જુનં ચાગમત્તદા ॥ ૪૯॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં કિરાતાવતારવર્ણને ભિલ્લાર્જુનસંવાદો નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૩.૪૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૪૧. એકચત્વારિંશોઽધ્યાયઃ । કિરાતેશ્વરાવતારવર્ણનમ્ ।

તમાગતં તતો દૃષ્ટ્વા ધ્યાનં કૃત્વા શિવસ્ય સઃ ।
ગત્વા તત્રાર્જુનસ્તેન યુદ્ધં ચક્રે સુદારુણમ્ ॥ ૧॥

ગણૈશ્ચ વિવિધૈસ્તીક્ષ્ણૈરાયુધૈસ્તં ન્યપીડયત્ ।
તૈસ્તદા પીડિતઃ પાર્થઃ સસ્માર સ્વામિનં શિવમ્ ॥ ૨॥

અર્જુનશ્ચ તદા તેષાં બાણાવલિમથાચ્છિનત્ ।

યદાયુદ્ધં ચ તૈઃ ક્ષિપ્તં તતઃ શર્વં પરામૃશત્ ॥ ૩॥

પીડિતાસ્તે ગણાસ્તેન યયુશ્ચૈવ દિશો દશ ।
ગણેશા વારિતાસ્તે ચ નાજગ્મુઃ સ્વામિનં પ્રતિ ॥ ૪॥

શિવશ્ચૈવાર્જુનશ્ચૈવ યુયુધાતે પરસ્પરમ્ ।
નાનાવિધૈશ્ચાયુધૈર્હિ મહાબલપરાક્રમૌ ॥ ૫॥

શિવોઽપિ મનસા નૂનં દયાં કૃત્વાર્જુનં હ્યગાત્ ।
અર્જુનશ્ચ દૃઢં તત્ર પ્રહારં કૃતવાંસ્તદા ॥ ૬॥

આયુધાનિ શિવઃ સો વૈ હ્યર્જુનસ્યાચ્છિનત્તદા ।
કવચાનિ ચ સર્વાણિ શરીરં કેવલં સ્થિતમ્ ॥ ૭॥

તદાર્જુનઃ શિવં સ્મૃત્વા મલ્લયુદ્ધં ચકાર સઃ ।
વાહિનીપતિના તેન ભયાત્ક્લિષ્ટોઽપિ ધૈર્યવાન્ ॥ ૮॥

તદ્યુદ્ધેન મહી સર્વા ચકમ્પે સસમુદ્રકા ।
દેવા દુઃખં સમાપન્નાઃ કિં ભવિષ્યતિ વા પુનઃ ॥ ૯॥

એતસ્મિન્નન્તરે દેવઃ શિવો ગગનમાસ્થિતઃ ।
યુદ્ધં ચકાર તત્રસ્થઃ સોઽર્જુનશ્ચ તથાકરોત્ ॥ ૧૦॥

ઉડ્ડીયોડ્ડીય તૌ યુદ્ધં ચક્રતુર્દેવપાર્થિવૌ ।
દેવાશ્ચ વિસ્મયં પ્રાપૂ રણં દૃષ્ટ્વા તદાદ્ભુતમ્ ॥ ૧૧॥

અથાર્જુનોત્તરં જ્ઞાત્વા સ્મૃત્વા શિવપદામ્બુજમ્ ।
દધાર પાદયોસ્તં વૈ તદ્ધ્યાનાદાપ્તસદ્બલઃ ॥ ૧૨॥

ધૃત્વા પાદૌ તદા તસ્ય ભ્રામયામાસ સોઽર્જુનઃ ।
વિજહાસ મહાદેવો ભક્તવત્સલ ઊતિકૃત્ ॥ ૧૩॥

દાતું સ્વદાસતાં તસ્મૈ ભક્તવશ્યતયા મુને ।
શિવેનૈવ કૃતં હ્યેતચ્ચરિતં નાન્યથા ભવેત્ ॥ ૧૪॥

પશ્ચાદ્વિહસ્ય તત્રૈવ શઙ્કરો રૂપમદ્ભુતમ્ ।
દર્શયામાસ સહસા ભક્તવશ્યતયા શુભમ્ ॥ ૧૫॥

યથોક્તં વેદશાસ્ત્રેષુ પુરાણે પુરુષોત્તમ ।
વ્યાસોપદિષ્ટં ધ્યાનાય તસ્ય યત્સર્વસિદ્ધિદમ્ ॥ ૧૬॥

તદ્દૃષ્ટ્વા સુન્દરં રૂપં ધ્યાનપ્રાપ્તં શિવસ્ય તુ ।
બભૂવ વિસ્મિતોઽતીવ હ્યર્જુનો લજ્જિતઃ સ્વયમ્ ॥ ૧૭॥

અહો શિવશ્શિવઃ સોઽયં યો મે પ્રભુતયા વૃતઃ ।
ત્રિલોકેશઃ સ્વયં સાક્ષાદ્ હા કૃતં કિં મયાધુના ॥ ૧૮॥

પ્રભોર્બલવતી માયા માયિનામપિ મોહિની ।
કિં કૃતં રૂપમાચ્છાદ્ય પ્રભુણા છલિતો હ્યહમ્ ॥ ૧૯॥

ધિયેતિ સંવિચાર્યૈવં સાઞ્જલિર્નતમસ્તકઃ ।
પ્રણનામ પ્રભું પ્રીત્યા તદોવાચ સ ખિન્નધીઃ ॥ ૨૦॥

અર્જુન ઉવાચ ।
દેવદેવ મહાદેવ કરુણાકર શઙ્કર ।
મમાપરાધઃ સર્વેશ ક્ષન્તવ્યશ્ચ ત્વયા પુનઃ ॥ ૨૧॥

કિં કૃતં રૂપમાચ્છાદ્ય ચ્છલિતોઽસ્મિ ત્વયાધુના ।
ધિઙ્ માં સમરકર્તારં સ્વામિના ભવતા પ્રભો ॥ ૨૨॥

નન્દીશ્વર ઉવાચ ।
ઇત્યેવં પાણ્ડવઃ સોઽથ પશ્ચાત્તાપમવાપ સઃ ।
પાદયોર્નિપપાતાશુ શઙ્કરસ્ય મહાપ્રભોઃ ॥ ૨૩॥

અથેશ્વરઃ પ્રસન્નાત્મા પ્રત્યુવાચાર્જુનં ચ તમ્ ।
સમાશ્વાસ્યેતિ બહુશો મહેશો ભક્તવત્સલઃ ॥ ૨૪॥

શઙ્કર ઉવાચ ।
ન ખિદ્ય પાર્થ ભક્તોઽસિ મમ ત્વં હિ વિશેષતઃ ।
પરીક્ષાર્થં મયા તેઽદ્ય કૃતમેવં શુચં જહિ ॥ ૨૫॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા તં સ્વહસ્તાભ્યામુત્થાપ્ય પ્રભુરર્જુનમ્ ।
વિલજ્જં કારયામાસ ગણૈશ્ચ સ્વામિનો ગુણૈઃ ॥ ૨૬॥

પુનઃ શિવોઽર્જુનં પ્રાહ પાણ્ડવં વીરસમ્મતમ્ ।
હર્ષયન્ સર્વથા પ્રીત્યા શઙ્કરો ભક્તવત્સલઃ ॥ ૨૭॥

શિવ ઉવાચ ।
હે પાર્થ પાણ્ડવશ્રેષ્ઠ પ્રસન્નોઽસ્મિ વરં વૃણુ ।

પ્રહારૈસ્તાડનૈસ્તેઽદ્ય પૂજનમ્માનિતમ્મયા ॥ ૨૮॥

ઇચ્છયા ચ કૃતં મેઽદ્ય નાપરાધસ્તવાધુના ।
નાદેયં વિદ્યતે તુભ્યં યદિચ્છસિ વૃણીષ્વ તત્ ॥ ૨૯॥

તે શત્રુષુ યશોરાજ્યસ્થાપનાય શુભં કૃતમ્ ।
એતદ્દુઃખં ન કર્તવ્યં વૈક્લવ્યં ચ ત્યજાખિલમ્ ॥ ૩૦॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તસ્ત્વર્જુનસ્તેન પ્રભુણા શઙ્કરેણ સઃ ।
ઉવાચ શઙ્કરં ભક્ત્યા સાવધાનતયા સ્થિતઃ ॥ ૩૧॥

અર્જુન ઉવાચ ।
ભક્તપ્રિયસ્ય શમ્ભોસ્તે સુપ્રભો કિં સમીહિતમ્ ।
વર્ણનીયં મયા દેવ કૃપાલુસ્ત્વં સદાશિવ ॥ ૩૨॥

ઇત્યુક્ત્વા સંસ્તુતિં તસ્ય શઙ્કરસ્ય મહાપ્રભોઃ ।
ચકાર પાણ્ડવઃ સોઽથ સદ્ભક્તિં વેદસમ્મતામ્ ॥ ૩૩॥

અર્જુન ઉવાચ ।
નમસ્તે દેવદેવાય નમઃ કૈલાસવાસિને ।
સદાશિવ નમસ્તુભ્યં પઞ્ચવક્ત્રાય તે નમઃ ॥ ૩૪॥

કપર્દિને નમસ્તુભ્યન્ત્રિનેત્રાય નમોઽસ્તુ તે ।
મનઃ પ્રસન્નરૂપાય સહસ્રવદનાય ચ ॥ ૩૫॥

નીલકણ્ઠ નમસ્તેઽસ્તુ સદ્યોજાતાય વૈ નમઃ ।
વૃષધ્વજ નમસ્તેઽસ્તુ વામાઙ્ગગિરિજાય ચ ॥ ૩૬॥

દશદોષ નમસ્તુભ્યં નમસ્તે પરમાત્મને ।
ડમરૂકપાલહસ્તાય નમસ્તે મુણ્ડમાલિને ॥ ૩૭॥

શુદ્ધસ્ફટિકસઙ્કાશશુદ્ધકર્પૂરવર્ષ્મણે ।
પિનાકપાણયે તુભ્યં ત્રિશૂલવરધારિણે ॥ ૩૮॥

વ્યાઘ્રચર્મોત્તરીયાય ગજામ્બરવિધારિણે ।
નાગાઙ્ગાય નમસ્તુભ્યં ગઙ્ગાધર નમોઽસ્તુ તે ॥ ૩૯॥

સુપાદાય નમસ્તેઽસ્તુ આરક્તચરણાય ચ ।
નન્દ્યાદિગણસેવ્યાય ગણેશાય ચ તે નમઃ ॥ ૪૦॥

નમો ગણેશરૂપાય કાર્તિકેયાનુગાય ચ ।
ભક્તિદાય ચ ભક્તાનાં મુક્તિદાય નમો નમઃ ॥ ૪૧॥

અગુણાય નમસ્તેઽસ્તુ સગુણાય નમો નમઃ ।
અરૂપાય સરૂપાય સકલાયાકલાય ચ ॥ ૪૨॥

નમઃ કિરાતરૂપાય મદનુગ્રહકારિણે ।
યુદ્ધપ્રિયાય વીરાણાં નાનાલીલાનુકારિણે ॥ ૪૩॥

યત્કિઞ્ચિત્ દૃશ્યતે રૂપં તત્તેજસ્તાવકં સ્મૃતમ્ ।
ચિદ્રૂપસ્ત્વં ત્રિલોકેષુ રમસેઽન્વયભેદતઃ ॥ ૪૪॥

ગુણાનાં તે ન સઙ્ખ્યાસ્તિ યથા ભૂરજસામિહ ।
આકાશે તારકાણાં હિ કણાનાં વૃષ્ટ્યપામપિ ॥ ૪૫॥

ન તે ગુણાંસ્તુ સઙ્ખ્યાતું વેદા વૈ સમ્ભવન્તિ હિ ।
મન્દબુદ્ધિરહં નાથ વર્ણયામિ કથમ્પુનઃ ॥ ૪૬॥

સોઽસિ યોઽસિ નમસ્તેઽસ્તુ કૃપાં કર્તુમિહાર્હસિ ।
દાસોઽહં તે મહેશાન સ્વામી ત્વં મે મહેશ્વર ॥ ૪૭॥

નન્દીશ્વર ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય પુનઃ પ્રોવાચ શઙ્કરઃ ।
સુપ્રસન્નતરો ભૂત્વા વિહસન્પ્રભુરર્જુનમ્ ॥ ૪૮॥

શઙ્કર ઉવાચ ।
વચસા કિમ્બહૂક્તેન શ઼ૃણુષ્વ વચનં મમ ।
શીઘ્રં વૃણુ વરં પુત્ર સર્વં તચ્ચ દદામિ તે ॥ ૪૯॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્તશ્ચાર્જુનસ્તેન પ્રણિપત્ય સદાશિવમ્ ।
સાઞ્જલિર્નતકઃ પ્રેમ્ણા પ્રોવાચ ગદ્ગદાક્ષરમ્ ॥ ૫૦॥

અર્જુન ઉવાચ ।
કિં બ્રૂયાં ત્વં ચ સર્વેષામન્તર્યામિતયા સ્થિતઃ ।
તથાપિ વર્ણિતં મેઽદ્ય શ્રૂયતાં ચ ત્વયા વિભો ॥ ૫૧॥

શત્રૂણાં સઙ્કટં યચ્ચ તદ્ગતન્દર્શનાત્તવ ।
ઐહિકીં ચ પરાં સિદ્ધિં પ્રાપ્નુયાં વૈ તથા કુરુ ॥ ૫૨॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા તં નમસ્કૃત્ય શઙ્કરં ભક્તવત્સલમ્ ।
નતસ્કન્ધોઽર્જુનસ્તત્ર બદ્ધાઞ્જલિરુપસ્થિતઃ ॥ ૫૩॥

શિવોઽપિ ચ તથાભૂતં જ્ઞાત્વા પાણ્ડવમર્જુનમ્ ।
નિજભક્તવરં સ્વામી મહાતુષ્ટો બભૂવ હ ॥ ૫૪॥

અસ્ત્રં પાશુપતં સ્વીયન્દુર્જયં સર્વદાખિલૈઃ ।
દદૌ તસ્મૈ મહેશાનો વચનં ચેદમબ્રવીત્ ॥ ૫૫॥

શિવ ઉવાચ ।
સ્વં મહાસ્ત્રં મયા દત્ત દુર્જયસ્ત્વં ભવિષ્યતિ ।
અનેન સર્વશત્રૂણાં જયકૃત્યમવાપ્નુહિ ॥ ૫૬॥

કૃષ્ણં ચ કથયિષ્યામિ સાહાય્યન્તે કરિષ્યતિ ।
સ વૈ મમાત્મભૂતશ્ચ મદ્ભક્તઃ કાર્યકારકઃ ॥ ૫૭॥

મત્પ્રભાવાન્ભારત ત્વં રાજ્યન્નિકણ્ટકં કુરુ ।
ધીર્મ્માન્નાનાવિધાન્ભ્રાત્રા કારય ત્વં ચ સર્વદા ॥ ૫૮॥

નન્દીશ્વર ઉવાચ ।
ઇત્યુક્ત્વા નિજહસ્તં ચ ધૃત્વા શિરસિ તસ્ય સઃ ।
પૂજિતો હ્યર્જુનેનાશુ શઙ્કરોઽન્તરધીયત ॥ ૫૯॥

અથાર્જુનઃ પ્રસન્નાત્મા પ્રાપ્યાસ્ત્રં ચ વરં પ્રભોઃ ।
જગામ સ્વાશ્રમં મુખ્યં સ્મરન્ભક્ત્યા ગુરું શિવમ્ ॥ ૬૦॥

સર્વે તે ભ્રાતરઃ પ્રીતાસ્તન્વઃ પ્રાણમિવાગતમ્ ।
મિલિત્વા તં સુખં પ્રાપુર્દ્રૌપદી ચાતિસુવ્રતા ॥ ૬૧॥

શિવં પરં ચ સન્તુષ્ટં પાણ્ડવાઃ સર્વ એવ હિ ।
નાતૃપ્યન્સર્વવૃત્તાન્તં શ્રુત્વા હર્ષમુપાગતાઃ ॥ ૬૨॥

આશ્રમે પુષ્પવૃષ્ટિશ્ચ ચન્દનેન સમન્વિતા ।
પપાત સુકરાર્થં ચ તેષાં ચૈવ મહાત્મનામ્ ॥ ૬૩॥

ધન્યં ચ શઙ્કરં ચૈવ નમસ્કૃત્ય શિવમ્મુદા ।
અવધિં ચાગતં જ્ઞાત્વા જયશ્ચૈવ ભવિષ્યતિ ॥ ૬૪॥

એતસ્મિન્નન્તરે કૃષ્ણઃ શ્રુત્વાર્જુનમથાગતમ્ ।

મેલનાય સમાયાતઃ શ્રુત્વા સુખમુપાગતઃ ॥ ૬૫॥

અતશ્ચૈવ મયાખ્યાતઃ શઙ્કરઃ સર્વદુઃખહા ।
સ સેવ્યતે મયા નિત્યં ભવદ્ભિરપિ સેવ્યતામ્ ॥ ૬૬॥

ઇત્યુક્તસ્તે કિરાતાહ્વોઽવતારઃ શઙ્કરસ્ય વૈ ।
તં શ્રુત્વા શ્રાવયન્વાપિ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૬૭॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં કિરાતેશ્વરાવતારવર્ણનં નામૈકચત્વારિંશોઽધ્યાયઃ ॥ ૩.૪૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
તૃતીયાયાં શતરુદ્રસંહિતાયાં

## ૩.૪૨. દ્વિચત્વારિંશોઽધ્યાયઃ । દ્વાદશજ્યોતિર્લિઙ્ગાવતારવર્ણનમ્ ।

નન્દીશ્વર ઉવાચ ।
અવતારાન્ શ◌ૃણુ વિભોર્દ્વાદશપ્રમિતાન્પરાન્ ।
જ્યોતિર્લિઙ્ગસ્વરૂપાન્વૈ નાનોતિકારકાન્મુને ॥ ૧॥

સૌરાષ્ટ્રે સોમનાથશ્ચ શ્રીશૈલે મલ્લિકાર્જુનઃ ।
ઉજ્જયિન્યાં મહાકાલ ઓઙ્કારે ચામરેશ્વરઃ ॥ ૨॥

કેદારો હિમવત્પૃષ્ટે ડાકિન્યામ્ભીમશઙ્કરઃ ।
વારાણસ્યાં ચ વિશ્વેશસ્ત્ર્યમ્બકો ગૌતમીતટે ॥ ૩॥

વૈદ્યનાથશ્ચિતાભૂમૌ નાગેશો દારુકાવને ।
સેતુબન્ધે ચ રામેશો ઘુશ્મેશશ્ચ શિવાલયે ॥ ૪॥

અવતારદ્વાદશકમેતચ્છમ્ભોઃ પરાત્મનઃ ।
સર્વાનન્દકરં પુંસાં દર્શનાત્સ્પર્શનાન્મુને ॥ ૫॥

તત્રાદ્યઃ સોમનાથો હિ ચન્દ્રદુઃખક્ષયઙ્કરઃ ।
ક્ષયકુષ્ઠાદિરોગાણાં નાશકઃ પૂજનાન્મુને ॥ ૬॥

શિવાવતારઃ સોમેશો લિઙ્ગરૂપેણ સંસ્થિતઃ ।
સૌરાષ્ટ્રે શુભદેશે ચ શશિના પૂજિતઃ પુરા ॥ ૭॥

ચન્દ્રકુણ્ડં ચ તત્રૈવ સર્વપાપવિનાશકમ્ ।

તત્ર સ્નાત્વા નરો ધીમાન્સર્વરોગૈઃ પ્રમુચ્યતે ॥ ૮॥

સોમેશ્વરં મહાલિઙ્ગં શિવસ્ય પરમાત્મકમ્ ।
દૃષ્ટ્વા પ્રમુચ્યતે પાપાદ્ભુક્તિં મુક્તિં ચ વિન્દતિ ॥ ૯॥

મલ્લિકાર્જુનસંજ્ઞશ્ચાવતારઃ શકરસ્ય વૈ ।
દ્વિતીયઃ શ્રીગિરૌ તાત ભક્તાભીષ્ટફલપ્રદઃ ॥ ૧૦॥

સંસ્તુતો લિઙ્ગરૂપેણ સુતદર્શનહેતુતઃ ।
ગતસ્તત્ર મહાપ્રીત્યા સ શિવઃ સ્વગિરેર્મુને ॥ ૧૧॥

જ્યોતિર્લિઙ્ગં દ્વિતીયં તદ્દર્શનાત્પૂજનાન્મુને ।
મહાસુખકરં ચાન્તે મુક્તિદં નાત્ર સંશયઃ ॥ ૧૨॥

મહાકાલાભિધસ્તાતાવતારઃ શઙ્કરસ્ય વૈ ।
ઉજ્જયિન્યાં નગર્યાં ચ બભૂવ સ્વજનાવનઃ ॥ ૧૩॥

દૂષણાખ્યાસુરં યસ્તુ વેદધર્મપ્રમર્દકમ્ ।
ઉજ્જયિન્યાં ગતં વિપ્રદ્વેષિણં સર્વનાશનમ્ ॥ ૧૪॥

વેદવિપ્રસુતધ્યાતો હુઙ્કારેણૈવ સ દ્રુતમ્ ।
ભસ્મસાત્કૃતવાંસ્તં ચ રત્નમાલ નિવાસિનમ્ ॥ ૧૫॥

તં હત્વા સ મહાકાલો જ્યોતિર્લિઙ્ગસ્વરૂપતઃ ।
દેવૈઃ સ પ્રાર્થિતોઽતિષ્ઠત્સ્વભક્તપરિપાલકઃ ॥ ૧૬॥

મહાકાલાહ્વયં લિઙ્ગં દૃષ્ટ્વાભ્યર્ચ્ય પ્રયત્નતઃ ।
સર્વાન્કામાનવાપ્નોતિ લભતે પરતો ગતિમ્ ॥ ૧૭॥

ઓઙ્કારઃ પરમેશાનો ધૃતઃ શમ્ભોઃ પરાત્મનઃ ।
અવતારશ્ચતુર્થો હિ ભક્તાભીષ્ટફલપ્રદઃ ॥ ૧૮॥

વિધિના સ્થાપિતો ભક્ત્યા સ્વલિઙ્ગાત્પાર્થિવાન્મુને ।
પ્રાદુર્ભૂતો મહાદેવો વિન્ધ્યકામપ્રપૂરકઃ ॥ ૧૯॥

દેવૈઃ સમ્પ્રાર્થિતસ્તત્ર દ્વિધારૂપેણ સંસ્થિતઃ ।
ભુક્તિમુક્તિપ્રદો લિઙ્ગરૂપો વૈ ભક્તવત્સલઃ ॥ ૨૦॥

પ્રણવે ચૈવ ચોઙ્કારનામાસીલ્લિઙ્ગમુત્તમમ્ ।
પરમેશ્વરનામાસીત્પાર્થિવશ્ચ મુનીશ્વર ॥ ૨૧॥

ભક્તાભીષ્ટપ્રદો જ્ઞેયો યોઽપિ દૃષ્ટોઽર્ચિતો મુને ।
જ્યોતિર્લિઙ્ગે મહાદિવ્યે વર્ણિતે તે મહામુને ॥ ૨૨॥

કેદારેશોઽવતારસ્તુ પઞ્ચમઃ પરમશ્શિવઃ ।
જ્યોતિર્લિઙ્ગસ્વરૂપેણ કેદારે સંસ્થિતઃ સ ચ ॥ ૨૩॥

નરનારાયણાખ્યૌ યાવવતારૌ હરેર્મુને ।
તત્પ્રાર્થિતઃ શિવસ્તત્સ્થૈઃ કેદારે હિમભૂધરે ॥ ૨૪॥

તાભ્યાં ચ પૂજિતો નિત્યં કેદારેશ્વરસંજ્ઞકઃ ।
ભક્તાભીષ્ટપ્રદઃ શમ્ભુર્દર્શનાદર્ચનાદપિ ॥ ૨૫॥

અસ્ય ખણ્ડસ્ય સ સ્વામી સર્વેશોઽપિ વિશેષતઃ ।
સર્વકામપ્રદસ્તાત સોઽવતારઃ શિવસ્ય વૈ ॥ ૨૬॥

ભીમશઙ્કરસંજ્ઞસ્તુ ષષ્ઠઃ શમ્ભોર્મહાપ્રભોઃ ।
અવતારો મહાલીલો ભીમાસુરવિનાશનઃ ॥ ૨૭॥

સુદક્ષિણાભિધં ભક્તં કામરૂપેશ્વરં નૃપમ્ ।
યો રરક્ષાદ્ભુતં હત્વાસુરં તં ભક્તદુઃખદમ્ ॥ ૨૮॥

ભીમશઙ્કરનામા સ ડાકિન્યાં સંસ્થિતઃ સ્વયમ્ ।
જ્યોતિર્લિઙ્ગસ્વરૂપેણ પ્રાર્થિતસ્તેન શઙ્કરઃ ॥ ૨૯॥

વિશ્વેશ્વરાવતારસ્તુ કાશ્યાં જાતો હિ સપ્તમઃ ।
સર્વબ્રહ્માણ્ડરૂપશ્ચ ભુક્તિમુક્તિપ્રદો મુને ॥ ૩૦॥

પૂજિતઃ સર્વદેવૈશ્ચ ભક્ત્યા વિષ્ણ્વાદિભિઃ સદા ।
કૈલાસપતિના ચાપિ ભૈરવેણાપિ નિત્યશઃ ॥ ૩૧॥

જ્યોતિર્લિઙ્ગસ્વરૂપેણ સંસ્થિતસ્તત્ર મુક્તિદઃ ।
સ્વયં સિદ્ધસ્વરૂપો હિ તથા સ્વપુરિ સ પ્રભુઃ ॥ ૩૨॥

કાશીવિશ્વેશયોર્ભક્ત્યા તન્નામજપકારકાઃ ।
નિર્લિપ્તાઃ કર્મભિર્નિત્યં કૈવલ્યપદભાગિનઃ ॥ ૩૩॥

ત્ર્યમ્બકાખ્યોઽવતારો યઃ સોઽષ્ટમો ગૌતમીતટે ।
પ્રાર્થિતો ગૌતમેનાવિર્બભૂવ શશિમૌલિનઃ ॥ ૩૪॥

ગૌતમસ્ય પ્રાર્થનયા જ્યોતિર્લિઙ્ગસ્વરૂપતઃ ।
સ્થિતસ્તત્રાચલઃ પ્રીત્યા તન્મુનેઃ પ્રીતિકામ્યયા ॥ ૩૫॥

તસ્ય સન્દર્શનાત્સ્પર્શાદર્ચનાચ્ચ મહેશિતુઃ ।
સર્વે કામાઃ પ્રસિધ્યન્તિ તતો મુક્તિર્ભવેદહો ॥ ૩૬॥

શિવાનુગ્રહતસ્તત્ર ગઙ્ગા નામ્ના તુ ગૌતમી ।
સંસ્થિતા ગૌતમપ્રીત્યા પાવની શઙ્કરપ્રિયા ॥ ૩૭॥

વૈદ્યનાથાવતારો હિ નવમસ્તત્ર કીર્તિતઃ ।
આવિર્ભૂતો રાવણાર્થં બહુલીલાકરઃ પ્રભુઃ ॥ ૩૮॥

તદાનયનરૂપં હિ વ્યાજં કૃત્વા મહેશ્વરઃ ।
જ્યોતિર્લિઙ્ગસ્વરૂપેણ ચિતાભૂમૌ પ્રતિષ્ઠિતઃ ॥ ૩૯॥

વૈદ્યનાથેશ્વરો નામ્ના પ્રસિદ્ધોઽભૂજ્જગત્ત્રયે ।
દર્શનાત્પૂજનાદ્ભક્ત્યા ભુક્તિમુક્તિપ્રદઃ સ હિ ॥ ૪૦॥

વૈદ્યનાથેશ્વરશિવમાહાત્મ્યમનુશાસનમ્ ।
પઠતાં શ‍ૃણ્વતાં ચાપિ ભુક્તિમુક્તિપ્રદં મુને ॥ ૪૧॥

નાગેશ્વરાવતારસ્તુ દશમઃ પરિકીર્તિતઃ ।
આવિર્ભૂતઃ સ્વભક્તાર્થં દુષ્ટાનાં દણ્ડદઃ સદા ॥ ૪૨॥

હત્વા દારુકનામાનં રાક્ષસં ધર્મઘાતકમ્ ।
સ્વભક્તં વૈશ્યનાથં ચ પ્રારક્ષત્સુપ્રિયાભિધમ્ ॥ ૪૩॥

લોકાનામુપકારાર્થં જ્યોતિર્લિઙ્ગસ્વરૂપધૃક્ ।
સન્તસ્થૌ સામ્બિકઃ શમ્ભુર્બહુલીલાકરઃ પરઃ ॥ ૪૪॥

તદ્ દૃષ્ટ્વા શિવલિઙ્ગં તુ મુને નાગેશ્વરાભિધમ્ ।
વિનશ્યન્તિ દ્રુતં ચાર્ચ્ય મહાપાતકરાશયઃ ॥ ૪૫॥

રામેશ્વરાવતારસ્તુ શિવસ્યૈકાદશઃ સ્મૃતઃ ।
રામચન્દ્રપ્રિયકરો રામસંસ્થાપિતો મુને ॥ ૪૬॥

દદૌ જયવરં પ્રીત્યા યો રામાય સુતોષિતઃ ।
આવિર્ભૂતઃ ય લિઙ્ગસ્તુ શઙ્કરો ભક્તવત્સલઃ ॥ ૪૭॥

રામેણ પ્રાર્થિતોઽત્યર્થં જ્યોતિર્લિઙ્ગસ્વરૂપતઃ ।
સન્તસ્થૌ સેતુબન્ધે ચ રામસંસેવિતો મુને ॥ ૪૮॥

રામેશ્વરસ્ય મહિમાદ્ભુતોઽભૂદ્ભુવિ ચાતુલઃ ।

ભુક્તિમુક્તિપ્રદશ્ચૈવ સર્વદા ભક્તકામદઃ ॥ ૪૯॥

તં ચ ગઙ્ગાજલેનૈવ સ્નાપયિષ્યતિ યો નરઃ ।
રામેશ્વરં ચ સદ્ભક્ત્યા સ જીવન્મુક્ત એવ હિ ॥ ૫૦॥

ઇહ ભુક્ત્વાખિલાન્ભોગાન્દેવતાદુર્લ્લભાનપિ ।
અતઃ પ્રાપ્ય પરં જ્ઞાનં કૈવલ્યં મોક્ષમાપ્નુયાત્ ॥ ૫૧॥

ઘુશ્મેશ્વરાવતારસ્તુ દ્વાદશઃ શઙ્કરસ્ય હિ ।
નાનાલીલાકરો ઘુશ્માનન્દદો ભક્તવત્સલઃ ॥ ૫૨॥

દક્ષિણસ્યાં દિશિ મુને દેવશૈલસમીપતઃ ।
આવિર્બભૂવ સરસિ ઘુશ્માપ્રિયકરઃ પ્રભુઃ ॥ ૫૩॥

સુદેહામારિતં ઘુશ્માપુત્રં સાકલ્યતો મુને ।
તુષ્ટસ્તદ્ભક્તિતઃ શમ્ભુર્યોઽરક્ષદ્ભક્તવત્સલઃ ॥ ૫૪॥

તત્પ્રાર્થિતઃ સ વૈ શમ્ભુસ્તડાગે તત્ર કામદાઃ ।
જ્યોતિર્લિઙ્ગસ્વરૂપેણ તસ્થૌ ઘુશ્મેશ્વરાભિધઃ ॥ ૫૫॥

તં દૃષ્ટ્વા શિવલિઙ્ગં તુ સમભ્યર્ચ્ય ચ ભક્તિતઃ ।
ઇહ સર્વસુખં ભુક્ત્વા તતો મુક્તિં ચ વિન્દતિ ॥ ૫૬॥

ઇતિ તે હિ સમાખ્યાતા જ્યોતિર્લિઙ્ગાવલી મયા ।
દ્વાદશપ્રમિતા દિવ્યા ભુક્તિમુક્તિપ્રદાયિની ॥ ૫૭॥

એતાં જ્યોતિર્લિઙ્ગકથાં યઃ પઠેચ્છૃણુયાદપિ ।
મુચ્યતે સર્વપાપેભ્યો ભુક્તિં મુક્તિં ચ વિન્દતિ ॥ ૫૮॥

શતરુદ્રાભિધા ચેયં વર્ણિતા સંહિતા મયા ।
શતાવતારસત્કીર્તિઃ સર્વકામફલપ્રદા ॥ ૫૯॥

ઇમાં યઃ પઠતે નિત્યં શ‍ૃણુયાદ્વા સમાહિતઃ ।
સર્વાન્કામાનવાપ્નોતિ તતો મુક્તિં લભેદ્ ધ્રુવમ્ ॥ ૬૦॥

ઇતિ શ્રીશિવમહાપુરાણે તૃતીયાયાં શતરુદ્રસંહિતાયાં સનત્કુમારનન્દીશ્વરસંવાદે દ્વાદશજ્યોતિર્લિઙ્ગાવતારવર્ણનં નામ દ્વિચત્વારિંશોઽધ્યાયઃ ॥ ૩.૪૨॥

॥ સમાપ્તેયં તૃતીયા શતરુદ્રસંહિતા ॥

*Shri Shiva Mahapuranam 3 Shatarudra Samhita*

pdf was typeset on January 23, 2026

Please send corrections to *sanskrit@cheerful.com*